Barcode : 99999990030695
Title - Aagamodwarak-Kratisandoh Bhag-V
Author - Muni, Lalsagar
Language - Sanskrit
Pages - 245
Publication Year - 1963
Barcode EAN.UCC-13



आगमोद्धारक-ग्रंथमालाया चतुर्विंश रत्नम् ।



णमोत्थु ण समणस्स भगवओ महावीरस्स

पू आगमोद्धारक-आचार्यप्रवरश्री-आनन्दसागरसूरीश्वरेभ्यो नमः ।

आगमोद्धारक-कृतिसन्दोहः ।

नव्याय जैनगीता-आगममहिमा-मुनिवसनसिद्धिकृतित्रयरूप

पञ्चमो विभाग. ।

श्री खरतरगच्छीय ज्ञान मन्दिर, जयपुर
संग्राहक

प० पू० गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागर-
सूरीश्वरशिष्य शतावधानी मुनिलाभसागर

प्रत य ५००] [मूल्यम् २-०० पै

वीर सवत् २४९० — वि सवत् २०२० — आ स १५

प्रकाशक :

आगमोद्धारक-ग्रन्थमाला एक कार्यवाहक

सा. रमणलाल जयचंद

रणछंद (जि. खेडा)

द्रव्यसहायक :

पू. आगमोद्धारक-आचार्यश्री आनन्दसागरसूरीश्वरजी महाराजना शिष्यरत्न गणिवर्यश्री चिदानन्दसागरजी महाराजना सदुपदेशथी मालेगाम जैनसंघ ज्ञानखाता तरफथी ।

मुद्रक :

मंगळभाई अंबेभाई पटेल

मैनेजर

श्री सुरेन्द्र ग्रंथरत्न मुद्रणालय लि.

सोजित्रा (आणंद).

शुद्धिपत्रम् ।

पृ	प	अशुद्धम्	शुद्धम्
१	१३	नाम	नाम
५	१८	भवे	भवे
७	६	वन्द्या	वन्द्या
११	५	सेवा,	सेवाऽ
,,	१०	त्रियात	त्रियाऽत
१३	१८	युद्धे	युद्धं
१६	२०	धार०	धार०
१७	१८	ध्ये न	ध्येन
१८	८	मापु	मापु
२९	१३	प्युर्वो	प्युर्वी
२७	१	तदैत्रे	तदैत्रे
५१	१६	तत	तत
५३	१७	सा त	सात
,,	१५	सुकृते	सुकृते
५७	२	वार्य्य	वाद्य
५८	१०	पेक्ष्या गुरु	पेक्ष्योऽगुरु
६०	३	वा–	वा
६३	१२	मलान	मता न
६५	२	भाधा	भाग्रा
,,	१९	दापिता	दोपिता
६६	१	ऽसु	सु
,,	९	निवृत्ति	निवृति
६८	१४	नोघ	नौघ

पृ	प	अशुद्धम्	शुद्धम्
६९	९	पृथक्त्वे न	पृथक्त्वेन
७३	८	द्विका	ब्दिका
,,	१५	च्छवासो	च्छ्वासो
७४	३	क्षय	चय
७५	१४	चारन्	चरन्
७८	२०	परदा	परदार
८०	१२	सविशेष	स विशेष
८१	१	सङ्गो	मङ्गे
८२	७	सुभ	शुभ
८३	२	ग्रहित्व	ग्रहो
८६	८	या	ये
९०	१५	जनतान	जनाना
९४	२	श्चत्य	श्चैत्य
,,	१३	माङ्गय	माङ्गय
९४	४	कल्जि	कलित
९६	२०	सं घ	मह
९९	१२	सत्या	सत्त्वा
१०३	३	पदाङ्कस्	पदाङ्कम्
१०६	२	सङ्घे	सङ्घे
१११	८	दृगक	देशन
११२	१	यातेन	याने न
११२	१८	स्वभा०	स्वभा०
११४	१९	निगत	निर्गत

पृ.	पं.	अशुद्धम्	शुद्धम्
११५	२	हशां	दशां
,,	१०	च्छेदात्	छेदात्
११७	१०	अधिक्कार	अधिकार
१२२	७	निजम्	निजः
१२५	१९	धरेयुः	धरेयुः
१२६	६	स्तीर्यन्त	नीयन्त
,,	१०	पुगात्	पूगात्
१२८	१०	मेकान्तिकं	मैकान्तिकं
,,	११	,,	,,
१३१	५	यशसा	यशसां
१३२	१८	यन्नात्	यत्नात्
१३३	४	कुलिशाभ	कुलिशोऽत्र
,,	१५	प्रभव	प्रभव
१३५	२	विषभां	विषमां
१३६	३	शुद्ध	शुद्धि
१४१	१५	भावो	भावो
१५०	५	रत्रा	रत्र
१५१	१५	क्तो	क्तो
१५२	८	श्राद्धों	श्राद्धीं
१५३	१६	न	सु
१५७	६	त्रिंशत्	स्त्रिंशत्
१५९	१२	गमाना	गमानां
१६१	१८	भविष्या	भविष्याः
१६६	२	भवति	भवन्ति
१७८	४	धर्मं	धर्मं
१८५	४	कायगा	काय
१८६	१२	वधौः	वधौ
१८७	५	मुतो	युतो
१८९	१७	देवे	देवे
१९४	७	स्थित	स्थिति
२०८	६	प्राप्तौ	प्राप्तो
,,	१०	मवा	भवा
२१३	५	श्रय	श्रयं
२३१	४	शास्त्र	शास्त्रे
२३८	१६	वधिक	वधिक

— विषयानुक्रम —

अधिकार	पत्राङ्कम्	अधिकार	पत्राङ्कम्
अहद्गुणनम् ।	१	अहिंसागुणनम् ।	६१
सिद्धगुणनम् ।	३	सत्यगुणनम् ।	६७
आचार्यगुणनम् ।	५	अस्तेयगुणनम् ।	७१
उपाध्यायगुणनम ।	७	ब्रह्मचर्यगुणनम् ।	७८
साधुगुणनम ।	९	अपरिग्रहगुणनम् ।	८१
सम्यक्त्वगुणनम् ।	११	जिनबिम्बगुणनम ।	८५
ज्ञानगुणनम् ।	१५	चैत्यगुणनम् ।	९३
चारित्रगुणनम् ।	१७	ज्ञानगुणनम ।	१०१
तपोगुणनम् ।	२०	श्रमणवर्णनम् ।	१११
जापगुणनम् ।	२३	श्रमणीवर्णनम् ।	१२३
अर्जीयगुणनम् ।	२६	श्रावकवर्णनम् ।	१३२
पुण्यगुणनम् ।	२८	श्राविकागुणनम् ।	१४४
पापगुणनम ।	३३	ज्ञेयगुणनम ।	१५४
आश्रवगुणनम् ।	३८	साधुगुणनम् ।	१५८
संवरगुणनम् ।	४१	धर्मगुणनम ।	१६३
बन्धगुणनम ।	४८	ज्ञानगुणनम ।	१६८
निर्जरागुणनम ।	५०	सम्यक्त्वगुणनम् ।	१७४
मोक्षगुणनम ।	५६	चारित्रगुणनम ।	१८२

★

। प्रकाशकीय-निवेदन ।

प० पू० गच्छाधिपति आचार्य श्री माणिक्यसागरसूरीश्वरजी महाराज आदि ठाणा वि. सं. २०१० ना वर्षे कपडवंज शहेरमां मीठाभाई गुलाबचंदना उपाश्रये चतुर्मास वीराज्या हता । आ अवसरे तेओश्रीना पवित्र आशीर्वादे आगमोद्धारक-ग्रन्थमालानी स्थापना थएली हती. आ ग्रन्थमालाए त्यारबाद प्रकाशनोनी ठीकठीक प्रगति करी छे ।

तेओश्रीनी पुण्यकृपाए आ 'आगमोद्धारककृतिसंदोह 'नो भाग ५ मो के जेमां 'जैनगीता', 'आगममहिमा' अने 'मुनि-वसनसिद्धि' नामनी त्रण भव्य कृतिओ छे ते ग्रन्थने आगमो-द्धारक ग्रन्थमालाना २४ मा रत्न तरीके प्रगट करतां अमने बहु हर्ष थाय छे.

आनी प्रेस कोपी तथा आनुं संशोधन प० पू० गच्छाधिपति आचार्यश्री माणिक्यसागरसूरीश्वरजीनी पवित्र दृष्टि नीचे शता-वधानी मुनिराजश्री लाभसागरजीए करेल छे. ते बदल तेओश्रीनी तेमज जेओए आना प्रकाशनमां द्रव्य तथा प्रति आपवानी सहाय करी छे. ते बधा महानुभावोनो आभार मानीए छीए ।

लि०

प्रकाशक

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

पू० आगमोद्धारक–आचार्यश्री आनन्दसागरसूरि–प्रणीता

जैनगीता ।

। अध्याय प्रथम । (अर्हदधिकार)

अर्हतो मनुते देवान्, दर्शयन्तश्चतुर्दश ।
स्वप्नान् गर्भावतारे ये, मल्लजम्बालयर्जिता ॥१॥
जातमात्रा सुराद्रौ येऽभ्यसिञ्चन्त सुरेश्वरैः ।
न स्तन्यपा सुरानीत-फलाद्या उचितक्रिया ॥२॥
स्युर्हिंसादिपाप्मानोऽकम्प्या परीषहादिभिः ।
हत्वा घातीनि लब्धाऽज्ञ्य, ज्ञान सहायनिस्पृहा ॥३॥
साधुसाध्वी श्राद्धश्राद्ध्यश्चतुर्धासङ्घसङ्गहा ।
आद्यन्तयामयोर्नित्य, योजनानुगदेशना ॥४॥
देशका द्विविधे धर्म, जिननामप्रभावत ।
चत्वारोऽतिशया जाते सुरसाऽयोनिजगति ॥५॥
कैवल्ये त्वेकादशैव, चतुस्त्रिंशत् सदाऽर्हताम् ।
मायाविनो न तान् धतु–मीशास्तादृशरूपिणः ॥६॥
शक्रादिभिः कृता पूजा, प्रातिहार्याष्टकैर्दधुः ।
अयोगिता गता मुक्ता, जन्ममृत्युरुजाऽन्तके ॥७॥
सिद्धिं विना गतिर्नान्या, सदा कैवल्यचित्सुखा ।
सदभक्षककालस्य, भक्षका स्थिरताञ्चिता ॥८॥

न व्यक्तिपूज्यतावादा, न भक्ताधीनतत्पराः ।
गुणलभ्यपदोद्देशा, भव्योद्धारपथोद्धुराः ॥९॥

भक्तिर्गौणा गुणा मुख्या, येषां निर्मलशासने ।
सङ्घः पापपरावर्ती, सिद्धान्तः सिद्धिसाधकः ॥१०॥

भावप्राप्यफलाऽऽलापा, निग्रहाऽनुग्रहोज्झिताः ।
सर्वस्वातन्त्र्यमार्गस्य, यथार्हं देशका भुवि ॥११॥

नायुधैर्न च क्रोधाद्यै-रमीषां दूषिताऽऽकृतिः ।
आत्माऽऽदर्शधरा मूर्ति-र्हेतुस्त्यागधियोऽमल· ॥१२॥

यस्याऽऽज्ञाराधना मुक्ते-र्हेतुस्तद्गुणसंश्रया ।
भक्तिः श्रेष्ठतमा सानु-रागा त्यागे तदीयके ॥१३॥

अमर्त्यमर्त्यसम्पत्त्योः, श्रभ्रितिर्यग्गताऽऽपदाम् ।
विधातृत्वेन लोकानां, न मृषावञ्चनापराः ॥१४॥

जगद्विधानस्थैर्यान्तै-र्भापका न भवार्ज्जिनाम् ।
यथाकर्म फल प्राहु-रर्ज्जिनां हितकामुकाः ॥१५॥

एवंविधान् विविधभावमयाञ्जिनेशान्,
मन्येत यो विहितदानदयोद्यमश्च ।
हित्वाऽपरान् कुपथगामिन आप्तिवन्ध्यान्,
जैनः स एव ननु मुक्तिपदप्रधानः ॥१६॥

इति प्रथमोऽध्यायः ।

। द्वितीयोऽध्याय । (सिद्धाधिकार)

सिद्धान् सिद्धगुणान् समग्रजगत प्रान्तस्थितान् सादिमाञ्
ऊर्ध्वन्स्थानगतान निहत्य निखिलान् समारपातप्रदान् ।
मूलात् कर्मचयान्निनास्मगुणतो लब्ध्वाऽमिता सम्पद्,
नष्टान्तैकभुव शिवाध्ववहने वन्दत देवत्वधी ॥१॥

समस्तजीवा अमितादिकाला-न्निगोदवासे व्यवहारवर्जिते ।
कश्चित्ततो याति यदानुकूला, सलोकभाजा भवितव्यताऽऽत्मन ॥२॥

भूम्यादिभावान् पृथगात्मसस्थान् प्राप्तो भवेत् स व्यवहारभाक् स्यात् ।
तत्राऽप्यनन्तान् परिवर्तकालान्, बालो भवेत् क्षुद्रभवाभिनन्दी ॥३॥

पुण्यादिहेतुष्वपि कालहेतो , प्रधानभावाच्चरम स यायात् ।
आवर्तमध्ये शिवधामसङ्ग, तदैव नान्यत्र पुन स्पृहेत ॥४॥

स्वतोऽन्यतो वा यदि भव्यभाव , पक्को भवेन्मार्गमनुश्रयन् य ।
सद्बन्धवृत्तेरनुकारभाव, भवेत पर मोहमवन्धयन् स ॥५॥

सदागमाऽऽश्लिष्टमन प्रबन्धो, मान्याञ्जिनार्कान् मनुते प्रसन्न ।
प्रशसको नैव भयाश्रिताना, विरक्तचित्तो भवभावभीते ॥६॥

जिनेश्वराज्ञामनिदन् श्रयेत स, सेवेत दक्षान् सुगुरून सुधर्मान् ।
भ्रष्टोऽप्यरण्ये ननु याति मार्ग, सुदेशकोक्ते- शुभभावजीवन ॥७॥

मार्गोन्मुख सन्मतिमज्जिताघो, यदाऽर्धमावर्तमशोषयत् स ।
यद्योपमाऽपूर्वमपूर्वमाप्य, ग्रन्थि विभिन्द्यात् खलु पापराशे ॥८॥

विद्ध यथा मौक्तिकमेत्य पद्मं, नाविद्धमेव क्षतपापराशि ।
कदापि नेदृग् भविता निगोद, गतोऽपि भद्रस्य परात् प्रभावात् ॥९॥

विभिद्य मिथ्यात्वमनन्तमूलं, द्वितीयभावेन भवेत्तृतीये ।
सम्यक्त्वसम्पत्तिसहो लभेता-ऽऽस्तिक्यादियुक्तं हि गुणं तुरीये॥ ८॥

जीवादिमर्थं मनुते कथञ्चि-दस्तित्वनित्यत्वगुणं प्रमेयम् ।
तथैव कर्ताऽनुभवी भवाब्धौ, स्वकर्मणां सद्व्यवहारदृष्ट्या ॥११॥

भव्यत्वपाके शिवसाधनानि, सद्दर्शनज्ञानयमानुपैति ।
समग्रकर्मक्षयजातशुद्धि-र्निर्वाणमेति प्रगुणाऽऽत्मभावः ॥१२॥

आस्तिक्यमेष्वेत्य द्विधा दयायां, प्रवृत्तवीर्यो भवभावभीरुः ।
सनातने धाम्नि सदा रतः स, कषायवान्नैव जिनादितत्त्वे ॥१३॥

महाव्रताकाङ्क्ष उदग्रवीर्या-भावाद् भवेत् कोऽपि गृहिव्रतोत्कः ।
अभ्यस्तशिक्षः श्रमणत्वमेति, विहाय हिंसादिभवाऽऽश्रवान् सः ॥१४॥

मोहक्षयायोद्यत आप्तवीर्य-श्रेण्या समस्तं विनिकाप्य मोहम् ।
स केवलीभूय सयोगभावो, जिनोऽपि कश्चिद् भवतीह जीवः॥१५॥

तीर्थं विधायैति स चापलेश्य-मयोगमेषोऽपि लभेत सिद्धिम् ।
भेदा यतः पञ्चदश प्रसिद्धा, अनन्तरं सिद्धिपदं गतेषु ॥१६॥

एवं दुर्दान्तकर्मक्षपणकविधया लब्धसिद्धस्वभावा,
नोच्छिन्ना ज्ञानशून्या न च भवजनना निग्रहानुग्रहाकाः ।
शश्वत्स्थानस्थिताश्चित्सुखततिकलिता भव्यजीवावलम्बा,
ये सिद्धास्तान् सदा यो मनुत उदययुग् देवभावेन जैनः ॥१६॥

इति द्वितीयोऽध्यायः ।

। तृतीयोऽध्याय । (आचार्याधिकार)

वन्देताऽऽचार्यवर्यान् सुगुरुपरान् मोक्षमार्गकलीना-
र्तीर्थेशैस्तुल्यरूपान् प्रवचनशकटोद्वाहकान् गच्छनाथान् ।
सूत्रार्थादर्शकर्तृन् प्रवरपदुमतीन् वादिवैकतानान्,
नित्य तीर्थस्य सारा भिन्धत उदयाकाङ्क्षुकान् य म जैन ॥१॥

गते तीर्थनाथे समस्तज्ञमार्गे, शिव यो वहेत् तीर्थभार नितान्तम् ।
यथाऽस्तगते वासरेशे निशेशे, प्रदीपो जगत्या पदार्थप्रभासी ॥२॥

जिना जीवितान्त वहन्त्येव तीर्थं, सुतीर्थ तथाप्येत इहोदिता नो ।
अघोद्घातकास्तीर्थरूपा मुनीशा, मता शासन यान्ति ते तद्दिशा ॥३॥

जिनेश शिवाध्या समस्ताङ्गिसाम्ने, सभाया पुर स्थापितो दोषमुक्त ।
मुनीना शुचिश्रावकाणा पर त, सदा सूरिवर्या वहन्ते प्रकामम् ॥४॥

कृताथा यथा सार्थवाहो जनाना, सुतप्त्याऽध्वनि श्रान्तविश्राधनानाम् ।
तथा सूरिवर्या सुदृष्टिप्रधानान्, निजार्याऽऽपन्ने मोक्षमाग नयन्ति ॥५॥

यथा तीर्थनाथान् समाराध्य सद्भ-गयस्य भवे तीर्थनाथस्तृतीये ।
तथा सूरिवर्यान् समाराध्य जन्तु-स्तृताये भवे तीर्थनाथत्वभाक् स्यात् ॥

जिनेशा भवयुर्यथाऽऽशातिता द्राग्, भवानन्त्यमिथ्यात्वदानैकदक्षा ।
मुनीशारतथैवेत्यवजानते नो, जिनैनाध्वमन्तार इहाऽमलाभा ॥७॥

पर सूत्रमल्प यदाऽसौ विलुम्पेद्, भवानन्त्यमेतीह हित्वा सुदृष्टिम् ।
यदा तु प्रकाशेत सम्यक्तया तत्, म शास्त्रेण गीत सुसूरिवरिष्ठ ॥८॥

सुदीक्षा समस्तैन उन्घातदक्षा गृहीत्वा गुरो पापहन्त्री सुशिक्षाम् ।
समभ्यस्य सूत्रा र्थयुग्म समेत्य, ह्युपरापना सद्व्रतयापनीं प्राग् ॥९॥

द्वादशाब्दी गुरुपास्ते-रर्थाल्याऽऽगमसञ्चयम् ।
कालं तावन्तमेवार्थं, भवेन् सूत्रार्थयुग्मवित ॥१०॥

विहारयेत् सूरिवरस्तमार्य्य, साधोर्युगं देशविदेशभागम् ।
मुण्डेत् प्रतीच्छेच्च बहून् मुनीन् स,
विद्याच्च भाषां विविधां जनानाम् ॥११॥

जिनेशजन्मव्रतकेवलान्त-कृद्भूमिमेदयाऽमलदर्शनाढ्यः ।
ज्ञात्वा पदार्हं मुनिनाथवर्याः, पदेऽभिसिञ्चन्ति सहानगारैः ॥१२॥

सबालवृद्धे गण ईश एष, द्रव्यैर्गुणैः सत्परिवर्त्तनैः सह ।
पाल्येत तेनापि जिनानुकारं, तोष्येत तेनार्थपदानि दत्त्वा ॥१३॥

सूरीन्द्रपट्टस्य यथावदाहृतौ, भवेज्जिनः सज्जनुषां तृतीये ।
पञ्चाऽतिशेषा मुनिसार्थपेऽस्मिन्, स्वप्नेऽपि नेमेऽन्यमुनीश्वराणाम्॥१४॥

आत्मर्णमोक्षं परिवाचयन् गणं, यथा विधत्ते सुगुणांस्तु शिष्यान् ।
निष्पाद्य पट्टे प्रतिभासमानान्, विधाय कार्योऽन्तगतः समाधिः॥१५॥

एवंविधान् गणधरान् विविधप्रकृत्या,
भक्त्या समर्च्य गुणगाननिबद्धलक्षः ।
आज्ञाधरो भवति दासनिकृष्टरूपो,
जैनः स एव जिनशास्त्रधरैः प्रगीतः ॥१६॥

इति तृतीयोऽध्यायः ।

। चतुर्थोऽध्याय । (उपाध्यायाधिकार)

नमेदुपाध्यायपदान्वितान् गुरु-नाचार्यपट्टस्य यदैकरूपा ।
क्वचिद् द्वये भिन्नतमा क्वचिन्नो, पन्द्वय धार्य्यतेऽपि कश्चित ॥१॥

गन्तुम्य तप्ति निखिला विन्ध्यु-राचार्यनिर्युक्तिधरा यतोऽभी ।
प्रवर्त्तक स्थविर गणावच्छेद गणिं चापि नियोजयन्ति ॥२॥

धन्या मुनीन्द्रा इव साधुवर्यै -पर्यायत स्युयदि वा त्रिहीना ।
पञ्चातिशेषा अपि सन्त्यमीषा, गणेशवत सर्वकरा गणस्य ॥३॥

ग्रथाप्येत सस्था गुरुरैषिणा विद्या, साध्य च तस्या रुचिकृन्नराणाम् ।
ग्रयाप्येत चित्त न तथापि तस्या , फल तच्चालनमन्तरेण ॥४॥

सञ्चालका मतिवाक्क्रियाणा, सौन्यमिद्धया फलमाप्यतेऽस्या ।
अशिक्षिताभ्यस्तकला न तस्या , फल लभेयु स्पृहयालवोऽपि ॥ ॥

छात्रा यथा साधुवरा जिनेशा-श्रितेऽत्र धर्म वरयाचकास्ते ।
सत्र क्रियायुक्तमुदारभावा , सम्पादयन्तीष्टफलाय तानित्र ॥६॥

नृपा यथा कोशसमृद्धभावा, श्रान्त आत्माऽन्यविभासनेऽपि ।
अङ्गादिसग्रामरत्नधारी, जनाऽन्यविद्येषु स याचक स्यात् ॥७॥

विशारिनीत मतत स्वविद्या विना प्रमाद परिशीलते च ।
स्वाध्यायलीनो गतमत्सभाव , मध्यस्थसौ वाचक आगमेषु ॥८॥

दु खानि सौख्येन युतानि विद्म, आर्य्याय सुख्यो भवतीह तद्वद्
मुनीश्वरेभ्यो जिनशास्त्रमद्य , समर्प्य तुष्टिवरयाचकस्य ॥९॥

एकादशाऽऽचारमुखान्युपाङ्गौ-पपातिकादीनि दश द्वये च ।
पञ्चेन्द्रियाणी त्रय पीणयानि, मूल चतुष्क यतीद्धबुद्धि ॥१०॥

राष्ट्रम्च भारमखिलं प्रजचाऽऽयतीक्षो-
ऽमात्यो यथा वहति भूतिकरो नृपाणाम्।
श्रीवाचकेन्द्रविततारिलगच्छसारः,
सच्छासनेन जयमेति मुनीशवर्यः ॥११॥

रत्नानि राजकुललब्धमहांसि जातेः,
शस्यानि ते यदि भवन्ति गुणान्वितानि।
जीवादिसार्थवहनानि पदानि सन्ति,
श्रीवाचकान्तिक उदारतराणि सूत्रैः ॥१२॥

सूत्रानुयोगकृतिपु प्रवराः पतन्ति,
पादेपु विघ्नविजयाय कृतज्ञतायै।
बुद्धा जिनेश्वरमुनीश्वरसङ्गतेपु,
वंशस्य वाचकततेरपि शुद्धि (शास्त्र) सिद्धयै ॥१३॥

अनुयोगधरा. परमेष्ठिपदे, विधिसिद्धपदान प्रणमन्ति मुदा,
अनुयोग इहास्ति जिनेशततो, वरिवर्तति दक्षिणतो भरते।
अनुयोग इह गुरुस्कन्दिलसन्मुनिपान्तिषदा समसूत्रगतः,
नागार्जुनसूरिवरेण ततो नमति श्रद्धावलिकः सुजनः ॥१४॥

शुभवाचकवंशगता मुनिपा, विदिता जगति स्वाति (सूरि) प्रमुखाः,
वरनन्दिकरोऽपि च नन्दिकरो, वरवाचकदेव इहैव मतः।
आवश्यकमादिमतं मुनिपै-रुद्देशमुखत्रितये क्रमतो,
नन्दिः पुनरध्ययनीयपदं, सकलेऽप्यनुयोगविधौ यमिनाम् ॥१५॥

यथा मुनीशः सकलेऽपि शास्त्रे, विभर्ति मुख्यत्वमसानमाप्तितः।
तथैव मुख्याः खलु वाचकेन्द्रा-स्ततो भवेज्जैनवरो नतस्तान् ॥१६॥

इति चतुर्थोऽध्यायः।

। पञ्चमोऽध्याय । (साध्वधिकार)

वन्देव साधुगणमुत्तमसत्त्ववन्त्व,
त्रात प्रभू सहजनिं ललना तनूजम् ।
राष्ट्र सुराज्यमभितोत्मवृद्धिहेतु
ज्ञातेयमथनिचय च जहौ स वीर ॥१॥

भ्रांति भवेषु जननान्तकभारभुग्ना,
नि सत्त्वसारणामनिवार्यरूपाम् ।
ज्ञात्वा शरण्यमरहत्कथित सुधर्म,
पाप समग्रमधम परिहृत्य ध्ये ॥२॥

सम्यक्त्वबोधचरणानि शिवकहेतो',
सावद्ययोगविरमेण युतानि धृत्वा ।
सावद्ययोगविरतात सुगुरोश्च याच-
ज्जीव चमार नवधा शिवसाधनेन्द्र ॥३॥

अथोंपाजनमुज्झित निरतितो, मूर्च्छापन्नो मोऽस्तिमाँ-
स्त्यक्त्र पापपरायणैकमहितो रौद्रात्तचित्तोद्धुर ।
जायन्तेऽधचया, विलीनमयते धमस्य चेरवात्क्षण',
सद्भात्तत्प्रतिबुद्धय शान्तमनसाऽसङ्गोऽभवज्ज्ञानवान् ॥८॥

सम्मूर्च्छिमाऽमितमनुष्यविनाशहेतु,
पञ्चाग्नगर्भजनरा नवल्लभमाना ।
हृत्वन्व उत्तनर्गमैथुनेऽन तस्मात्,
तत्याज योषित्यन सकलाघशान्त्यै ॥९॥

प्राणा धन व्यवहतौ नियतोत्तमाना,
सोढु न शक्यमपहारकृत तु तद्धि ।

मत्वैत्यसौ परिहरेद् ग्रहधारणार्हं,
सर्वं नदत्त (ह्यदत्त) मपि वस्तु समस्तयोगैः ॥६॥

भूतादिनिह्नवमुखं विजहात्यसत्यं,
संसारसागरमनन्तमुपेत्यमुष्मात् ।
पापप्रधानमखिलाऽऽगमनिन्द्यरूपं,
नैवाद्रियेत शिवसौख्यमनाः कदापि ॥७॥

सर्वाण्यघानि कृणशोऽपहृतौ पटूनि.
वार्याणि सम्प्रतिकराणि विशुद्धमन्ति ।
मुक्त्वैकमाग उदितं जनुषां विनाशे,
तत्याज तत् परवधं त्रिविधं त्रिधा यः (ऽसौ) ॥८॥

हिंसादीनां यमोऽसौ प्रतिकलमुदयी मातृष्वष्टासु चेत स्या-
द्रक्ष्यास्ता नैव यामाशनकमनवता ध्यानपाठौ भवेताम् ।
नैवैवं सर्वसङ्घं प्रतिदिनमविता सुष्ठुवर्त्मानुवर्त्ती,
यावज्जीवं च शुद्धं प्रतिवहति महाव्याममाप्तुं शिवं सः ॥९॥

सुकराणि भवेयुरिमानि जने, श्रुतवाक्यमनुश्रयता सुधिया ।
व्रतषट्कतया गदितानि बुधै-र्यदि रक्षति जीव (मिदं षट्कं)
चयान् सततम् ॥१०॥

निखिलव्रतिनां हृदयं ह्यवने-ऽसुमतां प्रतिपत्तिरिहाप्तिमताम् ।
नहि शक्यत एतदनक्षजये, विरतौ यतिसार्थ इतोऽक्षजये ॥११॥

न बुधोऽलसयोगयुतोऽध्ययनी, न विरुद्धसमागमहेतुधरः ।
श्रमणत्वमनुत्तममायतते, तदकल्यमसौ विजहाति सदा ॥१२॥

स्वय साधन चेन्न शुद्ध दधाति, परो हिंसनादि प्रवुर्यात्तदर्थम् ।
स्वकीयेतरे नास्ति भेदो वधे(ध)न—ङ्गार्यासनादि व्रती त्यक्तुमर्ह ॥१३॥

भवेद्यत् व्रताना मुनीना च यत्ना—द्धृत वस्त्रपात्रादनुग्राहक तत् ।
वरेत्नैव हिंसापरीहारहेतो , पल्यङ्कमुख्य मुनिर्गट् तु किञ्चित् ॥१४॥

वह्नेर्यथाऽगारवता तु सेवा, सुखासये तद्वदगारिनिष्ठा ।
मत्वेति नैवासन गृह्णपु, चरणतिमाश्रसुखासिद्धत्सु ॥१५॥

साधन यन्पि नाप्यते यहि , पापङ्क मुनिर्पदंकुचारित ।
अन्तर करोति पापसङ्गम, साधन त्यजेत्तनोर्चिन्न घृपम् ॥१६॥

विपाकतोऽघमन्तते र्निवत्तेऽघसाधनात,
शरीरसक्रियात एनमा पर निनिश्चयान् ।
विदन्निति स्वकमभेदममन्नो मुनि-
स्वकर्म मन्दधाति सत्सु सयमाध्ययापनम् ॥१७॥

एवविधान् मुनिवरानशनाम्युद्यम-
पात्रौपधादि विधिना प्रतिलम्भयन् स ।
दयार्चनादिनिरत परमेष्ठिसच ,
स्याज्जैन एव करुणानिधिरात्ममार्ग ॥१८॥

इति पञ्चमोऽध्याय ।

। षष्ठोऽध्याय । (दानाधिकार)

महिता स्वा ध्याता सिद्धा यनाग उपासिता,
विहिता खेरा याचरणदयोमुनीनपदोचिता ।

मुक्तेरिच्छा चेन्न स्वान्तेऽखिलं मृतमण्डनं,
विदिताऽस्यान्तः सत्सम्यक्त्वः सुजैन उदीरितः ॥१॥

आगमवाचो यस्य श्रोत्रैः श्रुत्वा शिवकामना,
स्यादुत्कृष्टा भवभयभीतिर्हृदीष्टपदाप्तये ।
साधनमस्या गुरुकुलसेवाविधित्सया वर्तनं,
विघ्नापेतं विज्ञोपचितं देवार्चनमाहृतम् ॥२॥

पक्वे भावे भव्यत्वस्याऽसमे सुखदायिनि,
भित्त्वा ग्रन्थि कश्चिल्लभते भवी शुभभावनः ।
चलब्ध्वा स्यात् परिमितभूतिर्नरः शिववर्त्मगः,
पतितं न स्यात् सत्सम्यक्त्वं कदापि निरन्वयम् ॥३॥

मत्तो विज्ञो मूर्खैः सदृग् योगत्रिकक्रार्यतोऽ-
पगते विमदे विज्ञो विज्ञो न वै जडतान्वितः ।
भ्रष्टो दृष्टेः कालमनन्तं निगोदमुपाश्नुते,
प्राप्ते भावे सत्सम्यक्त्वं ध्रुवं धरतीप्सितम् ॥४॥

वर्त्मभ्रष्टः सद्भाग्यः स्याच्छुभेऽध्वनि विश्वसी,
दैशकवाण्या इतरस्त्वितरे न चादृसुतमत्र हि ।
सम्यक्त्वी स्याज्जिनमार्गोक्तौ न परत्र कदापि हि,
विश्रम्भोत्को नित्यं मिथ्यामतिः पुनरत्र न ॥५॥

लब्ध्वाप्येतद्योगात् कुगुरोः श्रद्धाधनवञ्चितः,
अज्ञानाद्वा हीनः स्याद्वाऽन्यथाऽनृतबोधताम् ।
वेषं धर्मं जैनार्चीर्णं चरन्नपि धिक्कृतो,
हेयः सुधिया मार्गे विघ्नैः समो जिनधर्मिभिः ॥६॥

योऽष्टाङ्गभिर्युक्ता अबोधसम पुन ,
स्त्रीशस्त्रादैर्युक्ता मुद्रा धरन्ति भवभ्रमाम् ।
नेते दवा सार्थारम्भा न चापि गुरु पद,
हिंसाद्यात्मा धर्मो नैवाश्रिते शमुज्वलाम् ॥७॥

स्यात् सम्यक्त्व पञ्चविध मुखे ह्युपशान्तिच,
घटिकायुग्म सप्तप्रकृतीर्विनाऽन्य पर पुन ।
क्षायिकमितरन्मिश्र मिश्रान् पड्डावलिका पर,
सास्वाद स्याद् वदकमन्ते मिश्रान् परमीरितम् ॥८॥

जैन वचन श्रद्धत्ते यद् विशेषनिर्वित,
गतमिथ्यात्व स्याद् द्रव्येण सम्यक्त्वयुतोऽसुमान् ।
द्वारै सन सत्त्वादीना मन्ता न्दभावतो,
भावात्तस्य स्यात सम्यक्त्व कलामहनिर्गत ॥९॥

प्रत्यक्ष तत्सम्यक्त्व स्यात्तीन्द्रियवेदिनो,
लक्ष्य बुद्धेरास्तिक्यं स्वमात्मप्रतीप्सितम् ।
जीवेऽन्यस्मिन् शुश्रूषायै प्रमीयत आप्तात्,
नैव धर्माधर्मादयान भवाभवेदिन ॥१०॥

पञ्चम्या युक्त सप्तभिरशै मत्ता श्रुतिहेतुक,
निश्चयपक्षेऽ सत न्यायुत प्रमादिभि ।
चिद्वरिद्धे पक्षेऽन्यस्मिन युत विकलैरपि,
प्राप्ते तस्मिन् स्याद्यामाना कृतिम्लूचिता मताम् ॥११॥

नान्ये धर्मा पोढा जीवान् कदापि तु मन्यते
हिंसा तेषा तीर्थ युक्ता स्थिरेतरजीवगा ।

तत्तस्मिन् स्याद्धिंसानियमो न वै परमार्थतः,
सत्याद्यान्यत्येवं तेषां ततो व्रतमार्हतम् ॥१२॥

जीवाजीवौ विश्वे सत्तां सदा धरतोऽन्वयात,
हेया ग्राह्याः के केऽत्रेति प्रधारणसंविदि ।
तत्त्वानि स्युः सप्तेत्यत्र प्रमाधनबाधने,
पुण्यापुण्ये क्षिप्ते मान्यान्युदाहरतो नव ॥१३॥

एतद्यो धरतेऽसुमान् दृढमतिः स्वप्नेऽपि नान्यान् सुरान्,
धर्मास्तद्वत आदरेण मनुते संसारगर्तागतान् ।
सर्वत्रेक्षत ईप्सितार्पणकरं जैनेन्द्रधर्मादरं,
सोऽवश्यं शिवमश्नुतेऽत्र यदि वा जन्मान्तरे निश्चितम् ॥१४॥

अनन्तशो भैव्यभवानऽवाप, महाव्रतानां धरणप्रभावात् ।
न प्राप पारं यदसौ स एव, लब्ध्वाऽद् एतीह् प्रभावतोऽस्य ॥१५॥

लोके यथाऽऽश्वासपदं हितेच्छा, मुमुक्षता धर्मधरे तथैव ।
सम्यक्त्वरूपा निरघा न चेन सा, सर्वोऽपि धर्मो लवणाम्बुसेकः॥१६॥

एतल्लब्ध्वा वमति यदपि प्राप्नुते मोक्षमाशु,
वीजं क्षेत्रे फलति रुचिरे योग्यकालेन सम्यक् ।
सामग्र्यां तु प्रभवति न फलं वीजशून्यं हि जातु,
ज्ञात्वैतत् स्याज्जिनवचनरतो यः स जैनो न चान्यः ॥१७॥

इति षष्ठोऽध्यायः ।

। सप्तमोऽध्याय । (ज्ञानविज्ञान)

ज्ञान स्वरूपमस्य मनुजेऽत्र जैन-
मार्गो यथेंगितविशुद्धमनस्य ।
सर्वात्मनामधिपतिं सकलस्वभाव,
ध्याता तदा स्वकीयगुणिन स्वगानमात्रम् ॥१॥

पीयो यथा प्रकटयेन स्वकमर्थमार्गं,
व्याधिप्रभामनमहो निखिलो हि योध ।
प्रामाण्यधाम पथा विगुणोऽयमात्मा,
हेतून मन्ति मुनयोऽस्य हपीदमुख्यान ॥२॥

अन्य अय न धर्मोऽतमन मलाय,
प्रत्यक्षरूपमयधिप्रमुख तु तच्चा ।
इन्द्रियार्थविषयोद्भवमात्मगुम्,
—अ मति श्रामर्षाह पनोमनमात्रा ॥३॥

फलाद्यादि इलाघाया तु यथा,
गा मन्त्रया मुनिवनोऽवलागवाँ ।
ित्र इय म्यति शिवाय पर प,
ा मम्मवन्यमलाभमयो हि तत ॥४॥

योधस्य स्व यदिो वन्नातृत म,
ाम्नातृणी भवति जीव स्वभाव ।
म यदा या इ मनुमवन्यताप्य,
मवाप्तिो यदि नयति पारिम्लुता ॥ ॥

एकाक्षतामधिगतः पृथिवीमुखेषु,
भ्राम्यन् प्रकर्षमयते तनुजातबुद्धेः ।
जिह्वादिजातमयतेऽथ विबोधभावं,
प्राप्य प्रकर्षनियतं विकलाक्षभावम् ॥६॥

क्रमोऽयमुत्क्रान्तिगतोऽसुमत्सु, ततो मतेर्भित्सु मतोऽयमुत्क्रमः ।
सञ्ज्ञी मनोलब्धिमुपाश्रितोऽक्षै , स्वैः पञ्चभिर्युक्त उदित्वरः स्यात् ॥

स्वबुद्धबोधाय परैः प्रयुक्ता, वाणी पदार्थव्यवहारहेतोः ।
श्रुतं ततस्तत्त्वत ईरितं वरं, शिवादिबुद्धयै भविनां जिनेन ॥८॥

ज्ञात्वा तदुक्तं परमार्थबुद्धं, तीर्थ्याः परे तत् स्वकशासने जगुः ।
अज्ञानवन्तोऽप्यनुकारदक्षा-स्तल्लौकिकं गोचरतीतरूपम् ॥९॥

लब्धे द्वयेऽस्मिन् सुगुणे भवेद्धि, त्रयं समक्षं न विना कदापि ।
त्रयं ह्यवध्यादि क्रमाद्धि लभ्यं, न केवलादस्ति परो हि बोधः ॥१०॥

अरूपिबोधान्न परोऽस्ति बोधो, द्रव्याध्वकालाः सहिताः स्वभावैः ।
ज्ञात्वा समस्तान् प्रतिबोधयोग्या-नाख्यन् गणिभ्यः श्रुतमुक्तमर्हम्॥११॥

श्रोता(त्रा)नुगुण्येन विभक्तमार्हतै-र्द्वयं प्रमाणं तु पुरा समूहितम् ।
मत्यादि पूज्यैः परबोधधर्मै-र्यथैव बुध्येत तथैव वाच्यम् ॥१२॥

ज्ञप्तिर्विमुक्तेषु न युक्तियाभि-र्ज्ञानत्वरूपेण तदेव तेषाम् ।
फलं ह्युपेक्षा भवकेवलानां, मत्यादिबोधेषु फलं ग्रहादि ॥१३॥

जीवादितत्त्वार्थमतिः प्रशस्या, हानाऽऽत्युपेक्षाभिरयेत् प्रबोधम् ।
यतः प्रवृत्तो दुरितं न बध्याद्, यतो भवेत् साधुमतेरसूनाम् ॥१४॥

अङ्गोपाङ्गादिरूपं बहुविधमुदितं सच्छ्रुतं श्रीजिनाद्यै-
स्तीर्थस्याधारभूतं श्रुतधर उदितस्तीर्थरूपो हि शास्त्रम् ।

आचारेषु स्थितात्मा निधिवत्वगतिं यत्त ईष्टेऽन्यनिष्टे,
तस्यास्तेर्न्यत्कृतिर्या भवति जगति वै सा तु मिथ्यात्वरूपा॥१५॥

आचार्योक्तिपदावली गुणवता देयेति शास्त्रोदिति,
सत्रानाऽपि गुणेषु तत्र गदिता काष्ठा त्वपायादिनी।
सा नैवात्र पर श्रुतार्थधरणे, साऽऽवश्यकी धारणा,
ज्ञातैतत्त परमार्थशास्त्रविनयी जैनो भवेत् सर्वत्र ॥१६॥

इति सप्तमोऽध्याय।

। अष्टमोऽध्याय । (चारित्राधिकार)

जैन स्यात् पापभीरुस्तत इह मनुते पापमुक्तान् मुनीशान्,
यो यत्र प्राप्तमोदो भवति गुणपरेऽसौ ह्यवश्य पर तत्।
लब्धेतिज्ञातशास्त्रो गुणकणरहितोऽप्यर्चतीष्टान् मुनीन्द्रान्,
शास्त्रे जैनेऽत्र तस्मादघतनिविरता माननीया परेण ॥१॥

अनादितोऽनुमानय चिनोति कर्मसन्ततिं,
शुभाशुभप्रयोगतोऽव्रताच्च सर्वदा भवे।
विबुध्य तद्विरामभावसाधना श्रिय पर,
श्रयेन्मुनिश्चरित्रभाक् शिवान्तिसाध्यचेतन ॥२॥

चारित्र हि तदेव यत्त परिहरेद्दृष्ट्या क्रिया सक्रया,
शिष्टा योगसमुच्चये न वृणुते या या क्रियास्ता सदा।
रुद्ध्वा त्वाश्रवद्वारसञ्चयममौ सन्निर्जरायुग् व्रती,
म्यात्तीव्रोग्रमदान्तमानसरुचि तद्वान् जिनै स्वान्ययो ॥३॥

चारित्रमाद्दत्य जिनाः समस्ता, उपार्जयामासुरुदग्ररूपम् ।
सत्केवलं, तीर्थनिवर्त्तनां तत-श्चक्रुस्तथैवाद्दतमुक्तिभावाः ॥४॥

मुक्तेर्हि मार्गः प्रवरं चरित्रं, स्वलिङ्गमेतद्धि शिवाङ्गमग्र्यम् ।
जिना न गृह्यन्यदशास्ततः स्व-लिङ्गेन सिद्धिः समुत्सर्गमार्गः ॥५॥

पथि स्खलन्तं वरसेवधीशं, दृष्ट्वा न चक्रे स्खलनानि कश्चित् ।
न यत् स मार्गो निधिलाभसिद्धे-स्तथैव गृह्यन्यदशे विमुक्तेः ॥६॥

पापेभ्यो विरता भवन्ति पशवः सङ्ख्यामतीताः परं,
सर्वेभ्यो न परां चरित्रपदवीमापूर्यतस्तत्र नो ।
इच्छाकारमुखा शुभानुगदिता शास्त्रे यतीनां सदा,
सामाचार्युपपादनं नरभवे तस्या भवेन्निश्चितम् ॥७॥

यत् प्रोच्यते जिनवरैर्गदितेऽत्र शास्त्रे,
सच्छासनं प्रवचनं च सुधावहाभम् ।
चारित्रमेव न परं जिनपाः समांस्तद्,
रक्तान् विधित्सव इदं पदमाप्नुवन्ति ॥८॥

ईर्याद्या विबुधैर्मताः प्रवचने या मातरोऽष्टौ तका-
श्चारित्रं जनयन्ति पोषणमलङ्कुर्वन्ति तद्गोचरम् ।
जातं पुष्टमभिश्रयन्ति चरणं ताः सर्वदा पालनां,
मातं सच्चरणं तदत्र गदिताः सत्याम्तका मातरः ॥९॥

पापाश्रयाणां विरतेश्चरित्र, भवेद्यदि स्यादपयोगवृत्तिः ।
समुद्रवर्ती चरणी हि तिर्यक्, तद्वान्न कायादिमतां सुवृत्तेः ॥१०॥

ज्ञानं सज्ज्ञानरूपं विरतियुतमल नान्यथा तेन युक्ता,
मिथ्यात्वेऽज्ञानमात्रा सदसदुभयगा नैह बुद्धिश्च भोगात् ।

ज्ञानस्यापैतं सदद फलमभिलषित सचरित्र नराणा,
ज्ञातवेद मा भवन्तु प्रवरगुणधरा सच्चरित्रेण हीना ॥१२॥
श्रामण्यपर्यायमधिश्रिता या, सुखासिकोक्ता परिवर्धमाना।
सामन्त्रमेणोपरता तु वर्षात, तका न सोधिकरतोऽश्नुते वै ॥१३॥
ज्ञान तु दर्शनयुत त्रितये गतीना,
नैवास्ति तत्र परम पत्रमिद्धरूपम्।
मानुष्यके नियतमेतदवाप्यते त-
न्नोनश्चरित्रमहिमा जिनमार्गसार ॥१३॥
यद्यपि सवरभेदतयेत, चरण गदित तदपि तपस्तत।
अधिसहन तत्प्रतिपन्नमत्र, केवलमेव न तद् विरतिर्नु ॥१४॥
गोत्र नीचमपैति यच्चरणतो बन्धो भवेदुच्चकै,
प्राप्तो तस्य गवोपम जनततेर्मान्यत्वमभ्यागतम्।
रङ्कोऽयस्य यदादरात्तुलयति स्व चक्रिणा सन्तत,
गोत्र प्राक्तनमथकृन्न हि भवेच्चारित्रलक्ष्म्यावृते ॥१५॥
तीर्थम्यातुल ण्प उर्जिततरो गीत प्रभावोऽसमो,
यत्सवाऽयधिकारयाज्जिनपदेऽस्याऽऽराधनाया स्फुटम्।
ण्योऽह जिनतामवाप सचिरा तन्मे नतिस्तत्प्रति,
तीर्थं तच्चरणान्वितो मुनिगण शेपास्तमेवाश्रिता ॥१६॥
लोकानुभावजनित चरणे महत्त्व,
ज्ञान चतुर्थमुपयाति विना न यत्तन।
लोकेश्वरा अपि लभन्त उपेत्य चारु,
वृत्तसमाचरतु जैनवर सदा तत् ॥१७॥

इति अष्टमोऽध्याय।

। नवमोऽध्यायः । (तपोऽधिकारः)

ज्ञाता जीवा अजीवाः परिहृत उदितस्त्वाश्रवाणां समूहः,
साधित्वा संवरांस्तं नवतरमरुणद् बन्धमार्हन्त्यलीनः ।
यावन्मोक्षं प्रयातुं हृदयमभिसरत्यन्तरा कर्मजालं,
प्राग्बद्धं विद्रवेन्मां न खलु मयि तपस्तत्क्षयार्हं यदि स्यात् ॥१॥

जीवोऽस्ति नैव, नहि यः क्षपयेदघानि,
कर्माणवो यदुदयं सततं प्रयान्ति ।
निर्जीर्यतेऽघमुदितं भविनां मता सा-
ऽकामा, न सा खलु शुभायतिराप्तमार्गे ॥२॥

तत्रापि योऽल्पमुपचित्य बहु क्षिणोति,
सोऽभ्येति कर्मलघुताप्रभवां सुरूपाम् ।
काष्ठां ततः क्रमगतां तु यथाप्रवृत्तां,
लब्ध्वाऽपि तां शममुपैत्यसुमान् कदाचित् ॥३॥

लब्धे शमे परत आचरतीह कश्चित्,
शुद्धेः पदं तप इहात्मसुवर्णशुद्धयै ।
अत्रैव सा भवति कामयुता प्रशस्या,
सन्निर्जराऽव्ययपदार्पणसाध्यरूपा ॥४॥

भृगुप्रपातादिकमाचरन्तो, दृश्यन्त उद्धारहृदो भवाब्धेः ।
प्रेत्यास्ति नैवाश्रयणं त्वमीषां, कुबोधजं बालनिमग्नचेतसाम् ॥५॥

उदाहृतं बालतपः शमादेः, प्राप्तौ बुधैर्हेतुतया यदत्र ।
तदुत्सवादिरिव साधनाप्तौ, क्षमं भवेऽनन्तश आहृतं यत् ॥६॥

तपो भवन्तदुदारनिर्जरा सिद्धये जिनोक्तायसाध्यमुद्धया ।
सूर्यस्य सहस्रान्तय इद्धरूपा, भिदोऽभ्य भाया द्वयधिका न्शैव ॥७॥

अनशनादिमय तप आहत, भवति मोक्षपत्राय शमात्मनाम् ।
अयनयुग्ममिवाऽभ्य भिदाद्वय रवरिवाऽस्ति तपो बहिरान्तरम् ॥८॥

आद्ये पदे पूर्वं पूर्वं, धाय साधोरादौ शक्ते ।
पूर्वं पूर्वं चान्त्ये फलद, पदेऽन्यस्मिन्नान्तरमेतत् ॥९॥

घन प्रसक्त घृनिन नियाग्या, मिथ्याऽनतक्रोधमुखाश्रिताऽङ्गी ।
तच्चेत् क्षयेन्नव तपोऽन्वितेन, सुसवरणाप्यत आत्मनाधा ॥१०॥

ज्ञानान्वितो हि भगवानपवर्गमिद्धिं,
जानाति निश्चयगता निजवे भवित्रीम् ।
तीव्र चकार तप आत्महितैपिभावात्,
काय न जात्वकरण तप एव तद्धि ॥११॥

मोह निनाय नितरा क्षयभावमाप्य,
सर्वाघनाशनपरा क्षयिनीमिहाऽऽलिम् ।
प्राप्यापि केवलमनुत्तमयुग्मरूप,
यावत् पर तप उपैति न विमुच्यतेऽङ्गी ॥१२॥

अबोधितान्वितेन यानि जन्तुना निकाचिता-
न्यघानि तानि भस्मसात् करात्यसौ तपो धृते ।
योऽन्तराकृतिर्द्विधा तनोति तान्महसा,
विनाशमाप्यते गुणो न भेदमन्तराऽहसाम् ॥१३॥

न चेत्तप स्याद्दहनोपमान, प्रबद्धकर्मेन्धनदाहदक्षम् ।
कथ चिरातीतकृताहआलि , क्षिप्येत, मुक्ति प्रगुणेच्च साधु ॥१४॥

तपः क्षिणोति चेदघं पुरा भवार्जितं नहि,
कथं प्रमुच्यते जनः कृताहसां क्रमाद् भुजैः ।
अबुद्धबोधसङ्गतिर्न कर्मनाशमन्तरा,
यथैन आत्मवीर्यजं तपा हि नान्यथा यतः ॥१५॥

ज्ञानं सर्वपदार्थसार्थगमनं यावद्भवेन् केवलं,
चारित्रं विगतातिचारसुभगं यावद्यथाख्यातिकम् ।
आगच्छद्दुरितौघसंवृतिकरं स्थाने कपाटो यथा,
प्राक्चीर्णाघसमूहसल्क्यकरं शुद्धं तपः पावनम् ॥१६॥

सत्यं तपोऽस्त्यसुखरूपमिदं तु किञ्चिन्,
कर्मापसारणपरे मुदितात्मताऽत्र ।
कोट्या ऋणं विनयते ददताऽल्पमेव,
(जन्तुः) लाभस्ततश्च भविता वृजिनौघनाशात् ॥१७॥

सत्यं दुःखं न भवति दुरितोद्रेकशून्यं कदाचित्,
कर्माभावो मनसि समितः प्रेप्सितस्तद्धि धर्मान् ।
यावन्मोक्षो विमलनसहितो जातिमृत्योर्न जात-
स्तावत्सर्वे दधति मलिनं तत्तपो मुक्तिहेतुः ॥१८॥

यावान् कश्चिज्जगति जनितः कर्मजातः समग्रो,
नैवोत्थानं जननविगमयोः पापसङ्घं विना स्यात् ।
मन्ताऽऽपत्तेर्विलयपटुतां सन्दधात्यान्तरेऽस्याः,
कर्माणूनां विलयनपटुता सत्तपस्येव साक्षात् ॥१९॥

मोक्षो भवेद्भवभृतां समये तु यस्मिन्,
तस्मिन् भवेत् तपस एव परानुकाष्ठा ।

लब्धेऽप्यशेषगुणजात इय न यावत्,
तावन्न मोक्ष इति सन्महिमाढ्यमेतत् ॥२०॥

वह्निर्ज्वाला कर्मकाष्ठालिदाहे, मेघो दैवो ज्ञानमुख्याऽऽयमल्पाम् ।
ससाराण शोषणेऽग्नितुल्पौ, निर्बाधार्थं सत्तपोऽस्त्युक्तरूपम् ॥२१॥

भाव शुद्धो विमलमतिमता, मानमप्यादराढ्य,
शम्य शील मदनहृतिकर वाक्पथातीतभावम् ।
वमस्यैषाऽघनिचयहरणी शुद्धगङ्गा त्रिमार्गा,
यात्रास्थान तप इह गदित सत्प्रयागाभमेतत् ॥२२॥

ग्वविध तप उदारधिया प्रशस्य,
मत्वा निरन्तरमिहाचति तद्वतो च ।
इच्छेत्तोऽयुपरताघसमूहमग्न्य,
जन स एव ननु मोक्षपदैकलक्ष्य ॥२३॥

एव नवपदविमला बुद्धि धत्तेऽत्र देवगिदि युग्म,
भेदत्रयमथ सुगुरौ निर्वाणपदैकसाध्यपरम् ।
पूज्या परमपदयुता इमं सहाराधनीयता युक्ता,
धमचतुष्कयुता नवपदी मन्त्र सत्रयेऽजैन ॥२४॥

इति नवमोऽध्याय ।

। दशमोऽध्याय । (जीवाधिकार)

जागर्ति जैनत्वमनुत्तर तद्, यत्राऽस्ति पूज्या परमेष्ठिन पग ।
आराध्यताऽन्या नवपदानुश्रिता, जीवादितत्त्वानि नवैव चित्ते ॥१॥

सर्वेऽप्यास्तिकतां श्रिता मतधरा जीवं परं मन्वते,
षट्कायाश्रितमङ्गिनं यदि परं जैनाः सदा मन्वते ।
संसारं सरतां भिदा दशचतुःसङ्ख्या हृपीकादिगा,
नैगोदान् भवधारिणो गतमितीन् जैनो भवेद् धारयन् ॥२॥

औदारिकादिपरिणामतया तनूनां,
भूम्यादिषु प्रकृतिभेदमपि प्रयाति ।
अन्नादितः प्रभव एव तनुस्तथापि,
नृणां समस्ति नहि चैकविधो गृहीता ॥३॥

क्षित्यम्बुवह्निमरुतो वनकाययुक्ताः.
पर्याप्तभावमयिताश्च परस्वरूपाः ।
एकेन्द्रियाः क्रमगतेः करणाधिकाः स्युः,
अन्त्ये मनोऽमन उदित्वरपञ्चवन्त· ॥४॥

जीवाः समस्ता अविभिन्नरूपाः, सर्वज्ञताद्यैः सहिता गुणैश्च ।
कर्मावृताः संसृतिसारिणः स्यु–र्वैचित्र्यभोगास्तु विदक्षयोगैः ॥५॥

विशेषशक्त्यन्वितजीवघाते. पापस्य बाहुल्यमतो मनन्ति ।
ततस्त्रसानां वधतो विरामो–ऽनिवृत्तपृथ्व्यादिवधस्य योग्यः ॥६॥

नृपाः प्रजारक्षणतत्परा यद्, धनं च राष्ट्रं च तदुत्थमग्र्यम् ।
गवादिकं साधनमाप्यवन्ति, महाजनास्तद्वधकॉस्त्यजन्ति ॥७॥

कुतीर्थ्यसम्भार इहारटेत्तु, त्रसं चलन्तं जीवरूपभाजम् ।
अनोभरैतद्वधपापमन्ता हहा ! परे स्वल्पमुशन्ति जीवम् ।
(बह्वपलापिनस्त्विमे) ॥८॥

वधस्त्रियोगान्वितसत्क्रियाभि–स्तदुत्थमंहः शुचितामुपैति ।
त्रियोगजातात्तपसः प्रभावा–ल्लुब्धाः कुतीर्थ्या धनशोध्यमाहुः ॥९॥

सनऽयघेभ्यो जीवजातघातान्, महत्तर पापमुशन्ति विज्ञा ।
आत्मोपमानेन सुरुक समाचरेत, परेषु चेष्टा जिनमार्गमग्न ॥१०॥
स्वकीयपापेन भवन्ति दु खिता , ससारिणस्तत्र हदुक्तिकायै ।
यस्यास्ति वृत्ति स त्यजति पाप, मत्वेति हिंसाविरतो हि जैन ॥११॥
मषोक्तिमुख्यान्यपि जैनमार्गे, मतानि पापान्यघमोच्यानि ।
पर प्रतीकारनिवृत्तिहीन, हिंसोत्थमेनस्त्वतिदुस्तरान्तम् ॥१२॥
धर्माधिता निमलतेस्विणो जना, स्यान् गुरून वमपानि नित्यम ।
सेवन्त आदृतया त्यघानि यथा प्रदीपान्तमदीपजन्म ॥१३॥
"यस्त्यागि भूत नहि जैनमार्ग, दानादितत्त्व स्वगुणार्पक न ।
निमित्तभावेन गुणान्वित सात फलति सेवाश्रयिणा नराणाम् ॥१४॥
लोकानुभावान्वितभव्यताया, योगात परावर्तमुपेत्य चान्त्यम् ।
आलम्ब्य ज्ञानादिगुरुत्थमयुक्तान्, भव्या लभन्तेऽव्ययधाम जयम् ॥१५॥
कालेन मोक्ष गतवन्त इष्टं , सुसाधनैय ननु ते ह्यनन्ता ।
अतो न तेषा गमितार एव, जीवानसन्तान् मनुतेऽत आप्त ॥१६॥
सूक्ष्मप्रचार प्रलयेन बाध , सय प्रकल्पेन यथा न विद्म ।
कालेन सर्वेण न मुच्यमाना, असङ्ख्यभागभ्रमिता निगोतात ॥१७॥
अज्ञा परे जीवविहिंसनादि-कार्य समुत्पत्तिमुशन्ति धर्म्याम् ।
यत्रापरा ज्ञानसुरुक्चरित्रे जैनाम्नतस्तेऽनघमोक्षगामिन ॥१८॥
मतोऽयो नय जीवो, न च मनुष्यजो, नैव भागोऽन्यमत्को,
नाकर्ता भोगहीनो न च, न च कलितोऽज्ञानमूर्त्या, न चान्य ।
क्षित्यादिभूतवृन्दान न न परभवगो नैव जातो न नाशी,
इत्यङ्ग चतन्यधर्तन जिनपत्परमान जैन आख्याति जीवान ॥१९॥

इति त्रयोऽध्याय ।

। एकादशोऽध्यायः । (अजीवाधिकारः)

जैनः सदा मनुत आत्मविभिन्नरूपान्,
धर्मेतराभ्रसहितान् विविधाणुसङ्घान् ।
जीवाणुसङ्गम इहानुविशेत्तु युक्ति,
मन्येत लोकमितरं क्रमतश्च चेद् ज्ञः ॥१॥

धर्मो गतौ भवति हेतुरिहाङ्गिनाणूनां,
तेषां स्थितौ प्रभववान् इतरो ह्यधर्मः ।
अभ्रं तृतीयमवकाशमथो ददाति,
वर्णादियुक्तमिह नास्त्यपपुद्गलं तु ॥२॥

भवेयुस्त्वणुभ्योऽङ्गिवाङ्मानसादि—
सुसौक्ष्म्यादिबन्धान्तयुक्तास्त एव ।
द्विधा तेऽणवः स्कन्धरूपा ह्यनन्ता,
हि द्रव्यार्थताभेदयुक्ता अनाद्याः ॥३॥

अभ्रे जीवे पुद्गले चास्तिकायेऽनन्ता अंशा एकजीवे त्वसङ्ख्याः ।
धर्मेऽधर्मे पुद्गलेऽसङ्ख्यकास्तु, कालो द्रव्यं मानुषे लोक एव ॥४॥

यच्चन्द्राद्या गगनगमनतश्चारिणोऽत्रास्ति भागे,
यस्तोद्यास्तद्भुव इह मताः कालभागास्तथैव ।
वृत्तिर्नामः कृतिरधिकृता सर्वदा सर्वभागे,
कालस्यैषोपकृतिरपरा केन नैवाद्रियेत ? ॥५॥

प्रतिक्षणोत्पादविनाशनित्या—वस्थास्वरूपं सकलं हि वस्तु ।
किञ्चित् स्वरूपेण पराश्रयेण, किञ्चित्त्वजीवा अपि तत्स्वरूपाः ॥६॥

परे कुतीर्थ्या प्रतिबोधशून्या, नवस्वजीर्णत्वमुखा क्रिया हि।
अर्थेषु सामान्य सकलेषु पश्य-न्त्यपि प्रभान न वदन्त्यनेकम् ॥७॥

सत्त्व सत्त्व जगतीह वस्तु द्रव्यप्रमुरैर्निजपर्यवै स्यात।
पराश्रितस्तैरमत्व नात्र, विरोधभावोऽस्ति विचक्षणानाम् ॥८॥

नामाकृतिद्रव्यपदार्थरूपै , समन्वित सत्त्वमपीह दृष्ट्वा।
नोरीकरोत्येष कथ कुतीर्थ्य , स्याद्वादमुद्रानतिपाति वस्तु ॥९॥

सत्त्व पदार्थे सहज न चान्य-सम्बन्धभावि प्रसिते गुणक्रिये।
तुरङ्गशृङ्गेण समानमन्ये, सम्बध्य तद्वन्तमुदाहुरर्थम् ॥१०॥

विचित्रभावा खलु पुद्गला समे, जीवग्रहे सन्ति त्रिधा प्रसिद्धा।
औदारिकाद्या अमिता परा हि, स्वय क्रियावन्त उमापतेर्नहि ॥११॥

अणो स्वरूप न विशुद्धमन्ये-ऽनन्तभागात्मकमेव दृश्यात्।
तद्वत्प्रदेशस्य न चैभिरुद्ध , कालस्य सूक्ष्म समय कुतीर्थ्ये ॥१२॥

जीवस्य बाध सकले ह्यनुग्रह, क्षम ह्यदृष्ट तदिद तु पौद्गलम्।
आवार्यशुद्धे क्रम आवृतीना, क्षयक्रमे तच्छ्वमात्मभावि ॥१३॥

अजीवशब्द परिदृश्यमानो, नञ्शब्द आहाऽत्र निषिद्धदृश्यम्।
चैतन्यभावप्रतिषेधरूप पदार्थरूप न तु शून्यताङ्गम् ॥१४॥

नित्यान्यवस्थानयुतानि पञ्च, धर्मादिकानि प्रविभक्तिभाञ्जि।
रूपादियुक्त परमाणुमुख्य-मेक स्वय पौद्गलिकस्वरूपम् ॥ ५॥

यद्यपि चैतनविगुणा एते, ह्यात्मन्मेतद्विहास्ति विहाने।
मोक्षपथैकसहायकराणि, नृत्यमुखानि विधकभूता स्यु ॥१६॥

यावल्लोक धर्माऽधर्मौ सिद्धिशिला यावत्तो च,
परलोऽलोकं नहि तद्भावाद् गमन जीवाणूना धावा।

मृल्लेपादियुतं वरतुम्बं व्रजति तले धृतजलनिकुरम्ब,
अपगतलेपं तिष्ठेदुपरि तद्वन्मुक्तो भुवनतलोपरि ॥१७॥

तत्त्वे द्वे जगति स्तः तत्त्वात् जीवाजीवौ भिन्नाभावात.
नह्येतावन्मात्रोक्तौ स्याद्धेयाऽऽदेयविवेकाभावात् ।
मोक्षपथप्रथन, तत उक्ता सप्त सुतत्त्वी तत्त्वार्थोक्ता ॥१८॥

अपेक्ष्यवादः सदसत्प्रवादो, विभज्यवादः परिवर्त्तवादः ।
वादा अनेके जगतीह मूर्द्धिन, स्याद्वाद आख्यद् द्रविणे त्रिकालम्॥१९॥

एवं जैनो जिनवरगदितेष्वागमेष्वेकचित्तो,
जीवाजीवौ मनुजमतिगतौ मन्यते शुद्धभावः ।
एवं साध्यं प्रवरमतिमान् रत्नत्रय्यात्मकं तु,
चित्ते धृत्वा नियतमुदयवान् जैनमायाति मार्गम् ॥२०॥

इति एकादशोऽध्यायः ।

। द्वादशोऽध्यायः । (पुण्याधिकारः)

पुण्ये भेदा भविसुखकृतये विंशती द्वे द्वियुक्ते,
वेद्याद्युत्था यदि च भविनो ह्यानुकूल्ये ह्यपेक्ष्यम् ।
सम्यक्त्वाद्याः प्रकृतय उदिताः सर्वमेतद्धि सत्यं,
जैनो जैनं प्रकृतिसुभगं त्वाश्रयेत् स्यात्पदाङ्कम् ॥१॥

अकामनिर्जरावलाच् चिनोति पुण्यमुत्तम,
निगोदतः प्रयात्यसुस्ततो बहिर्निगोदताम् ।
ततस्ततोऽनुयात्यसौ दशां च व्यावहारिकी-
मुपैति सूक्ष्मबादरक्षितिप्रभृतिभावताम् ॥२॥

अनन्तपुण्यलाभतो ह्यकामनिर्जरावलो-
द्गमैति सकला रमा क्रमाक्षवृद्धिशालिनीम् ।
अनुक्रमेण पञ्चक यदेन्द्रियाणि भवेन,
पुण्यलाभसम्भवेऽधिकेऽत्र मज्जितोद्भवो,
नरत्वमार्यदेशजातिगोत्रधर्मिसङ्गम ॥३॥

य एव यात्यनावृते पर समस्तकर्मणा,
क्षयान्नावृतो भवी भव विहाय चोपरि ।
प्रचण्डपुण्यलाभज यन्नाद्यमश्नुते तनौ,
शुभ तु कीकसाश्रय शिवेऽपि साधन ह्यत ॥४॥

अभव्या अपि प्राणभाजो ह्यनन्ता , समुपेत्य मार्ग जिनेन्द्रोक्तिशुद्धम् ।
प्रहृष्ट समुद्धाव्य पुण्य ह्यगुस्तन् , सुधामोपरिग्रैवेयनिवर्त्तमानम् ॥५॥

अनुप्त चेद् बीज भवति जलगे नैव फलद् ,
शुभेऽप्युर्वीभागे प्रबलतरयत्न कृषिबले ।
तथैवापा प्राप्य (तथा नैवा मोक्ष) प्रचुरतरपुण्य च न्यथता,
सुसम्यक्त्वाभावाद्भवति शमिना तद्गुणभृताम् ॥६॥

यथा यान ग्रामान्तरमुपगते नैव फलद्,
पर तद्धेतुस्तत्तन्नि सुकृतानां सतिरिह ।
न सा म्यान्मोक्षाप्तौ नियतमसकौ कर्मविलयात,
पर सौख्य मुक्तौ भवति निजभावोपगमितम् ॥७॥

तृष्णाया नव वाञ्छा भवति तृप्तिकृते सोद्भवेन्निश्चयेन
धान्याप्ते प्राग जगत्या चिन्तितमनुपम सदृशा पुण्यमेवम् ।
मोक्षाय सच्चरित्रे प्रतिफलमुदिता सत्प्रवृत्तिमितानां,
मत्वैव मार्गसिद्ध्य मनसमभिरता पुण्यभाजोऽप्यवश्यम् ॥८॥

आस्तिकवर्गः सर्वः पुण्यं मनुते काङ्क्षासिद्धये चारु,
अष्टविधा न मता पुनरेषां कर्मण आवलिका ह्यनुमेया ।
जैने धर्मे ज्ञानादीनामावृतिगमनान साऽष्टविधा वै,
पुण्यं तत्राघातिनिबद्ध पापमघातिनिबद्धं कर्म ॥९॥

वेद्ये नाम्न्यायुषि गोत्रे स्युः शुभसंयुक्ता अशुभास्तास्तु.
शुभ्रा नामाद्याः पुण्यात् स्युः पापात्त्वशुभा एताः सर्वाः ।
योगात् कर्माश्रवति प्राणी पुण्यं तस्मान सुन्दरूपान्.
न विरुद्धं निर्जरया यस्माच्छ्रेणि त्यक्त्वाऽनुत्तरजन्मा ॥१०॥

मन्वानाः पुण्यतत्त्वं कतिचन विबुधा मन्वते पापतत्त्वे,
हान्याः पुण्यं प्रकृष्टं परिगतमुदयेऽस्मिँस्तथाऽल्पं तकत्तु ।
नैतद्युक्तं यतो वै परिजनविभवाद्य सुखस्यैक हेतु-
नैतच्चाभावजन्यं न च दुरितहृतेः पुण्यमेतद्धि कुर्यात ॥११॥

पुण्यं त्रिधा मतिमता गदितं त्रिधा तु,
पुण्यानुबन्धजनकं निरवद्यवृत्तेः ।
पापानुबन्धमपरं जनयत्कुदृष्टेः,
श्रीवीतरागपदगादनुबन्धशून्यम् ॥१२॥

अज्ञो नरः फलमुपेत्य भवेत् प्रसन्नः,
पुण्यस्य, वेत्ति न तु पुण्यविकाशहानिम् ।
भुक्त्वा फलं दुरितसन्ततिजातमज्ञ,
उद्विग्नतामुपनयत्यघहान्युपेक्षः ॥१३॥

शिशोर्न जातिर्जनकाद्यभीष्ट्या,
शिशोरभीप्साऽपि न तत्र हेतुः ।

तन्त्वान्हीनस्य न चेश्वरस्य,
किन्त्वेकमेवाऽत्र सह हि कर्म ॥१५॥

आढ्यस्य रोगं रहितस्य कश्चित्, कुले जनिं प्राप्नुत इष्टदात्रीम् ।
परोऽपरस्मिन्नहि तत्र मुख्या, कर्मैव, हेतु प्रतरोऽस्ति कश्चित् ॥१५॥

अक्षाणा पटुताऽऽयुष सबलता शत्रौ जले जङ्गले,
रक्षा सङ्गरसाथजातविपदि चौराग्निघाते भये ।
दुष्टेभ्यो नृपतिभ्य इतिसमितौ व्यालाहिनागोद्भवे-
ऽभेमेऽनायत इष्टितो नरभवे तत्पुण्यमिष्टार्जितम् ॥१६॥

तनोति भक्तिं जनता मुदाढ्या, कुवन्ति विज्ञानिपुण हि पाठका ।
लभन्त आत्मवमुदारनतु , सुखाकर मङ्गलमेव पुण्यात् ॥१७॥

अशुभबन्धानि समलपुण्या-न्याहारयुग्म जिनता विहाय ।
आत्मे निधान शुचिसयमो यत , सम्यक्त्वहेतु जिनतार्जने हि ॥१८॥

पुण्य प्रधान भरतानुजे य-द्बल नृपेन्द्रान्धिक द्वयाऽऽह्वे ।
रूप हि नाकौकस ईहनाह, सनत्कुमार न ऋतेऽतिपुण्यात् ॥१९॥

पुण्यान् पृथिव्यान्य आनुकूल्य, नैयायमिष्टऽतुलहेतुता मधु ।
यस्यान्यो न प्रभवन्ति तस्मिन्, मोक्षस्य मार्ग च सहायिताऽस्य ॥२०॥

मनीषवेत्तार ज्ञारभावा , सर्व समाना परमन्यपुण्यम् ।
जिनेश्वराणा निखिलोक्तिमार्ग, वाणी जने सशयभेत्क्षमा ॥२१॥

अतीर्थपा यद्यपि साधुवृन्द, प्रभाचयत्वेव पर प्रवाह ।
व्याप्येह तीर्थं जिनराजभूता, प्रभाव एवोऽमलपुण्यमर्हते ॥२२॥

मैत्रीमुदितोकरुणोपेक्षा , सत्त्वाऽधिक-दु खि-कुपात्रे
धर्म्यं शुक्ल जिनशुक्लमेवा, पुण्यान्दान्युपकृतियुग रक्षा ॥२३॥

सम्यक्त्वं चरणं विनयाद्यं. वैयावृत्त्यं सह पाठाद्यैः ।
यान्यर्हत्पदकारणभूता-न्यर्हत्पूजादीन्यमितानि ॥२४॥

यद्यपि पुण्यापुण्यक्षयतः, साध्या मुक्तिः शासनशस्ता ।
तदपि च जिनपाऽऽदेशाः पुण्ये. कारणभूता न पुनर्दुरिते ॥२५॥

श्रेणिक्ष्यायाः प्रकृतयः पापाः, सर्वत्रास्ति क्षय आप्तोक्तौ ।
... .प्रतिपदमेनोवृन्दस्यार्थः ॥२६॥

कषायतो भवति कर्मणां रसे, बन्धने विमात्रया सदाङ्गिनाम् ।
तदुक्तिरेनसो रसेन पुण्यगे. सन्दताऽनुगो रसोऽत्र गीयते ॥२७॥

निर्जराकृते कृतान्यशेषधर्मसाधना-
न्यबन्धकानि सन्ति नो परं तदर्थिताऽत्र न
शुभोऽपि पुद्गलाश्रयो निमित्त्यपीष्यते नहि ॥२८॥

जिनेन्द्रवाङ्मयेष्वघानि निन्दितानि विस्तरात .
कृपापि पापमाश्रितेषु दुःखितेषु सम्मता ।
पुद्गलैः सुखं भवत् प्रशस्यते क्रियादरे,
फलं वृषस्य मुक्तिवत् सुरालयोऽपि शस्यते ॥२९॥

मुक्त्यर्थमुद्यतमतिर्यदि सावशेषा5-
दृष्टो भवेत् सुरनराधिपऋद्धिपात्रम् ।
अत्रैत्य मुक्तिमपि साधयति प्रधानां,
मत्वेति पुण्यपथभृत्तु भवेत् स जैनः ॥३०॥

इति द्वादशोऽध्यायः ।

। त्रयोदशोऽध्याय । (पापाधिकार)

जनो भवेत् सकलकालमपायभीरु-
र्नापायान्ति भयतोऽनुगता अपाया ।
नैमित्तिना न भवति प्रलयो निमित्त-
नाश विना भवति सोऽपि च पापभीरु ॥१॥

यद्यप्यनिष्टफलद सकल हि पाप,
तत्त्व तथापि यदिद प्रचुरास्रिलस्थम् ।
बाधाकर जगति मोक्षविधौ च नित्य,
नाज्ञातमुज्झति न च प्रयतेऽत्र लाभ ॥२॥

पापोपभोगमरिते ऽयमहारवाशौ,
पर्याप्तिहीन उदितेऽघफले भवेद्धि ।
यद्य परापरदशासु सदोपभुङ्क्ते,
पापानि तत्फलयुतानि भवेऽखिलेऽत्र ॥३॥

भवदक्षामनिर्जरानलान्वयस्य सञ्चयो,
भवेत् नैव पुण्यवत पाप्मना विरोधिताम् ।
विशुद्धसाधना नरा न सन्शुद्धसाधना,
यन्धनेऽपि नानयोर्विरोध इष्यते बुधै ॥४॥

यतोऽनुसार्यं पुरातनाद्मा सञ्चोदय,
सम तु पुण्यपापयो न केवलस्तु कस्यचित् ।
बन्धके कषायितेऽयमिष्यते सपापक,
चरमयोगिन समेत्युच्य गनसा पुन ॥५॥

पापं स्वतन्त्रमणतीह्न च वावदूकः,
कश्चिद्वदत्यपि च पुण्यपदार्थसंस्थे ।
अल्पेतरत्वं उदितेऽघचयः क्रमोत्थ-
श्चिन्त्या नु तत्र विपरीतपदार्थभूतिः ॥६॥

पुण्यस्यास्ति निबन्धनं शुभतरा योगाः शरीरादयो,
मन्दत्वं च कषायसन्ततिगतं पापे परे हेतवः ।
बन्धोऽस्याशुभपुद्गलाऽन्दनभवो योगादनिष्टात पुन-
र्मिथ्यात्वाऽव्रतकोपनादिसहितात्यावत्कषायोदयः ॥७॥

स्थानानि पापस्य मतानि विद्वै-रष्टादश प्राणवधादिकानि ।
आद्यानि पञ्चाऽत्र तु हेतुकार्य-स्वरूपभाञ्जीनि पुरा त्यजन्तु ॥८॥

स्वाभाविका नहि मताः सुगुणाः कुतीर्थ्यैं-
र्ज्ञानं दृशिश्च चरणं भवभृत्सु मोहात् ।
तन्नाव्रतीरनुसृता गुणसङ्घहर्त्र्यं(र्त्री)-
स्तत्तत्त्वभूतविभूतिर्न मताऽऽत्मनोऽन्यैः ॥९॥

विचित्रतैषां परमेश्वरे वित्, स्वभावभूता करणाद्यभावात् ।
सैवाऽऽत्मनीष्टेन्द्रियसार्थसिद्धा, न तत्त्वतश्चेतन इष्ट आत्मा ॥१०॥

नातीन्द्रियार्थमतिभिर्विततानि तेषां,
यद्दर्शनानि, तदिमेऽपलपन्ति वस्तु ।
घातीनि किं निजमतौ दधते ह्यघाति ॥११॥

सप्तभिराढ्या चत्वारिंशन्, न मताऽघांशानां तैस्तीर्थ्यैः ।
न च तन्नाशपरोद्यमकथनं, ज्ञंमन्यानां नहि तच्चित्रम् ॥१२॥

तद्वेदन हि विदित नैतत्, यत्नातीन्द्रियवेद्यात्मा स॰ ।
जिनपा सकलज्ञास्तद्विविदु-र्निन्युर्मोग तद्घातोत्थम् । ॥२३॥
पापापहृतौ शक्र मार्ग, विदित-जगतीजनहितकारम् ।
सम्यग्दर्शनबोधचरित्रै-र्युक्त स्वात्महितैषी श्रयते - ॥२४॥

पापाना यन्निदान वधविरतियुत न्यर्थयागादिहान,
विज्ञायाचायपार्श्वे तदकरणविधौ मन्यजेत् सर्वथा तत् ।
हत्वा सर्वथा यत परिहृतिरमला शङ्कनादौ गताना,
त्यक्त्वा पापौघमेव स्वगतमुदयते रूपमात्मा स्वभावात् ॥२५॥

पुण्य च पाप च न तत्त्वशास्त्रे, तत्त्वे पदे नैव विचारिते यत् ।
बद्ध परावर्त्तयतेऽपि पुण्य, क्षमादियुक्त सुकृत च तद्वत् ॥२६॥

तथा स्वरूपेण विपर्ययेणा-नुभूयते कर्म सम द्विधाऽपि ।
प्रवेद्य पाप तपसा विनाश्य, द्विधा भवेन्निर्मल एव आत्मा ॥२७॥

परस्पर सङ्क्रमभावभाजो, मूलात्मिका खलु कर्मभेदा ।
अन्यच्च जीवान्य आत्मभेदा , परस्पर युग्ममिद न चैवम् ॥२८॥

मिदा या मता आस्रव बन्धने च, ता एव भक्ता द्वयेऽस्मिँस्ततो न ।
प्रतीत्य भोग प्रतिघातशून्य, सम्यक्त्वमुख्या सुकृतेऽपि गम्या ॥२९॥

आत्मस्वरूपे प्रतिबन्धकत्व-मपेक्ष्य पापेऽधिकृता मुनीद्रा ।
सापेक्षभावे हि विरुद्धता-न, विरोधनोपप्रतिपादिनी स्यात ॥३०॥

शुभा पुद्गला पुण्यरूपेण जीवै-र्य आत्तास्ते पुण्यमन्यत्तु पापम् ।
चयो योगत कर्मणा च स्वभावो, यथा काययोगाद् बहि पुद्गलानाम् ।
मत नो भूत नो न चोक्त तथापि, पुराणस्य पाकेऽतिरिक्तोऽयमन्दैन् ॥३१॥

बन्धोऽघानां विरमति यदा रुध्यते तद् गुरुभ्यो.
ज्ञात्वा रूपं विरतिनियमं धारयित्वा त्यजेज्ज्ञः ।
नामाक्षिप्तं भवति जनता गोविधानेषु तेन,
सत्यङ्कारैर्विहितशपथैस्तोषमानेय आप्तः ॥२२॥

सूक्ष्मत्वं स्थावरत्वं विकलितकरणं कायपार्थक्यहानि-
र्दौर्भाग्यं दुःस्वरत्वं स्थितिरहिततनुर्वाक्यमादेयशून्यम् ।
अङ्गोपाङ्गादिघातं गतयश उदिति सर्वमित्यादि पापान्,
मत्वा सुज्ञो विरज्याज् जिनमतनिपुणो जैन एनःप्रयोगात् ॥२३॥

यथाऽऽकरोद्भूतगुणप्रशस्यान्, महार्घता मौक्तिकमालिकायाः ।
तथैव पूज्यो नर उच्चगोत्रा-द्विश्वेऽनुपूज्योऽस्ति परप्रभावः ॥२४॥

दृश्यन्ते जगतीह सौख्यधनिकाः शून्या वरैः साधनै-
स्तद्युक्ता अपि दुःखभारकलितास्तत्स्फूर्जितं वेद्ययोः ।
सद्द्रव्ये वरयाचके न वितरेत् प्रेस्यं लभेतापि नो,
वीर्ये भोगयुते भवेद्विमथनं तद् दुष्कृताज्जन्मिनाम् ॥२५॥

लोके लोकोत्तरे चाध्वनि परिहरणस्यार्हमेतन्न शङ्का,
लोकास्तत्त्वार्थमुक्ताः परिभवपदवीं पापिनः प्रापणीयाः ।
आत्थेति क्रोडयेदं प्रभुरभिनयते पुण्यपापक्रियासु,
विश्वं तल्लोकसङ्घः कपिवदभिधरत्येष चेष्टाऽसमर्थः ॥२६॥

चिन्तयन्ति नैव ते दयोक्तयोऽतथाभवा,
व्यथोद्धुरे भवेत्पदं कृपालवस्य सा परम् ।
पुराणपापपाकजाऽपरं च निर्दयः प्रभुः,
करोति जातमङ्गिनं महाव्यथाऽर्भकादिषु ॥२७॥

पुरातनस्य कर्मण फल भवदयज्जनो,
नवीनमन्दतीह पापमेव दीर्घकालिकम् ।
ततो विधातृतेशितुर्न शोभते मता राणे,
न चेश्वरे पद भवेद्भवस्थजालकौचित,
तदेतदुक्तमर्हता विमुच्य फल्गुवादिमि ॥२८॥

जैना ब्रुवन्ति जगतीसकलासुमत्सु,
मैत्र्या यत्न भुवने दुरित न कोऽपि ।
भो ! सन्दधातु, यदि चाऽऽहृत पाक् तथापि,
धर्मान् प्रणाश्य फलवेदनभाक् तु माऽस्तु ॥२५॥

मायानुकम्पनयुता मनसा स्पृहन्ते,
यन्मुच्यता जगदिद सकलाघमारात् ।
नास्तीह यद्यपि समस्तजनस्य मुक्ति ,
सम्बन्धिजीवनपरोक्तिरिवेह योग्यम् ॥३०॥

यन्मुच्यते मनुजभावगतो हि जीव-
स्मिन् सतीह जगतीतरसत्त्वसत्त्वम् ।
आवश्यक, न च भवन्ति समे मनुष्या-
स्तन्नास्ति सम्भवि पर करुणोक्तिरेषा ॥३१॥

जन स्यात् सो विधिविधितोऽघाघमीत पुरापि,
लब्धे धर्मे प्रचुरकरुणासङ्गतेर्धर्मत्री ।
मान्योऽस्य स्याद्विविधविधिना हिंसनाघादिवर्जी,
देव साधु प्रवचनरतो धर्मधुर्योऽन्ययार्यो ॥३२॥

इति त्रयोदशोऽध्याय ।

। चतुर्दशोऽध्यायः । (आश्रवाधिकारः)

वेद्यते सकलजन्तुभिर्भवे, कलां कलां प्रति सुखं व्यथान्वितम् ।
कर्मणामुदयतो. न चाप्यसौ, बन्धमन्तराऽऽश्रवानृते न सः ॥१॥

जैनो मनुते तत्त्वावल्यां, तद्योगानाश्रवहेतूनग्र्यान् ।
आश्रवभेदौ द्वौ शुभमङ्ग कायोक्तिहृद्योगद्वैध्यात् ॥२॥

दुःखे च सौख्येऽसुमतां समस्ति, यथानुभावः सततं निजऽङ्गे ।
तथैव बोधावरणादिजाते, स्वभावरोधाद्विदुषाऽभिमान्यः ॥३॥

सुखद्वन्द्वमाविश्चकास्त्यात्मनोऽन्त–स्तथैवात्मबोधादिनाशात परागि
विपाकप्रविष्टानि विज्ञस्ततोऽष्ट–कर्माणि मन्वान उदारदर्शी ॥४॥

एको वधो हेतुफलानुयोगी, चेत् त्यज्यते, त्यक्तमघं हि सर्वम् ।
स्वरूपहिंसा प्रथमं हि पापं, भिन्नानि मिथ्योक्तिमुखानि तस्मात् ॥५॥

मुनिर्भवेत्सर्वत एनसो वृजौ, क्षमो, ह्यशेषा न पुनस्तथा क्षमाः ।
अभ्यासधामान्य आप्तवर्या, अणुव्रतानीह परेषु रान्ति ॥६॥

तथाऽत्र शेषाधविलोडनाय, मतानि पञ्चाश्रवद्वारि विज्ञैः ।
योगाः कषायाः करणाव्रतानि, तथैव शास्त्रेण प्रणोदितानि ॥७॥

जीवा बध्नन्ति कर्मोदयमनु सदृशं तद्धि वेदाश्रवेषु,
भागोऽपीष्टोऽत्र कर्मस्थितिमितिसदृशो योगमानाः प्रदेशाः ।
प्राच्यैः क्रोधादिभिस्तु भवति रसचयस्तन्न भेदोऽस्य बन्धात्,
बद्धं कर्मानुभाव्यं न च परजनितं ह्याश्रवास्तन्न योग्याः ॥८॥

कर्मवेदनं भवेद्यथाकृतं पुराङ्गिभि–
स्तदाश्रवा न तत्त्वगा भवेयुराप्तसङ्गिनाम् ।

कुतुसायभेद एव चेत्तदा न मशयो,
न जैनमार्गगा नरा श्रयन्ति जातुचिद् बुधा ॥९॥

न चास्ति जन्तुजात एव एक एव सम्भवो,
यतोऽङ्गिना क्षण क्षण नरा नवाऽस्मि भावना ।
भवन्ति वीर्यशालिनोऽङ्गिनोऽहँमागगा पर,
पुरातन घन विनाश्य युयतेऽल्पमेव तत् ॥८॥

प्रज्ञयतऽबुधोऽपि विज्ञसङ्गतो बुधीभवन,
प्रनायते जडोऽपि बुद्धिमाननिष्टसङ्गमात ।
यत्ना तु धर्मसाधनानुसारि कर्म नूतन,
नाऽस्तिलोऽपि धर्मवाह ईप्सणीयो सुधोदित ॥९॥

निमै मनाऽन्तरमुपैरुद्यागतानां,
प्राप्तर्मणा प्रतिपद क्रियते निरोध ।
आचयतेऽघात्तय यिरिधो हि धम ,
सर्वं तदय प्रयगात्मकना द्वयोश्चेा ॥१०॥

ज्ञानादिघातकरणप्रवणा हि योगा,
ज्ञानादिघातपरसम्भृतीर् दधाना
पूय पूत दुरितमाप्तचय दुरन्त,
गुयन्ति ता प्रथमिद मतमाश्रवाख्यम्
[हेतुममुमाश्रयते प्रयत्नम्] ॥११॥

मुक्तय निरोधण आश्रवेश्य रुद्धौ,
सयमोऽथ सद्भय क्षयोऽथ दमणा तप ।
सवृणाप्यते यदा तु पापशून्यलाऽखिला,
पुराणकर्मनिचय सलाऽस्य पद यदा ॥१२॥

ततोऽवधानमाप्यतां सदाऽऽश्रवावरोधने,
न तद्भवेद्विनाऽऽश्रवावधानमन्तरा पुन-
र्भवेत्तु तच्च शास्त्रकृच्चदाऽऽश्रवान् विबोधयेत् ॥१५॥

अकामनिर्जरागुणाङ्गभन्त आर्यमार्गगा,
उदित्वरां दशां न सोऽन्तराश्रवप्ररोधिताम् ।
क्रमाच्छमित्वमाप्यते ततः परम्परा शुभा,
ततोऽवमान्यते बुधैर्न भिन्नताऽऽश्रवाश्रिता ॥१६॥

भवेन्नरोऽत्र धर्मभाग् यदीष्टमार्गमागतो,
निरोधने सदोद्यतो वधादिसङ्गताश्रवात् ।
जिनोऽप्यशेषबोधवान् सुदीर्घकालरोगयुग्,
न चान्ध आत्तवान् विकर्मिकं द्वयोद्यतः खलु ॥१७॥

आश्रवे पुराणकर्म जन्तुना निकाच्यते,
ह्रस्वकालमिर्यते प्रदीर्घकालभावितम् ।
महारसं नयेत्परं बहुप्रदेशमल्पकं,
यतो निरोधनेऽस्य तु प्रधारयेद्विपर्ययम् ॥१८॥

जीवोऽनीशोऽयमात्मप्रतिनियतविधौ सौख्यदुःखैकहेतौ,
प्रेर्योऽसावीश्वरेणाशुभशुभकृतये हीत्थमाहुः कुतीर्थ्याः ।
तेषां वार्त्ताऽऽश्रवाणां न भवति सुखदा कर्णयोः श्राव्यमाणा,
स्यादेषा कर्णरन्ध्रेऽमृतरसतुलिता येन दासत्वलीनाः ॥१९॥

यथाऽऽतुरो वैद्यनिवारितोऽपि, जानन्नपथ्यं परिहर्तुमिच्छुः ।
रसेप्सुरत्त्यन्ध उदस्तवीर्य-स्तथैव जीवः सुखकाम्यघेषु ॥२०॥

श्रुत्वा कर्णरसायन यच इन्द्र य अद्यीताश्चवान,
क्रन्ध्याद् दुष्कृतवारिवे समगुणान् मत्वा जिनेन्द्र यच ।
म म्यादात्मनि गुप्त उत्तमतिको धर्मान्तोऽनेकश,
म्याच्चासौ वर जैन ग्य नितरा गन्तेनाराधताम् ॥२१॥

ग्तज्जैनम्य शुद्ध निगतिगदित सर्वशास्त्रैरमार,
ह्येया ससारवासे प्रतिपन्मदनादिध्वस्थास्वपीह ।
पापानामाश्रया ये हन्यतनुवचोभिर्धान्येषु ये स्यु,
क्षोधान्येषु प्रयुक्तैन भवति परथा भावजैनन्यमुच्चै ॥२२॥

इति चतुर्दशोऽध्याय ।

। पञ्चदशोऽध्याय । (सवराधिकार)

मन्याज्जैन शुचितरमुदित मवर तत्त्वभूत,
पाप यस्माद्विगतिकरणात्तरेणेति नित्यम् ।
मिथ्यात्वाद्वा मननविषय नैव ता सदधीरन्,
यस्मात्तेषा न भवति दुरित पापकार्ये प्रवृत्ता ॥१॥

जगति जैनवृषान्परे वृषा, करणमाग्रजमाहुरघ परम् ।
अविरता यदि पापमपाग्यते, कथमनाग्भवे विकलेन्द्रिय ? ॥२॥

सुप्तो यथाऽभिमरको विगतक्रियोऽपि,
छिद्र प्रवीक्ष्य वितनोति परस्य घातम् ।
जीवास्तथैव रहिता क्रिययाविरत्या,
पापप्रचारमुदितेऽमरेऽपराद्धा ॥३॥

निरोधः सर्वेषां मुनिभिरुदितः शास्त्रविधिना,
परित्राणायाऽघान् सततमुदितादाश्रवकृताम् ।
परं योगाः पापा वधमुखगता रोध्यपदवीं,
गता रोध्या विज्ञैर्निखिलदुरिताव्यूहविकृते ॥५॥

मगद्धयत्रता[न्यत्रता]न्युग्रपापानि साधु-
रुद्धा निरुद्धा भवेयुस्तु योगाः ।
कषाया ह्रषीकाणि रोध्यानि पङ्क्तौ,
भवेत् सा तु मध्ये मुहूर्त्तस्य साधोः (जन्तो) ॥६॥

विवेको हि तेषां यतो यत्न एषु.
विपक्वेषु कार्या कृतेर्निष्फलत्वम् ।
प्रवृत्तिश्च तेषां यथा नोदयः स्या-
दिति प्राप्तधर्मा निरुन्ध्याद् वधादीन् ॥७॥

ईर्यासमितिषणाऽऽत्तिक्षिपति-परिहरेत्पूयतो योगकार्यैः-
गुप्तो वाक्कायचित्तैः क्षमणप्रभृतिभिर्धर्मभेदैर्धृतात्मा ।
क्षुत्तृड्मुख्या विबाधाः सहत उदयगा भावयन् भावनौघं,
चारित्रे चारुरूपे चरति दुरितह्रासं कृतोऽवश्यमेषः ॥७॥

एवं योगेषु शुद्धेष्वनुगतसुविधिः साधनं चारु वत्ते;
श्रेण्याः कर्मक्षपण्या यदि परमनणुः कर्मभारश्चिरत्नः ।
सर्वार्थान्तेषु देवो भवति स सुयतिर्भाविभद्रो विशेषात्,
सर्वाज्ञापूर्णवंशे जनिमुपसरिता सिद्धिमेता ध्रुवं सः ॥८॥

यद्येषोऽनल्पकर्मा परिपतति वृषात् संवराद् दर्शनाच्च,
नैवासौ संस्मृतौ स्याद् भ्रमणमनुगतोऽपार्धवर्त्तीधिकं तु ।

उत्पद्येताऽयमेनोनिचयमनुगतो जातु साधारणत्व,
निर्गत्याऽमात्त प्रयात्यखिलगुणरुचितामेति नीत्र शिव स॰ ॥५॥

नालम्भूष्णु सकलविरतये भोगसक्तिभ्रमङ्गाद्,
रक्तस्तस्या विरमति स पर दृशतो हिंसनाद ।
शुद्धये तस्या गुणगणभृतो दिग्व्रताद्यिर्यो म,
प्राप्यै सम्यग मुनिगुणनिचिते साम्यमुरय चतुष्कम् ॥८॥

यत्रायेव द्विकन्दानियमा श्राद्धधुर्येषु योग्या,
तत्रैव स्यान्नुयमवरणान्नीप्सितोऽणुव्रतिये ।
तेनान्यपा सुखरक्षनये पौषधे नेष्यते तद्,
मिथ्यान्ष्टो धरति मुनिवृति सानुता नैव यद्वत् ॥८॥

य स्यात सम्यक्त्वमात्रो निगममनुस्मृत शुद्धचार्त्रि ,
सम्यक्त्वे मोहनाशान्न च धरति यम दक्षिणो द्वादशानाम् ।
दह गेह फल्र द्रविणमुत्य प्रेक्षते नारहीन,
प्राणान्तेऽसौ न जह्यात मुरततिविहितेपूपसर्गेषु साम्यम् ॥८॥

अणुव्रतानि धारयन् सैव मुनते रतो,
यत्र यत्र क्षणो भवेत तदा तत्र स नित्यश ।
चतुर्विधऽपि पौषध च निश्चयात्तु पञ्चमु,
नितान्तमाश्रितो भवेच्छुतादिकार्यसिद्धये ॥८॥

स इत्वराणि धारयेत्तणुव्रतानि च पुन ,
परम्परा समाश्रयेन्न श्रुत तु यावदस्थिताम् ।
गुणेषु शिक्षया युतेषु काल इष्यते लघु-
र्वरण समाश्रये तु सावस्थिता भवे ॥८॥

दुःखित्वान्नरकाश्रिताः परकृतं तन्त्रं वहन्तः पुन—
स्तिर्यञ्चोऽमरतां गता अपि पुनः सामर्थ्ययुक्ताः समे ।
स्वीकुर्वन्ति न सर्वसंवरविधिं वाचः क्षणे साधनान,
तन्नैकां नरतां विना क्वचिदपि स्यात संवरः सत्तमः ॥१५॥

धर्माचारधरः सदाऽनुमनुते पाथेयमामुष्मिकं,
देवाचार्यसुकृत्यपूजनविधौ शुद्धा भवेद् या कृतिः ।
तीर्थानां परिपेवणा, वृषवतां भक्त्या समाराधना
याऽन्ते स्याच्च समाधिना मृतिरिति प्रध्वंसि शेषं पुनः ॥१६॥

जीवेषु क्लेशवत्सु व्रजंति करुणया रक्षणे सत्प्रयत्नं,
यस्माद् दुःखान्वितेषु प्रयतत उदिते ह्यार्द्रभावोऽवनाय ।
यत् तच्चिह्नं प्रसत्तेरधिकृतसुविधेर्भावसम्यक्त्वजाते—
र्ह्यं तल्लक्षणं चेतरमिपचयतो जैन वंशे विशेषान् ॥१७॥

सुसंवरास्ते यदि भावनाभि—र्यदात्मना स्वाभिरनुश्रिताः स्युः ।
महाव्रतेषूद्यतधारणायां, यथा तथाऽणुव्रतधारणायाम् ॥१८॥

सदा प्रतिज्ञा सुकरा सतां स्या—न्न पालना सद्वृषमाश्रितेष्वपि ।
योगास्ततो धर्मपरैरमूभिः, सद्भावनाभिः सततं प्रवर्त्याः ॥१९॥

योऽणुव्रतानां यमिनां समक्ष—मागूं विधत्ते भयतोऽघसन्ततेः ।
दिने दिनेऽसौ मुनिताधिगत्यै, प्रतिव्रतं संस्कुरुते ह्यमूभिः ॥२०॥

महाव्रते स्युः सततं समुद्यता, ये तेऽप्यमूभिर्न निजं वसीरन् ।
आसूर्यकाद्याभिरुपासयेयु—र्द्विधा विहारार्हसुभावनाभिः ॥२१॥

सुसंवृता विप्यति नैव मृत्यो—र्यतो यतानां सुगतिः पदाम्बुजे ।
विमोहतः शोकमुपैति सक्तः, क्षणः परः सोऽनघजीवितानाम् ॥२२॥

न जीवन स्यु प्रतिबद्धभावा, यथायुरेवाणनमङ्गिना यत ।
क्षणो हि धर्मस्य पर दुरापो, मत्वेति रत्नत्रितयाराधना ॥७३॥

भाग्य समं मद्धन्ये रिपौ च, स्वर्णे तृणे चाऽऽत्मसुखणयो पुन ।
भवे च मोक्षे च विभाग्य मार्गं, मनगनैराम्यपर निजेप्सितम् ॥७४॥

परे समस्ता प्रसृता हि धर्मा, वदन्ति दौर्गत्यगमोन्तिानि ।
दु खानि वैराग्यकराणि जैन-श्चतुगतीना तु भयानि वेत्ति ॥७५॥

निभेति सर्वाऽपि भयाश्रितोऽङ्गी, मृतेन सोऽपैति भयाद् निभीत ।
सम्यक्त्ववास्तूज्जननाद् यतस्त-न्निवायमेतच्च विना न मृत्यु ॥७६॥

ध्येय सतत्परिसवृताना, कला ह्यसङ्गो दध (वस) ल्पवास ।
मलाक्तस्नेहो भ्रमरोपमाना, चया कला सद्वरसश्रित श्रये ॥७७॥

सदा त्रियं गुरो कुले निवास आर्हते मते,
गणाधिपास्तथान्विधा अपि श्रुत पद जगु ।
अभिन प्व तद्बहिर्गतैस्तु मोहतस्कर-
स्तन्नाशयाश्च तद्विधास्ततो गुरो कुल श्रयेत् ॥७८॥

यद्यपि दहो गुणकुलयुक्तो, मोक्षपदावह उत्तमुनीनाम् ।
तत्पि निराबाध पदमेतु, न्युत्सृजतीह सम मुनिरन्ते ॥७९॥

आजीवितार्द्धर्मपरो हि जैनो, रत्नत्रयाराधनया कृतार्थ ।
तत्त्वत्रयी मानसकोशस्थो, सदा दधत् प्राप्स्यति शाश्वत पदम् ।
(मग्न सदानन्दपरे समर्त्ये) ॥८०॥

इति पञ्चदशोऽध्याय ।

। षोडशोऽध्यायः । (बन्धाधिकारः)

जैन. सदा भीतिधरोऽघबन्धान, मुमुक्षतां निर्मलचेतसा धरन् ।
प्रतीयमानोऽङ्कमुदारभावाद्. मुक्तेरबन्धं भविना तु बन्धम् ॥१॥

आश्रुतं यदाश्रवैरदृष्टमात्मनाऽऽत्मसु,
विकीर्णमेव चेत्तकन्न यात्यदो भवान्तरम् ।
क्षीरनीरवत्पुनर्भवेन तकत्तु सङ्गतं,
फलेत्तदा भवान्तरेपु विपाकसाधनानुगम् ॥२॥

परिश्रवा भवन्ति ते स्वरूपतोऽपि संश्रवा–
श्चटन्नपैति यान् सितान् शुभात्मभावुकाशान् ।
पतन्नपीह तान् प्रयात्यसौ भवी न संशयः ॥३॥

धर्मसाधनोद्यता नराः सदा भयानकान्,
पराहरन्त आश्रवांस्तथापि सम्प्रयान्ति तान् ।
देवसाधुधर्मभक्तिकारणात्तदा शुभान्,
विधाय प्राक्तनं दुरितमुद्धरन्ति तत्क्षणे ॥४॥

प्रकृतेर्बन्धं योगाः कुर्युस्तनौ यथा धातवः,
पूर्वैः सदृशास्तेपा देशास्ततो नहि सार्थकम् ।
बन्धनतत्त्वं यत्तद्बन्धो भवेदमुतोऽखिलः,
स्थित्यास्तेपामनुभावाच्च क्रियाननुबन्धतः ॥५॥

योगकरणावधि श्रयन्त्यमी, आश्रवाः सयोगितान्तमाश्रिताः ।
सम्परायिकी समाश्रिता नराः कपायितानुगास्तावदेप तु ॥६॥

यदपि च योगा आत्मायत्ताः परं गृहिताणुषु,
अपरसमुत्थाः सर्वेऽप्येते भवन्ति कपायकाः ।

परतोऽतस्ते विकृतिं कुर्युं परेप्वणुपूदिना,
आश्रवबन्धनयुग्मे स्पष्टो भेदो जिनवाटमते ॥७॥

आयुष प्रतिभव विभिन्नता, बध्यते भवेऽपि सकृदेव हि ।
परापरायुषा यत्नोन्यो भवे, क भव बध्नति जीव आत्मना ॥८॥

नाऽय नैव पदार्थवस्तुममित सत्त्व कदाचिद् भव-
नाशो नैव च सत्त्वधारणपटोरथस्य विश्वत्रये ।
यत्नो वस्तु जगत्त्रयेऽपि भवति प्रक्षीणसत्त्वं नव
तज्जीवोऽयमनादिकाललिलितो नाबन्धन सोऽपि च ॥९॥

प्रहीणकर्मा न करोति कर्म, नव्य न चाक्रमण आप्तिरस्य ।
सर्वज्ञताया रहिता अमी ,तद्-भावनाश्चनु कर्मसयुता ॥१०॥

जीवो ज्ञानमयो नहि स्पधद्धो दुग च सौख्य सदा,
पर्यायेण भजन भवान्तरति प्राणग्रधानो भवे ।
त नादीन स्वगतौ गतान स्मरति चायाति प्रकृष्टऽन्तरे,
गोत्रे नानमुरुगुणरनुगत कि नाष्टबन्धो भवेत् ॥११॥

यथा रसास्तु कर्मणा स्थितिस्तथव यद्वय,
कषायत प्रजायते भवेऽङ्गिन प्रतिक्षणम् ।
न्द्धा गुणा यद्वात्मना न हानिमाश्रयन्त्यमी,
रसैम्त्वनल्पवर्तिना स्थितौ रसानुगामिनी ॥१२॥

विचारयति चेद्बुधा रसे स्थितौ च कारण,
न घातिकर्मणा स्थितौ रसे च दीर्घकालिके ।
यत शमे च वारका शुभेऽन्यतीर्थिका ततो-
ऽयो प्रतीर्थिका स्थितिमता बुधै श्रुतोद्धृते ॥१३॥

एकशो विधाय पापमेत्यनन्तकालतो,
महत्प्रदीर्घकालिकी स्थितिं तनोति तत्तथा ।
दृढं विपच्यते यतोंऽहसां चयो न तामृते,
अनादिकास्तु तन्वते मुहुर्मुहुस्तकां लघुम् ॥१४॥

बन्धमंह ण्त्यलं विपाकदानदक्षतां,
स्थितेः क्षये परं द्विधाऽस्ति कर्मभोग्यमात्मनः ।
प्रदेशतो विपाकतश्च न क्षयः प्रदेशतो,
यथौषधेन हन्यते विपाक आमयादिनाम् ॥१५॥

अतः कृतस्य कर्मणः क्षयो न जातु जायते,
परः शतैरपीह कल्पकालसङ्गतैरपि ।
प्रदेशमार्गमाश्रितं बचस्त्विदं बुधैर्मतं,
गतस्पृहं तपस्तु तद्विपाकतोऽपि नाशयेत् ॥१६॥

यथा रसोज्झिताणवः शटन्ति शीघ्रमाश्रयात,
तथा विपाकशून्यतां गताः समेऽणवोऽहसाम् ।
निकाचितानि कानिचिद् भवेयुरहसां पुन-
र्व्रजानि तानि नाशयन्ति ये स्थिता महाव्रते ॥१७॥

यदाऽबबन्धान्न बिभाय जन्तु-र्विपाककाले भयधारणात् किम् ।
किमातुरोऽपथ्यविधौ प्रसक्तो, वृद्धौ तु रोगस्य रवैररोगः ? ॥१८॥

बिभेति चेदाश्रवबन्धकाले, पापात्तदा नैव तकद्विदध्यात् ।
स्वायत्तबन्धेन च जैनमार्गे, विबन्धके नास्ति फलोपभोगः ॥१९॥

यथा कषाया विविधा जनानां, स्थितौ रसे तद्विविधाः प्रकाराः ।
कषायहीनाः स्थितिबन्धका नहि, रसस्तु तद्धानिभवोऽस्त्यसीमः ॥२०॥

निरञ्जयोगो भगवानयोगी, न बन्धक सर्वनिमित्तशून्य ।
सैवैति मोक्ष प्रलयात समस्त-कर्माणुसङ्घस्य विशुद्धरूप ॥७१॥

अनादिकालीनचिरप्रलग्न-ऽन्योन्यालेनोंद्भव उदीयते य ।
यथा स बीजाङ्कुरसन्तते स्या-नाशस्तथाऽत्रापि निमित्तहाने ॥७२॥

मीमासका विश्वविधानशून्या , सुवर्णयोग प्रवदन्त्यनादिम् ।
मोक्षापलापे प्रणाम्ततस्तान , प्रत्येष न्यूनान्त उदीरित श्रुते ॥७३॥

यन्नास्ति कर्मानुभव समन्ता-द्गुणावलेनोद्भव आत्ममूते ।
स पुनबन्धोन्यजो न चास्ति विशुद्धपत्रस्य पुन प्रबन्ध ॥७४॥

यथेक आहार उपैति भाव सप्तप्रकार रसमुख्यरूपै ।
तथा गृहीत बजतीह कर्म सप्तप्रकार समयेऽजताद्यम् ॥७५॥

आत्मैपोऽनन्तकणश प्रतिक्षमयमहो सूक्ष्मरूपानुगान्,
गृह्णात्यगान् समन्तात परित उपधृतोऽनन्तकैं कणैस्तु ।
यस्मादज्ञानान्योऽस्मिन्नमिलपरिमितास्ते ऋते तान्न रोध्या,
जीवत्वाधारभूता मलनतिरहिता निश्चला अष्टदशा ॥७६॥

आत्माऽस्त्यरूपो ह्यगरस्तु कर्मणा, तथाविधा नेति कथ तयोर्युति ?।
न चिन्त्यमेतद्युतिरत्र युक्ते, द्रव्यस्य धर्मोऽपि सा यथा स्यात् ॥७७॥

स्थूल शरीर यदि जीवयोगि, प्रत्यक्षमेतर्हि कलेवरोऽन्य ।
अनुग्रहे शक्तिभृतश्च निग्रहे कर्माण्यतस्तानि रुजादिमन्ति ॥७८॥

अज्ञानान्मतिविभ्रमाद् व्यतहत आयान्तो योजनान,
हिमानीघमञ्चयस्य सुचितेरन्धो न वाञ्छ्यचिन ।

वृद्धत्वेऽधिगतेऽङ्गपीडनमलं बाल्येऽनुभूताद्धते-
स्तद्वत्कर्मविपाकमेति विहिताऽबाधासमाप्तौ दृढम् ॥२९॥

प्राक् संसारे भवमनुसरता दुष्कृतं बद्धमल्पं,
पाकस्तस्यानणुरिह भवति प्राप्तकालोऽसुमत्सु ।
वीरे देवे मदवधविमति श्रोत्रपीडाकृतेर्यद्
बद्धं तीर्थङ्करभव उदितं नात्रकं नैव पापे ॥३०॥

जैनः सम्यग् जिनपतिगदितं बन्धतत्त्वं विजानन्,
नित्यं चेतोऽघरहितजनतापादपीठे विदध्यात् ।
साशङ्कानां भवति दुरितं निर्जरान्तं विवेकात्,
सोऽमुत्र स्यादुपरि सुखरे निश्चयाच्छुद्धलेश्य-
श्चुत्वा तस्मादधिगतनृभवः शाश्वताऽऽनन्दमेता (लाभः) ॥३१॥

इति षोडशोऽध्यायः ।

। सप्तदशोऽध्यायः । (निर्जराधिकार)

जैनः स स्याद्धृतिधनिकवरः सात्त्विकेषु प्रधानः,
संधत्ते यो निखिलभवगतं कर्मणां प्राज्य (पूर्ण) राज्यम् ।
चेतो धत्ते निखिलकुवृजिनोद्घातहेतौ सुधर्मे,
मन्ता यद्वद् वृजिनसुविलयः पाकतस्तद्वदेव,
चीर्णात्तीव्रात्तपस इह कृतान्निर्जरायाः पदं तत् ॥१॥

लग्नं जीवे पापमग्रे प्रभावा-दाहारादेः सर्वभेदेषु भावात् ।
यावन्न स्यात्सर्वथैतस्य नाशो, मुक्तेराशा तावता नैव सिध्येत् ॥२॥

यतो जातो व्याधि कुपथचरणादनुपमो,
निरोधस्तत्त्यागान्न च कुपथवृद् रोगरहित ।
पर व्याधेर्नाशो विकृतिहरणे ये पटुतरा-
स्तदा जीवात्तद्वद् भवति विहृति कर्मचिते ॥३॥

मोक्ष न य शिवमय मनसाऽऽप्तुमिच्छेद्,
दुख क्षुदादिसहित विविध सहेत ।
सोऽघ क्षिणोति परमाश्रितमङ्गमाग-
स्तीव्र करोत्यघमिय त्वपकामनाङ्का ॥४॥

मृते यतोऽग्नितपनादिकमाचरन्तोऽ-
धोगामिनोऽपि कथिता प्रविरादृभावा ।
गार्हस्थ्यलीनमनसोऽपि निरक्तिकामा,
आराधका परभवे कथिता जिनेशै ॥५॥

मुक्त्यथता यदि भवेच्छिवधामसिद्ध्यै,
कार्यं भवेद्धनिजनैभृगुपातमुख्यम् ।
वाल्पाश्च सन्ति सम आस्तिकताञ्चिता ये,
मुक्त्यर्थिन तत इमे शिवभाजन स्यु ॥६॥

मुक्त्यर्थिनश्चरमवत्तगता प्रसिद्धा,
वादान्विता अपि परे चरमावृता स्यु ।
तत्तो जिनेन्द्रकथित मनुते हि मोक्ष,
भक्तयस्तर्थनिपुणाश्च परन्न शुद्धा ॥७॥

अकामनिर्जरावता व्यथाऽमिता फल लघु,
सकामनिर्जरे पुनमहत्फल व्यथाऽल्पिका ।

श्रुतादयो यथा शमे हि हेतवोऽनियन्त्रिता-
स्तथानुकम्पकादयो भवेच्छमो नवा ततः ॥८॥

अकामनिर्जरां पृथग् जगाद बालतापना-
च्छ्रुतं तदत्र कारणं बुधैः सुखेन गम्यते।
इहत्यभोगलालसा नराः प्रथमपङ्क्तिका,
द्वितीयपङ्क्तिकाः पुनः सुरर्द्धिभोगवाञ्छकाः ॥९॥

निर्जरा तपोबल तपस्तु संवराश्रिते,
कुतीर्थिनां पुनः प्रदाय नाकितां परां, च्युते।
दुरन्तसंसृतिरभव्यसाधुता यथा ॥१०॥

जिनेन्द्रधर्म आप्यते मले घने क्षयं गते,
तथापि नैव लभ्यते शमोऽङ्गिना विनिश्चयाद्।
भिनत्ति सप्तकं यदीह सङ्गतः कुले वरे,
दर्शने विघातिनां तदा ध्रुवं शमं श्रयेत् ॥११॥

पृथक्त्वपल्यमानगा यदा ततः स्थितिः क्षये-
दघस्य तद्विरोधिनस्तदा मुनेः पदार्चकः।
तदा हि श्रेणियुग्मयुग्मुनित्वलाभ आप्यते,
यदा च सङ्ख्यवार्धिमानगः क्षयो भवेत् स्थितेः ॥१२॥

बन्धः कर्मततेः सदातनभवश्चेन्निर्जराऽकामिका,
स्यादुग्रा स समेति देशकरणं मुख्यं यथावृत्तिकम्।
अग्रे याति ततो विशालगुणभृद्भव्यो द्वितीयां कृति,
जन्तुर्भाविशमस्तृतीयकरणं याति प्रशान्तान्तरः ॥१३॥

विमोहमुख्यकर्मणा तत प्रभृतिबन्धन,
न कोटिकोटिसागरप्रमाणतोऽधिक भवत ।
गत गुणेऽपि लघ्वघन न तस्य जातु जायते,
रसोऽधिकस्तु पातत समुद्भवेद्गुणावृते ॥१४॥

यथा यथा गुणावृते क्षयोऽङ्गिवीर्यवृद्धिज-
स्तथा तथा गुणावले समुद्भवो निरर्गल ।
परे परे गुणे यथा गुणावले समुद्भव-
स्तदा तदाऽघबन्धन गुणप्रभावत क्षयेत ॥१५॥

कषायाणा नाशो यदि च शमन स्थान (श्रेणी) प्रभव,
तदा बन्ध सद्या विलयति भवाब्धिभ्रजनन ।
पर बध्नात्येषोऽविरतयुजि यत्न उदित ,
पर सा त वेद्य क्षिपति दुरित प्राक् त्वतिघनम् ॥१६॥

यत्प्येषा शुभगुणजननी निजरा पाप्मना स्या-
न्नैवाम्नाता शिवपन्थरमे निजरा पुण्यभागे ।
बन्धाभावो यदपि सुकृतेरात्मशुद्धयुद्धवोऽसौ,
शुद्ध वस्त्र स्वकगुणनिरत नैव कौसुम्भवसनम् ॥१७॥

समस्तकर्मनिर्जरा सदा जघुष्मता भवे,
भवेन्नवा विपाकभाग् निजरानिनाशृत ।
दृशत पर सदाऽवशेषकर्मणा स्थिते ,
पुनश्च बन्धन न तद् द्वय शिव गमे नरि (समस्तनिर्जरे)॥१८॥

उपात्तकर्मजारण तु निर्जराभावज,
नवीनकर्मबन्धने न जायते ततोऽन्तरम् ।

अतः समस्तकर्महानितो भवेद्वृतार्थता,
विमोक्षतत्त्वसम्भवस्य नव्यबन्धविच्युतेः ॥१९॥
समस्तकर्मनाशनान्मतं जिनेश्वरैः शिवं,
परं न तत्स्वतत्त्वतो निजान् गुणान् सनातनम् ।
दधात्यनन्तमव्ययान्, स्वरूपतः शिवं नु त-
ज्जीवरूपमेव तत्कृतिस्तु निर्जराश्रिता ॥२०॥

यथा हि निर्जरा शिवस्य साधनं कृतौ स्थितं,
तथैव वन्धनोद्धतिः परा शिवस्य साधिका ।
परं न वन्धनोद्धतिर्विनास्ति कर्मनिर्जरां,
परम्परा यतोऽनयोस्ततो द्वयं हि साधनम् ॥२१॥

तपोऽघनिर्जराफलं द्विधा तपस्तु तत्पुनः,
स्वरूपतोऽन्यतीर्थिकैः कृतं समं तु बाह्यतः ।
विचार्यतेऽनुबन्धिता न चात्र बाह्यताश्रिते-
ऽनवद्यतेतराश्रिता शरीरतापनाद् द्वयोः ॥२२॥

बाह्येऽस्मिन्नुदिता भिदो मुनिवरैः षट् तत्र मर्यादया,
तीर्थानां, क्रियतेऽनशनादिविरमो वीरस्य सच्छासने ।
षण्मासी प्रमिता, न चेद्भवति तां कर्त्तुं सहो मानवः,
स्यात्तपसः परिपारणेऽवमपरो भुङ्क्ते प्रकामं न वै ॥२३॥

बह्वाशी न सहो भवेदवमतां कर्त्तुं तदा सङ्क्षिपेद्,
वृत्तिं, वर्जति तत्सहो न विकृतीस्तद्भावितश्चेन्नरः ।
कुर्यात् क्लेशभरं तनोर्मदहरं, चेद्भावितोऽसौ सुखैः,
नार्त्तं रौद्रसमञ्चितं न च भवेत्तन्वेन्द्रियाणां क्षतिः ॥२४॥

क्षुर्यादिन्द्रियकोपनादिदमन्न मोक्षाध्वहेतु पर,
तत् पोढा तप उच्यते बहिरित शास्त्रे पवित्रेऽनघम् ।
एव पूर्वविधानमार्ग उदित उत्सगत सप्तमै–
रन्त्यान्त्यादरण परे पथि पर सेव्य श्रुतोक्त्यान्तै ॥२५॥

यद्वाऽऽयार्थं प्रयतो नर स्यात्, पापस्य रोधे विगमे च सक्त ।
भवेत्तया चेच्छुचिभाजनो भवत्, स चेन्द्रियादेर्दमनान्न चान्यत ॥२६॥

सिद्धिस्तदीया तनुतापनादे–र्भवेद्विरामे विकृतेस्तु तत्पुन ।
सङ्क्षेपणेऽमौ भणिताऽऽज्ञनाद , क्षुर्याच्च तज्ज्ञोऽमोक्षम ॥२७॥

क्षुर्यात्स एव मतिमानमोक्षाग्,
य स्यात् क्षमोऽशनमुखोद्गमने समर्थ ।
सम्यक्त्वता यदि मता विधयाऽनयाऽपि,
क्षुण्ण न चैव जिनमागमुपाश्रितानाम् ॥२८॥

आन्तरे तपसि षडविधेऽर्हता, योगमुख्यनातमह उज्झितुम् ।
नासने विधि समुद्धतो, न स, स्वप्नगोऽपि तीर्थिकेषु दृश्यते ॥२९॥

गवादिपोषणे परेऽघशून्यता, वर्तते तामुपोषणादिभिर्जिना ।
योग्यता विनीतगा गृहेऽपि परे, जिनाम्तु पापवर्जकाश्रिताम् ।
(गृहाश्रमित्वमेव बीजमुद्धतौ, गुणैर्युतत्वमाहता सुकृत्यगै) ॥३०॥

यथादिदेशिका श्रुतिस्मृती परे, शिवाध्वगाह्या गमास्तु पाठने ।
क्षितीश्वरोण सश्रित परे जगु , जिना पर्यायपापनिश्चयादिचिन्तने ॥३१॥

त्यागमेकमेव जीवने विना उपाधिमान्तरेतर पुनस्त्यनौ ।
तदेतदान्तर तपस्तु षड्विध, सदाऽऽश्रित जिनेश्वराध्वगामिभि ॥३२॥

आश्रवाः समुत्थिता अघोदयात, केचन क्षयसुखोद्भवा अपि।
संवराश्चरणमोहनाशजाः, बन्धनं शमादिमोहज पुनः
कं नु भावमाश्रयेत्तपस्त्विदम् ॥३३॥

चरणमोहनाशतस्तपो ननु स्थायि यन शिवे पदेऽघभावतः।
नोदितं ततोऽद आर्यसत्तमै-र्हेतुकार्यहानितः शिवाध्वनि ॥३४॥

जैनो मोक्षाध्वयायी न च भवरतिमान् चारके यद्बदाढ्यः,
क्षिप्तो निस्सर्तुमिच्छेद्विविधविधिपरस्तद्वदेषोऽपि नित्यम्।
कर्मान्दोर्भञ्जनाय सततमुदितधीः संवरे निर्जराया,
बुद्ध्वा मोक्षाप्तिबीजं सरति तप इदं निर्जरानन्यहेतुम् ॥३५॥

इति सप्तदशोऽध्यायः।

। अष्टादशोऽध्यायः । (मोक्षाधिकारः)

जैनो यः स्पृहयेन्ननु सदा मोक्षाय सवेगभाग्,
निर्विण्णो भवचारकात् करुणया सिक्तो द्विधा दुःखिषु।
आस्तिक्यादिगुणान्वितः स्वरमणः शान्तास्पदं निस्तुषं,
भक्त्यर्हो गुणकाङ्क्षिणां शिवकृते स्वर्गादितुच्छं फलम् ॥१॥

पर्यन्तभागे गदितोऽयमाप्तैः, परं तदाप्तेर्न हि संश्रवाः किल।
तदाश्रिता नैव परेऽपि भावाः, सनातनो मोक्ष इतः शुभ न वै ॥२॥

अनन्तविज्ञानमनन्तदर्शनं, सातं ह्यनन्तं निजरूपजातम्।
अनन्तसम्यक्त्वमनन्यरक्ति, समग्रशक्त्याढ्यमजं यजेत् सदा ॥३॥

न गर्भवासोद्भवमस्ति दुःखं न जन्ममात्रोत्थमपीनरूपम् ।
व्याधिर्न शोको न च नैव वार्ध्यं, न चान्तकोऽस्मै प्रभवेत् कदापि ॥४॥

न चास्ति संसारभरेऽपि (त्र) किञ्चित्, स्यान जनुर्मृत्युविहीनरूपम् ।
भयं च सर्वासुमतामभूत्या, न वारणीयौ भवतोऽत्र विना ॥५॥

अस्मिन् भवे नास्ति चतुर्गतिष्वपि, स्थितिर्भवेद्यत्र सदैकरूपिणी ।
पूर्णाऽच्युतनित्या रमणी स्वरूपे, सा सिद्धिभाजामपुनर्भवानाम् ॥६॥

अतीतकालेन शिवं गता पुनस्तथैव भाविन्यपि भव्यजीवा ।
अनन्तमाना न तथापि भव्यै-र्जिनाहृता स्याद्भव एव नूनम् ॥७॥

यथाऽन्त्यमाद्यं प्रपदुद्भवौ न, भवो न चोनत्वमपारभावात् ।
असङ्ख्यभावान्तरिता तु तत्र, भागो ह्यनन्तस्त्विह सर्वकाले ॥८॥

कल्पे प्रयात्येक उदेतमृत्यु , शिवं तदा तेऽतिगता अनन्ता ।
आत्मविज्ञानवियुक्तिभाग्भि-र्मुक्तिं गताना मतमत्र जन्म ॥९॥

सञ्जायते जन्तिरमुत्र दधाति कर्म,
सत्तागतं तदपि चाष्टविधानरूपम् ।
यस्यैकमस्ति न तु कर्म स जन्मधारी,
स्पष्टोऽस्तु नाममभव प्रबलो हि रोगः ॥१०॥

आत्यन्तिकी भवति चेज्जनिकर्मसत्ता,
निर्वाणमेव न भवेज्जनिकर्मभावात् ।
दानादियुक्ता निखिला हि धर्मा,
कर्मद्रुमाम्बुसमा न तु मुक्तिनिघ्ना ॥११॥

मोक्षो न चैष भवगामिदायुतश्चे-
जन्मादिदुःखनिरेष भवोऽन्यथा न ।

ज्ञानाद्यमोघगुणसङ्गतिरत्र नार्हा,
यत्रास्ति कर्म भवसन्ततिकार्यदक्षम् ॥११॥

मुक्तानां नहि मोहनीयसदृशा दोषा भवेयुः क्षणं,
तन्नायुर्न च जन्मजातिसहितान्यंहांसि लेशादपि ।
तेषां चेद् भवकूपपातविपदो देयोऽञ्जलिर्नास्तिके,
यन्न्यायेन हि तेन सिध्यति वचो राद्धान्तशिष्टं क्वचित् ॥१३॥

सूर्यादयो भास्वरभावभाजो, यथाऽनपेक्षाः परकार्यभावे ।
मुक्ता अपि स्वात्मरमा न किञ्चिन्, कदापि कार्यं परमुद्वहन्ति ॥१४॥

वस्त्वस्ति विश्वे त्रितयोन्मुखं य-ज्जन्मस्थितिक्षीणदशानुयायि ।
ज्ञेयाद्यपेक्ष्या गुरुलाघवादि-व्यपेक्षया वाऽव्ययमाश्रितेषु ॥१५॥

स्थिताः शिवे यद्यपि मुक्तिमाप्ता-स्तथापि भव्येषूपकारमन्यम् ।
वितन्वते यद्वदिहेतिहासाः, पराक्रमन्ते परवीर्यवत्सु ॥१६॥

पदं न मुक्तेर्यदि चेन्न सम्भवि, मार्गं दिशेयुर्जिनपा नु कस्य ।
सञ्चालनं सूरिवरा अधीति, श्रीवाचकाः साधवः साधनं तु ॥१७॥

यदाऽव्ययं नैव पदं भवेत्तदा, धर्मक्रिया नैव फलाय योग्या ।
यतो दिवौकःप्रभृतिर्न नित्यं, शस्या न विद्वद्भिरधोमुखी श्रीः ॥१८॥

परैः कृताऽतुल्यसुखा सुसम्पत्, न तोषदा वीर्ययुजां नराणाम् ।
संसारचक्रे निखिलेऽप्यसूनां, विचेतनार्थप्रभवा सुखश्रीः ॥१९॥

स्वाश्रितेषु रमणं शिवाश्रिते-र्ज्ञानदर्शनमुखेषु वस्तुषु ।
सर्वकालभाविषु वरेषु तु, धर्मिणां परं धृतेः पदं नहि ॥२०॥

रूपिणामपि न काचिद्दाहतिः, सूक्ष्मताधरेषु तेजसामिव ।
मुक्तिमाश्रितेष्वमूर्त्तता गुणात्, स्थानमप्यमितजीवसंश्रितम् ॥२१॥

यथाऽग्निधूमादिषु पूर्वयोगा-दतिस्तथैषामपयोगयोगात् ।
धर्माद्यभावात् परतो न लोकाद्, मुक्तॉस्ततोऽप्यागतु स्वलीनान् ॥२२॥

यथोपनेत्राद्विपुलं समीक्षत, मनोपदृष्टिं पुनरस्तथाऽत्र ।
अचेतनभ्य सुखसम्पदिच्छा, निरुद्धदृष्ट्या तुलित शिवे सुखम् ॥२३॥

आत्मैव कर्म फलयेदणुसहतत्वा-न्नास्ति नव फलाऽणुसमूहजाता ।
नित्य शिव शिवपद कटुपादिहीन,
सुख पद ननु निरञ्जनमीहनीयम् ॥२४॥

प्रत्यात्मदृश निखिलार्थचित्त्व, पर न चैकार्थगतो विभिन्न ।
यस्यापि जनोपयोजनादर-स्ततोऽखिलात्माऽखिलयत्नुवेत्ता ॥२५॥

अन्योयथा भिन्नतमो न चैवो-पयोग उच्चो विगुणान्मनोरपि ।
तथा समस्तार्थविदा क्षणे क्षणे-ऽभेदो भवज्ज्ञानदृशो मतैव ॥२६॥

प्राप्तेतरा स्यादुपयोगयुग्म, मिथोऽस्ति भावो मनसश्च वेग ।
शिव न तावात्मस्वरूपभावाद्, भवन्न वाग क्षणयोपलब्धो ॥२७॥

भिन्नेऽथ काले ऽप्युपयोजन चे-त्सामॉ प्रभाव परभावजात ।
जीवस्यभावोऽस्य तथाविधानो, हेतुश्च शिवस्वरूपाय ॥२८॥

न जन्म मृत्यादि तदा न काय-स्तदभ्र सयोगवियोगजन्यम् ।
दुख न सौख्य न शिवस्वरूप-सुखोपभोगैकयसु पूर्णभा ॥२९॥

शिव स्वरूपाममलेय तत्त्वा-नेतत्पदमाविभवति स्वरूपा ।
न मग्न यत्र पुण्यपापभावान्, समग्रमङ्गल्य तत्र स ॥३०॥

यथाभावो यदि च सुगुणो निखा धैर् ममता,
प्रणामान् प्रयत्नुगलोगिरीशप्रभाया ।

नव्यानां चेद् भवति न युतता कोऽत्र मोक्षे विलम्ब-
स्तत्प्राज्ञानां शिवपथचरणे शस्त एवोद्यमोऽत्र ॥३१॥

हितावगूढा हतकर्मशात्रवा-प्राप्तस्वधर्माः शिवधामसङ्गताः ।
भवन्ति संसारभृतां सुमङ्गला, अर्थोऽयस्तत्र सुमङ्गलस्य वै ॥३२॥

स्वयं भवेद्यो भयलेशवर्जितो, भयं परेषां क्षपितुं क्षमः पुनः ।
शरण्यमेषोऽत्र शिवं गतास्ततः, सर्वाघभीतेर्व्यतीताः शरण्यम् ॥३३॥

लोकोत्तमत्वं गुणराशिलभ्यं, निष्पक्षकेषु प्रवरात्मभावात् ।
सदातना ऊनविपर्ययोज्झिता,
आप्ता गुणा येन कथं तथा ते (तदाश्रयाः) ॥३४॥

प्राप्त्यै शिवस्याऽलमुदासभावो, रत्नत्रयाराधनसम्प्रयुक्तः ।
नाग्न्यं न वेषो न विशुद्धजाति-र्वंशः कुलं नो भरतादिजन्म ॥३५॥

यथा गुडस्यापगताश्रयस्य, पूर्वाश्रया स्याद्विविधाऽमाऽऽकृतिः ।
शिवं गतानां चरमाङ्गतुल्या-ऽऽकृतिः परं पूरणतोऽवमा स्यात ॥३६॥

ज्ञाने सदा दर्शनसंयुते परे, प्रयोगवन्तः सुखसम्पदाढ्याः ।
सदैकरूपाः स्मृतिजापचिन्ता-पूजापदार्हा भविनां तु सिद्धाः ॥३७॥

जैनः स एष परमार्थतया शिवैषी,
मोक्षस्य मार्गमनिशं पुरतो जनानाम् ।
वक्ति प्रबुद्धरतिको मुनिमार्गमर्य,
श्रेयं त्वनर्थमहितं दृढमार्गधारी ॥३८॥

अष्टादशोऽध्याय. ॥

। एकोनविंशोऽध्याय । (-अहिंसाव्रताधिकार) - ।

जैनो मन्यत आस्तिक्येपुं परमो नैवाघमुक्तिनणा,
पूज्याराध्यपदालिलीनमनसो ज्ञानाच्च तत्त्वात्मके ।
शुद्ध तन्मन उच्चतीह दुरित ह्यान तथा तत्फल,
यमा हि प्रथमो मत स विबुधैर्य स्याच्छुभाचारवान् ॥१॥

घृन्दे सोऽधिपतिर्भवेद्य उदित-स्वाचारमग्नो भवेत् ,
सवज्ञो विगताघसन्ततिमलश्चारित्रमन्त्य दधत् ।
रयात रूपमलङ्घयत सुविहिताचार कषायोज्झित,
प्राप्त्यै तादृशमीश्वर जनिरिय मे धन्यतामाश्रिता ॥२॥

अभ्यासयत्नोभयसाध्यमाय रारयाय्यनुष्ठानमुदितिप्रतिष्ठम् ।
कार्ये समस्ते द्विविधो भवेत्तत् , सिद्धमतथा साधकभावर्ती ॥३॥

सवज्ञा जितरागमुख्यदुरितास्त्यक्ताऽशुभध्यायिता,
आचारेपु निरङ्कचारुचरणास्तत्सिद्धतामाश्रिता ।
ये तु स्यु सतत चरित्ररमणा कर्मापहारेप्सव ,
किञ्चिच्चित्तमवाध्यकर्मविहिताद्वाध्य धरन्त पर ॥४॥

परैस्तीर्थ्यैर्न्या अभिमततमा स्वगशिक्षा-
स्तथा ये चोपास्यापत्मनुगता गुरुपदगा ।
न चेपाच्चित्तेपा दुरितरुधिपरावृत्तिरणुरपि,
तथापि प्रावल्यान्न (त्यर्हा घृत्तिज) ननिचयगता-
जैनकृतीनाम् ॥५॥

जीवाना हनन मपोक्तिरपरदत्त न यत्तद्ग्रहो-
ऽग्रहार्यग्रहण च पापसचिवास्तागस्त्वमीषा तृप ।

एव सत्यपि (वस्तु) चिन्तनपरास्तेपां वचो मन्वते,
मिथ्या यन्न परीक्षकेषु लभते ख्याति व्यलीकोक्तिमान् ॥६॥

आद्ये तत्त्व (धर्म) तया मते वधत्मे नोक्तं परैः किञ्चन,
तादृग्वाक्यमुदारभावभवनं नैवार्हिताः पालकाः ।
नोक्तान्येव वधस्य शुद्धविरतौ सत्साधनानि श्रुते,
मोक्षादिर्न फल मतं वरतमाऽहिंसाहतानां क्वचित् ॥७॥

जीवानां हनने सदैव निरतास्ते धिक्कृता नैव तै–
र्नैवैषां दुरितार्द्रचित्तवचसां प्रेत्याऽशुभोक्ता गतिः ।
संसारे सरणं भयङ्करतरं दुःखौघसंदीपनाद्,
दिष्टं जीववधावलीढकृतिभिः शास्त्रे स्वकीये क्वचित् (नहि) ॥८॥

स्वरूपं जीवानां विदितममलं नैव कुमतै–
र्यतः प्रोक्त भिन्नं तदिह भवभृत्सु प्रभुपदे ।
ततो भाव्यं तैः स्वाक् त्रितयदलवाग्भिरनिशं,
भवेत्तत्त्वं भिन्नं किमुत नहि संभिन्नपदगात् ॥९॥

रारट्यतेऽशेषकुतीर्थिकैरिदं, हेयो वधः प्राणभृतां प्रकामम् ।
परं यथा नाऽस्य फलादिवाच–स्तथैव भेदोदितयोऽपि नैव ॥१०॥

गतीन्द्रियाद्या जिनपस्य शासने, भेदाः प्रगीता न तथा परस्मिन् ।
प्रत्यक्षतन्वादिपरिणतीनां, क्षित्यादिषु प्रेक्षणतोऽसवस्ते ॥११॥

ये स्थावराणां पृथिवीमुखानां, जीवत्वमाहुर्न विमुक्तबोधाः ।
ते निष्करार्शि प्रविमुच्य शुद्धा, भवन्ति कार्षापणदानदक्षाः ॥१२॥

यो जीवराशिः स्थिरताश्रिताना–मनन्तभागेऽस्य परोऽस्ति राशिः ।
अन्योऽन्यगाहस्य परे न सत्त्वं, भवन्ति तत्तेऽनिधनाः कथं स्युः ॥१३॥

सत्य गृहस्थै कृषिमुल्यरकै-र्वधो न चया परिवर्जितुमलम् ।
तथापि किं दोषकरैरदौष्ट्य, वस्तु नु शक्य शुभबुद्धिमद्भि ॥१४॥

षट्कायग ये परिवजयन्ति, वध व्रजेयुमुनिभावमुत्तमम् ।
गृहाङ्गनाद्रव्यशरीरमौढ्य, त्यजन्ति मोक्षाध्वगमैकबुद्धय ॥१५॥

महाव्रत प्रोक्तमिद त्वमीषा, त्रिधा त्रिधा कात्स्न्यदोषमूढम् ।
षट्कायिकाना वधमह आढ्य, त्यजन्ति यावज्जीवमुद्धताघा ॥१६॥

नालम्भविष्णव इमा निखिलाङ्गिहिंसा,
ह्यातु न ते शुभहृद प्रतिजानते ताम् ।
शक्य न यत् प्रतिपद पचनादिसक्ते-,
मिथ्याव्रत च नहि ते प्रतिजानते वै ॥१७॥

वध ते त्रसाना विकरपाशिरागो-गत युक्तमुद्धाय सार्द्रात्यनेयु ।
पर भावना ते मन धारयेयु , समाङ्गिश्रिते घात आत्मा मतान ॥१८॥

गाहस्थ्यमाश्रित्य सदा निहिंस्यु , क्षित्यादिकान स्थावरभावमागतान् ।
षट्कायरक्षोद्यतचेतसोऽमी, नानथक स्थावरग च हन्यु ॥१९॥

क्तेऽणुव्रतधारका यदि पर स्यु साधुभावोन्मुखता,
आरम्भादि विहाय सश्रितकुला शुर्युर्शैकाञ्चिता ।
शास्त्रोक्ता प्रतिमा यदा स्थिरहृदो गृह्णन्ति सत्साधुता-
मन्ये तद्रहिता पुनर्मुनिपद शीघ्र महीतुमला ॥२०॥

नन्वेकत्र विशेषण भवतु वो हिंसादिपापोज्झितौ,
श्राद्धानामणु वा महन्मुनिवरे सार्थक्यमेवेन्शे ।
सत्य तद् गृहिणा न सयमियमाङ्गीकार आवश्यक ,
साधूना निखिलास्त्रिधा त्रिविधया त्रैकालिकास्ते यमा ॥२१॥

अन्यच्चातिचरेद् व्रतं मुनिवरो ह्येकं तदा सर्वगो-
ऽतिचारो न परेषु शीलनिचयः स्युः सर्वदा सर्वथा ।
तद्योग्यं गृहिसाधुगं सुपुरुषैर्युग्मं विशेषान्वितं,
याऽपेक्षा श्रुतधारिभिर्नियमिता तां वेत्ति तात्पर्यवित् ॥२२॥

न सर्वतः पापविवर्जनं मतं महाव्रतं किन्तु परापि सत्क्रिया ।
यतोऽभ्युपेत्यैतदुवाच साधुर्विहारमर्ह ननु योजयिष्ये ॥२३॥

शय्या भूमौ नियत उपधिर्लुञ्चनं केशतत्या,
वैयावृत्त्यं सकलमुनिगतं सर्वदा पाठयत्नः ।
आचार्येषु प्रथितगुणगणेष्वर्पणीयः स्व आत्मा,
धार्यः सर्वो मुनिगण उदयी मोक्षमार्गे सहायः ॥२४॥

गृहस्थानां कश्चिन्न च परिचयो याचनमृते,
यतः सेव्यास्ते स्युर्दहननिचयं यद्वदितरे ।
सदाचारा रक्ष्याः शिवपदकृते पञ्च विधिना,
न काप्यर्हे स स्यात् प्रमदसहितः शास्तृकथिते ॥२५॥

ज्ञातं स्नुषाया मनसि प्रधार्य, पैशाचिकज्ञातयुतं मुनीन्द्रः ।
सदा भवेत् पाठविधौ प्रवृत्तः, कथानके सत्पुरुषावलेश्च ॥२६॥

यथा नृपः स्यात् प्रथमं प्रजाया, हितैषितागू र्मुनिराडपीह ।
षट्कायराशेः प्रयतो हितेषु, लोकोत्तराचाररहस्यमेतत् ॥२७॥

नैवाऽस्य शत्रुर्न च मित्रमस्ति, समश्च भावस्तदिवाहृतेषु ।
जगज्जनस्तस्य हिताप्तिपात्रं, मानेऽपमानेऽपि समश्च स स्यात् ॥२८॥

असंयमाद्यं विधिना प्रजह्या-दाशातनान्तं मुनिरुग्रवीर्यः ।
संलेखनाद्यं च मृतेः समीपे, शिवैकाकाङ्क्षः कुरुतेऽप्रमत्तः ॥२९॥

प्राणातिपाताद्विरति श्रुतोक्ता, भावी वधो नैव च जीवतत्त्वे ।
भावान्वितेषु प्रलयोऽत्र हन्य-स्तुक्तमेतद्धयमिधानमस्य ॥३१॥

अत प्रयुक्त श्रुतचारिराशौ, शुद्धे पर प्राणवधानुसृत्या ।
नो चेत्समेऽपि समानभावे जीवे हते स्यात कथमहसा भिन्न ? ॥३२॥

पुण्याना निचय क्षयोपशमिताऽऽत्मा च चेतात्मनि,
स्याद्वृद्धि करणस्य सन्ततिगता स्पर्शादिक सश्रिता ।
चन्नाशे सकल बल विलयित तज्जीवग हन्तृभि-
रेव च गृहिणा त्रसेषु विरति शोभास्पद गीयते ॥३३॥

शपाया ननु जङ्गमेषु विरते स्यात् स्थावराणा वधे,
साधूनामनुमोदना भवति त्यागस्त्वभीषा यत ।
सस्थावरजङ्गमाङ्गिविषयो (हनने) यावद्धव सर्वथा,
स्याच्चैषाऽनुमतिस्तथा विरतेर्भङ्गोऽतिदु खावह ॥३३॥

यद्वा किं त्रसराशिसङ्कलवध स्वीयेन तन्त्रेण ते,
प्रत्याचक्ष्युरताऽनगारसमीपे द्वेधाऽपि नाह स्थितम् ।
यत्नान स्याद् व्रतधारण गुरुमुखान्नैव स्वय साधन,
तत्र स्यादनुमोदना स्थिरवध दुष्टा गुरूणामपि ॥३४॥

सत्य चेद् गुरवो दिशेयुरखिल घात प्रतिश्रोचित,
नो प्राग् न प्रथमा पर यदि सके प्राहु पुरस्तस्य चेत ।
नाना स्थावरजीवो प्रहनने स्युस्ते तदा लोपिना,
आत्मस्थ समथने न सहितस्तत्रुम-गोचम ॥३५॥

तर्त्तं स्थावरहिंसनेऽसुनियमं कर्तुं गतोत्साहकं,
दृष्ट्वा जङ्गमजीवनाशविषयां दद्युः प्रतिज्ञां पराम् ।
पुत्राणां हननेन नृपः प्रयतते षण्णां लघुन्यागसि,
श्रेष्ठ्येकं तनुजं धरन्न भवति द्विष्टोऽपरेपूद्यमात् ॥३६॥

प्रव्रजतां यतिनां कुलं प्रजहतां दोषो न किं क्लेशज-
स्तस्येत्थ लपतो भवेद्गणपतेर्हस्या समा मोहिता ।
यद्भावाचनमेव तद्विधिकृतं हानं न सङ्क्लेशिता,
ना मत्तेप्सितवस्तुदाननिपुणाः प्राज्ञा भवेयुर्जने ॥३७॥

प्राप्तो दीक्षां निवृत्तिपदकरी सद्गुरूणां प्रसादात्,
त्यक्त्वा हिंसां सकलतनुभृतां याति देशान्तराणि ।
नद्योऽनेकाः स्वपरविषयगा उत्तरेत्स प्रचण्डा,
इत्यादीनि हननविरतेर्बाधिकानि न किं स्युः ॥३८॥

सत्यं हिंसां सकलतनुभृतां त्यक्तवान् प्रव्रजन् सन्,
तत्रोक्ते द्वे मुनिपतिमहितैः कारणे कर्मबन्धे ।
रागो द्विट् वा नहि भवति मुनिः संयमी तद्विलिप्तो,
यद्वत् सिध्यन् ह्रदमुखमयितो नाघलेशेन लिप्तः ॥३९॥

जैनः स स्यात् प्रथिततममिदं रोचयेत् सद्व्रतं यो,
धन्यः कुर्याद्विगतरतिको वर्जनं घातनायाः ।
सत्यं यद्वत् प्रतनुबलभृज्जायते मल्लयोधी,
यः स्यान्नित्यं पटुतरकरणोऽभ्यासमेयोऽपि तद्वत् ॥४०॥

इत्येकोनविंशः अध्यायः ॥

। द्वितीयोऽध्यायः । (सत्यव्रताधिकार)

द्वितीये व्रते योऽभिसन्धत्त आप्तं–त्याग मृषावान्सत्क प्रणीतम् ।
जैनत्वयुक्तो मनुते मुनीश, य स्यात् सदा तद्धरणेऽप्रमत्त ॥१॥

यत्र लोका प्रयन्ति सत्य, निरूपणीय, तदिद न चार ।
नैलोक्यबोधोद्धुर आह विश्वे, कथ समग्र विन्दि प्रतिक्षणम् ॥२॥

वाच्य सदयान यदव सत्या–श्चित न सत्याश्चितमुच्यते खलु ।
एव व्रत चेन्न धर यदेत, न निधनो वाच्य इहामरेश ॥३॥

सत्यामृषालक्षणविप्रमुक्ता, भाषा सदा विश्ववै प्रयुक्ता ।
लोकप्रसिद्ध व्यवहारमाप्य, कथ तदेतद् व्रतभृत प्रयुञ्जि ॥४॥

मृषावादयुक्त वचो वर्तनीय–मिहेति व्रते माहुरत्युत्तमयोगा ।
विरुद्धा प्रतीतिं विदध्याद्वचो य–द्वाक्य तदेतन्नहि शुद्धचेतसा ॥५॥

अनत्त्व तत्त्व यो निगदति परान् बोधविप्लुत्व–
त्सदाऽसौ मिथ्यात्वी भवति नियतानन्तभवित ।
मृषावादोऽप्येवविध इति मृषत्व किमु तयो–
र्न सर्वोऽस्माद् भग्न भवति विरतस्तत्स्थमिदम् । ॥६॥

उपादेयमर्थं परे मोक्षमार्गे, यदेद् यस्मात् हेयतारूपवत्तम् ।
हेय तथा यद्धि पुर परेषा–मर्थं मृषादूषणयाऽऽप्तमार्गे ॥७॥

महाग्रहेणा मृषोक्तिर्भवति जनदृढि बोधध्वान्य क्षया सा,
मोहा सम्मानुतिपतिभिरिद नद् द्वितीय तु ।
न शुद्ध वचस्तु प्रगृहितमणुो बोधमिथ्याप्रकारै–
निर्दोषे ऽल्पभागे रागरोषप्रयुक्त् ॥८॥

चतुर्विधं गीयत एतदाप्तैः, सल्लुप्त्यसद्वादनतो द्वयं भवेत्।
द्वयं तु गर्हाऽर्थापिधानतस्तथा, यथायथं तद्व्यवहारमार्गे ॥९॥

तत्त्वस्य गानेऽपि चतुर्विधं तद्, हेतुः फलं चास्य सुमार्गलोपः।
गीता ततः सत्यतया गिरा सा, याऽऽराधनीति प्रतिबुद्धमार्गैः॥१०॥

लोके यथाऽनुद्गत आह सूर्यं, समुद्गतं ह्यस्तमितं त्वस्तमेतम्।
गवादिवस्त्वाश्रितमन्यथार्थं गुणान्वितस्यापि तथैव गर्हा ॥११॥

आराधनापक्षमुपेत्य योक्ता, जीवादयः सन्ति न चैव लोके।
असङ्ख्यमाना भुवि लोकभागा, सतामपभ्राजनमार्षलुप्त्यै ॥१२॥

सद्दृष्टयो ये वितथोक्तिशून्या-स्तथ्योक्तिशून्या अपि शुद्धदृष्टयः।
या गीः समाराधनमार्गरूपा, न लेशतस्तत्र विरुद्धवादः ॥१३॥

शस्यौघवज्जीवदयाऽत्र मुख्या, व्रतानि शेषाणि वृतेः समानि।
तद्घातकाले ह्यपवादभाञ्जि, मृगादिरक्षार्थमतो मृषोदितिः ॥१४॥

कृत्वा निवृत्तिं प्रथमाघधाम्न-श्छद्मस्थभावाच्च भवेद् व्यथाऽस्याः।
तां शोधयेन्नैव मृषोक्तिमान् ना, त्याज्या ध्रुवं सा वृजिनौघभीतैः॥१५॥

वधादयः कर्तृविबाधकाः परं, गणस्य बाधां तनुते मृषोक्तिः।
ब्रुवन्ति विज्ञा व्यवहारजातं, सत्यप्रतिज्ञं प्रकृते विवादे ॥१६॥

एकत्र सर्वाणि भवेयुरंहः-स्थानानि, पक्षे पर उक्तिरन्या।
तयोर्मृषोक्तावधिकाऽघतातिर्-यतो न तद्वान् व्यवहर्त्तुमर्हः ॥१७॥

जिनेन्द्रसूत्राद्विपरीतवादी, भजेदनन्तानि जनूंषि नित्यम्।
बोधिर्भवेदस्य यतः सुदुर्लभः, परानृतोक्तौ तु विकल्पधाम ॥१८॥

अन्तमुहूर्त्ताद्भवतीह मुक्ति-र्मिथ्यादृशा यद्यपि शुद्धमार्गात ।
उत्सूत्रवाचा तु स एव दुर्लभो, भवेऽत्र तद्वद् च भवान्तरेष्वपि ॥२९॥

अतीतसङ्ख्या परतीर्थिका जने, श्रुते तु सन्त श्रुतमार्गबाधका ।
प्रोक्ता यत स्युग्रहभेदिनो जना , प्रचण्डदण्डस्युभ्य उग्रचण्डा ॥३०॥

गोशालको यद्यपि मृत्युकाले, सम्यक्त्वमाप्तस्तदपि प्रयाता ।
भवाननन्तान् जिनवीरवाचो-ऽन्यथाकृतौ सन्ततमाप्तमोह ॥३१॥

उत्सूत्रवाचो न नरा पराक्या-स्तत्त्वेऽपि यत्र तदुक्तिमाश्रिता ।
श्रुतोक्तिबाह्या इति ते न जना, अव्यक्तताढ्या इति शास्त्रकारा ॥३२॥

यत्र प्रवक्तृत्वे न जिनेशमार्गा, विक्ता जनेषु व्यवहारिकेषु ।
तत्राऽन्ययूथीयवदेव तस्य, कृते श्रुत कल्पत आर्हतानाम् ॥३३॥

जनो भवेद्दुष्पमयाऽर्हदुक्त-मार्गाबबोधी सुरुचिश्रितश्च ।
अल्प , प्रभूताश्च भवेयुरर्ह-दुक्तेतिमत्या विपरीतवृत्ता ॥३४॥

यथा ह्यशक्तो निखिलाङ्गिहिंसा-विरतेऽसौ त्रसघातवर्जी ।
तथाऽत्र संसारगतो न सर्वा-नृतोक्तिहानौ प्रभुतापन्न स्यात् ॥३५॥

स्थूलानृतोक्तेर्विरत स जह्या, कन्यापशुभ्यित्यनृतानि नित्यम् ।
लोके यथाऽसौ भवति प्रतीतो, न स्यान्मपायादपर पुण्य ॥३६॥

जनेऽपराधस्य विनिन्दितो यथा, कर्त्ताधिकस्तत्र भवन् हि साक्षी ।
सक्षिन्य न स्यात् प्रतिभूस्तथात्वे, न्यासे न लुभ्येच्च परेण दत्ते ॥३७॥

विवर्जयन्नेवमसत्यमुग्र, क्रमेण सर्वानृतवर्जनाय ।
भवेत्समर्थो निखिलानि दध्यता, लघौ कृतोऽभ्यास उदारभावे ॥३८॥

ज्ञेया जिनाः सुगुरवो विविधाश्च धर्मै-
र्भव्यैर्जिनेशगदिताऽऽगमशुद्धवाण्या ।
चेत्तां करोति विपरीतपदार्थनिष्ठां,
कोऽन्यो भवेत् सुकृतिनामपरो हि वैरी ॥२९॥

त्यक्तं गृहं धनयुतं निजका जनाश्च,
दीक्षा धृता गुरुजनः परिचारितश्च ।
तप्तं तप उदितमोहरजो विधूतं,
कृत्वा पुरो जिनपतेर्वचनानि चित्ते ॥३०॥

चेत्तानि लोकवचनैर्न हृदि ध्रियन्ते,
लोकानुसारकृतये निजमानसाऽऽस्थाम् ।
त्यक्त्वाऽर्हदागमगतां त्रिविधेन वृत्ति-
र्हा हा हताश ! तदमाप्य पुनर्निमग्नः ॥३१॥

दुर्वारजन्मजलधौ शिवमार्गदायि,
जन्माऽऽश्रितो यदि तनोषि कुकर्मनाशम् ।
मार्गे जिनेशगदिते हृदयं समेति,
भ्रान्तः सुभाग्य उपयाति सुवर्त्म वक्तुः ॥३२॥

यद्येकमेव जनमानयतीह मार्ग,
दत्तोऽखिलेऽपि पदहो ह्यमारेः ।
लुप्त्वाऽर्हदागमवचो भववारिराशौ,
स्वाऽन्यान् जनान् निविशतो भविता गतिः का ?॥३३॥

लोकोपकारकरणैकनिबद्धकक्षा,
मोक्षप्रवीणमतयोऽङ्गमुखं वितेनुः ।

शास्त्र विशुध्य तत्पि मितथोक्तिलीना-
मन्धानुकार उन्तिऽयकरे मणौ हा ! ॥३८॥

यक्त्वा राज्य राष्ट्रकोशादि र्गप्त, हत्वा मोह निष्कषाय प्रयात ।
पेत्य मन् देशयामास तीर्थं, तल्लुप्तन् हा [भवगतिरमणो]
निर्मनो देवलुप्तौ ॥३५॥

ग्य मलयम सुधर्मपन्ग मत्वा मना तन्मना,
यो जैन स भवेद्भवेा मुनिपु प्राप्तप्रमोदोदय ।
तद्वत्मु प्रभुतापत्पु निहताघेपु प्रहृष्टा स्तुतिं,
मयपु म्यनेपु मुल्वलमना यो घणयेत् सर्यन्ग ॥३६॥

इति विंशोऽध्याय ॥

। एकविंशोऽध्याय । (अस्तेयव्रताधिकार)

जनोऽयं मनुते मृतायमने त्याग पर दुष्कर,
यस्मात्पणमन्तगाधधरण तस्माद्दुरत्याग्रिनम् ।
येत्तद् गृधत आत्मलाभरमिकैन्त्त तदीशेष्टदा,
न स्याद्दोषभरस्ततोऽतियतुलो यत्यं ततो धार्मिकै ॥१॥

धौव त्याज्यतया मत परमते सर्वं तथाप्येतकं-
विप्रगाढलवादि नोल्लिमिन् मौल्य ना तस्येक्ष्यते ।
यद् व्यवहारपराधणा गन्ति यद् गृधते माधव,
धौरोऽमाधिति नो यथेप्सृणमुमेऽत्ते गर्हीत जा ॥२॥

ग्राह्य य धार्यऽपि भवेद्दत्ता-दा तदादा यत्र न स्यात ।
ग्रायश्चेगृहा उद्धन न, गृणापि लेग्यहते ह्यन्यत् ॥३॥

तिलापहाराय सुतः प्रवृत्त–श्चकार चौर्यं नृपदण्डयोग्यम् ।
स्मृत्वा स्ववृत्तं जननीविकल्पतं, स्तनस्य मातुः परिकर्तनं यतः ॥४॥

समुत्सृष्टं स्वाम्यं स्वधनजनगतं सर्वविधया,
गुरोः पार्श्वे दीक्षां यदि च चरितुं स्वीयकथनम् ।
गृहीता यावत्तदपरजनगतं जीवनकृते,
भवेद्याच्यं सर्वं यदि च भवतीहार्पितभुजः ॥५॥

अतोऽहिंसां धर्मे मुनिपतिरिहोक्त्वा वृतिकृते,
जगौ साधोर्भिक्षाचरणविधिगं वाक्यनिचयम् ।
परैस्तीर्थ्यैस्त्विष्टं सकलखदनं स्वीययमने,
यतः प्रोक्तं प्राणावनकरणतोऽघं नहि भवेत ॥६॥

भवेद् गृहस्थेषु परं मुनीनां, भक्तादि याच्चार्थगतौ विमानम् ।
तथाप्यदत्ते च परिग्रहेऽपि, व्रतोद्यतानां नहि दुष्करं भवेत् ॥७॥

आश्रयाशनवसनपात्रगं, न केवलं मुनिस्त्यजेदनर्पितम् ।
अर्पितेऽपि धनिना तदिच्छया, भोग एव यतिनां व्रते हितः ॥८॥

यत्र नास्ति धनिनः क्वचित् पदे, सत्त्वमाश्रितावनाय तु ।
योग्यमेव तदपि याचितं भवेदवग्रहग्रहणमित्युदीर्य च ॥९॥

जिनेन्द्रशासने मताश्चतुर्विधाः, समर्पकाः
धनी भवी जिनो गुरुश्चतुर्विधः । ततश्च तेषु याचना ॥१०॥

अन्तरायहानितो भवेत्तु लाभ आत्मन–
स्ततस्तदर्पणाद्विना ग्रहे तु लाभबाधनम् ।
परस्य सत्कमीप्स्यते विना व्रतस्य साधनं,
तदापि लाभबाधनं भवान्तरेषु लाभहृत् ॥११॥

यद्यपि साधनमिप्यत आर्हतात, तदपि सयमपोषणकार्यत ।
गृहीतमप्यणु तद् भवेत, कुलगणाश्रितमुज्झितमाश्रये ॥१२॥
तनुमनोवचनानि परिग्रहो, गुरुपदेषु समर्पयतो न हि ।
अननुमत्य गुरून् स्फुटमान्नात, धृतिरदत्तपरिग्रहसङ्गकृत् ॥१३॥
अनुज्झि तत आदित आर्हता, मुनिजना सतत नितराश्रिता ।
गणिपते बहुवेलविधिं व्यधु-र्भवति चानमदत्तसमुज्झनम् ॥१४॥

स्वामिता तिरश्चि यावदात्मजीवन भवे-
न्नरस्य षोडशाद्विका प्रभु पितुस्तु लौकिकी
(ऽन्वयायुते च वप्तरि) ।
मतेत आरत श्रुते मुना हि शिष्यचोरिका,
सुसयमापण न तत्र रक्षण तथाविधे - ॥१५॥

याचित्वाऽऽहृतिवस्त्रपात्रनिचय साधुर्न विज्ञापये-
दाचार्यप्रमुख स्वलाभरतिरम्यत्तत्प्रहायार्थयात् ।
श्रेष्ठोऽसौ न मत शिवाध्वगमने यत् सा महारोधिका ॥१६॥

श्वासोच्छ्वासोऽपि साधोन भवति गणिनामाज्ञया वर्जितो नु,
का वार्त्ताऽन्यस्य करणे चरणगतविधौ तस्य यन्न प्रभुत्वम् ।
क्षुत्राऽप्यर्थे यतोऽसौ न धरति तनुक नैव गृह्णात्यत्त,
दृ शस्य चेत्तदेतद् जिनमुनिविधय सर्व एवविधा वै ॥१७॥

मुष्णाति धाटी विजने धनेशान्, मुष्णन्ति चौराश्छलमाप्य लोकान्।
विमुच्य लोकान् छलशक्तिहीना, सव मदीय कथयन्ति विप्रा ॥१८॥

न चोपकाराय जनस्य चौय, यतो भयात्तस्य भवत्यतद्र ।
अनथकृन्नैव परार्थकारी, तथाऽत्र मुष्णन् परकीयमथम् ॥१९॥

राज्ञोऽपि देशेषु परेषु सत्ता–कृते समित्याद्विकृतिर्न युक्ता ।
चौर्ये कृतेऽन्योक्तिविरोधरोधौ, न्यायादपेतौ किमुत प्रशंसा ॥२०॥

मुग्धान् प्रतार्यार्थक्षयं प्रतन्वन्, एतत् सहस्रैर्गुणितं प्रदाता ।
भवे परस्मिन् भुवनेश इत्यपि, वदन्नहा ! किं जनतारितामाक् ॥२१॥

कार्यं निजैः श्राद्धमवश्यमार्यैः, परेतमातापितृपुत्रमुख्यैः ।
इत्थं वदन्तो नहि दग्धवृक्षं, निषिच्य लोकान् फलभाजनं व्यधुः ॥२२॥

मत्वा पापं चौर्यमाचर्य मूर्खाः, पातं श्वभ्रे निश्चितं
लम्भितारः (कुर्वते ते) ।
चेद्धर्मेति प्रोच्य मुष्णन्ति मुग्धान्, काऽमुत्र स्याद्दुर्गतिस्तादृशानाम् ॥२३॥

ये स्वं निगद्य परमेशतयाऽवतीर्णं,
भक्ताज्जनाद् द्रविणधान्यवराङ्गनानाम् ।
आदाय विष्णुवदिहाऽधमकार्यवाहा,
हा हा ! स्वभक्तसहिताः कुगतौ कथं स्युः ॥२४॥

भक्तान् मृतान् परगतौ सुखसाधनानि,
लेखं विलिख्य परमेश्वरतोऽर्चयामि ।
उक्त्वा हरन्ति धनसञ्चयमाश्रितेभ्यः,
केऽन्ये मलिम्लुच इहाम्र इमेभ्य आत्थ (विधर्मवन्तः)॥२५॥

एवंविधेषु कुमतेषु षटचरत्वं, दृष्ट्वा श्रयेद् व्रतपरान् गुरुदेवधर्मान् ।
जैनः परत्र सुगतेर्नियमाद्धि पात्रं, यस्माद्धिशुद्धमतयः
सुरसिद्धसौख्याः ॥२६॥

यद्यपि शुद्धं धर्मं मत्वा, तद्वन्तं समुपास्य सुभक्त्या ।
गच्छति दिवमुदितात् शुभपुण्यात्, किमुताणुव्रतधरणे लीनः ॥२७॥

शुद्धा यो विदधाति सत्यवर्तिं तस्यैव धर्मा वरं,
पूजायामित उक्त एष शुचिता भावाधिकारे सदा।
शुद्धिं सङ्गत एष एव मुनिभिर्धर्माधिकारी मतो,
जैनोऽतो भवतीह सद्व्यवहृतौ रक्त शिवेप्सुयत ॥२८॥

फलार्थिनोऽन्यस्य न दुर्दशाया, घृणा भवेत् किन्तु परो हि तोष ॥२९॥

द्रव्यादिनाशे जनिते कुवृष्ट्या-दिभिर्न लाभ प्रबल प्रतीच्छेत्।
भवेत्त प्रशस्ता जनिते ह्युपद्रवे, पाप च तस्या अपि घोरदु खम् ॥३०॥

प्रयोजयेत स्तेनविधौ न चारान्, आनीतमर्थं न च तै समर्घम्।
ज्ञात्वाऽऽर्तदीतालपधनेन नैव, समानरूप न दधीत वस्तु ॥३१॥

प्रजाभिपिक्तो हितकृत्प्रजाया, नृपस्तनोतीह सुनीतिमर्हाम्।
व्यतिक्रमेनैव जिनेन्द्रधर्म, ज्ञात्वा सुनीतिप्रवर स जैन ॥३२॥

मान तुला नैव धरेद् विहीना-धिका यदतद् व्यवहारि चौर्यम्।
समाचरन् सद्व्यवहारधर्मेन-सुपार्जितार्थेन सुपात्रपोषी ॥३३॥

न चैव धर्मार्थमुपार्जयेद्धन, चेत्तर्हि धर्मार्थमघानि सृजेत्।
मृत्योर्बिभीतो वृजिनाप्तिवर्जी, भवेत्त सदा न्यायपर स जैन ॥३४॥

कर्त्तारं प्रति गच्छतीह दुरित नाकृतकृ कर्म यत्,
सत्यप्येवमसौ सदा विहरति प्राप्याऽऽर्हत शासनम्।
न स्यात्तस्य विगर्हण नयपथोल्लङ्घात् परत्रार्हतो,
धर्मा येन भवेत सुदुर्लभतरो जैनो रत स्यान्नये ॥३५॥

अन्यायागतमर्थमर्पयति सोऽर्थेशान् नयेप्सुर्यदु,
स्यान्चैत्यस्य विधौ क्षमो जिनपतेरर्चा विधातु यत्।

सङ्घस्याग्रत उच्यते विधिपदेऽर्थस्यास्य शुद्धिः कृता,
तत्तत्स्वामिसमर्पणाद्भवतु मे मत्स्वार्पणात् सत्फलम् ॥३६॥

अन्यायोपगतं धनं न यमिनोऽर्थाय व्ययाय क्षमं,
यच्चौर्यागतगोमयेन विहितं भोज्यं परां विकृतिम् ।
मत्वा चौर्यमति चकार मुनिपे हारादिराशेः स्फुटां,
वान्तेऽस्मिन् प्रतिसञ्जहार वणिजं तं तन्नयं साधयेत् ॥३७॥

जैनो यद्यपि साधनं विमनुते सांसारिकी सत्क्रियां,
सल्लोकानुगतश्च नीतिसहितां द्रव्यस्य सिद्धौ तकाम् ।
तत्त्वेनायमुदाहृतिप्रचयतो द्रव्यागमं वुध्यते
लाभस्य प्रतिवन्धके विलयिते जैनः परोऽसौ मतः ॥३८॥

इत्येकविंशोऽध्यायः ॥

द्वाविंशोऽध्यायः । (ब्रह्मव्रताधिकारः)

मतं ब्रह्मचर्यं समैस्तीर्थनाथैः, सदा मूलभूतं सुधर्मोद्धुराणाम् ।
शिवाप्तिसुवृक्षस्य तज्जैनवर्य-स्तुवीतैतद्धरणोद्यतं च प्रकामं ॥१॥

जायन्तेऽसुभृतामसङ्ख्यविकलाक्षाणाममेया व्यथा,
गर्भोद्भूतिभृतां नृणां नवशती वाध्येत सञ्ज्ञायरैः ।
लक्षाणां विषयेप्सया नरभवे दुर्धार्यमेकं व्रतं,
तत्पष्ठप्रतिमाश्रितेऽपि कथितं यावद्भवं धारणम् ॥२॥

देवा स्वनायकयुता* प्रणमन्ति नित्य,
धैमानिका भवननाथसुवर्णसङ्घा ।
ये दुष्कर व्रतमिद शिवसाधनोक्ता,
नित्य सुचेतस इह प्रविधारयन्ति ॥३॥

श्रीमज्जिनेन्द्रविततो हट एष पन्था,
शुद्धागमेन यशसा पदमानीतश्च ।
विद्वद्वरैर्द्वयमयोऽत्र पुनश्चतुर्थ-
ऽन्योऽध्वा मतोऽयमपवादपथस्वरूप ॥४॥

मोक्षाध्ययायिजनतानिदित समग्र-
जैनागमै सततवारितमेतदह ।
रागद्विषादिभृत एतदुदीर्यते न,
मोक्षाध्ययानपरमारिसमौ यतस्तौ (च ता स्त) ॥५॥

यद्व्रत्य सकलनातिगतिस्थिताना ससारिणामिह पर नरजातिसस्थ ।
शक्नोति रोद्धुमलमेनमुदित्वरश्रीराप्तागमोक्तिमर व्रतमादधीत ॥६॥

कस्याश्चिन्न विवेकसम्पदमला तत्पूर्विका च क्रिया,
कस्याश्चिन्न विचारवर्तनगत सम्पत्ततेरान्तरम् ।
नृत्वे ह्येव भवेन्मतेरनु पुनश्रेष्ठा विचित्रालतो,
ब्रह्म स्यान्नरजन्मसु न तु पुन शेषेऽङ्गिसार्थे क्वचित् ॥७॥

मोक्षो यद्यपि लभ्यते व्रतधरैराप्तागमोदीरिते-
स्तत्रापि प्रशमैकहेतुरमल ब्रह्मैव सत्कारणम् ।
यत्तिष्ठन्नरजन्मधारणपरो मुक्तिं न चेदाप्नुते,
कामोद्रेकपरम्परन्न न मत सिद्ध द्वितीय पदम् ॥८॥

संसर्गतोऽन्न वनिताजनसम्भवात्तु,
शेषाघसङ्क्रतिपदानि न दुर्लभानि ।
पापप्रचारणपदं प्रतिबुध्य तत्तत्,
त्यागो जिनेश्वरमते प्रथमो मतोऽस्ति ॥९॥

मैथुनं भवति तत् त्रिधा त्रिधा मनोवचस्तनुभिराप्तसङ्गमे ।
यत्कृतं स्वयमपि च कारितं शस्तमेतदपरं त्रिधा पुनः ॥१०॥

यद्यपि पुनरिदं त्रिधा भवेत् मानुषामरपशुप्रभेदतः ।
वर्गणाधिकारतः पुनर्द्विधा वैक्रियं परमुदारकायजम् ॥११॥

भेदा अष्टादशामी प्रवरवृजिनदास्तेन तावन्त आप्तै-
भेदा अब्रह्मजाताः श्रुततनितनने स्पष्टमुक्ता मुनीनाम् ।
भेदास्तावन्त एव प्रवरमुनिवरैर्ब्रह्मचर्ये हि प्रोक्ता,
आदेया धर्मधुर्यैर्यदि शिवगमनं प्रेप्सितं स्यान्निरागः ॥१२॥

स्त्रीणां कृते जगति देशधरेषु पूर्वे-
सङ्ख्यातिगा जनविनाशकरा महान्तः ।
यद्विग्रहास्तदवबुध्य नरः सुखार्थी,
कुर्यात् सदा विरमणं परदारसङ्गात् ॥१३॥

विद्येश्वरोऽथ वचनातिगकीर्तिपात्रं,
सानिध्यसम्पदधिको नियमाद्दतोऽपि ।
सैन्यं प्रचण्डबलवत् सततं दधानो,
हा ! रावणः क्षयमितः परदारक्तेः ॥१४॥

श्रेष्ठ्यासीद् दृढशीलमानसधरो राज्ञ्या कृतान् सोढवान्,
उपसर्गान् विविधान् सुदर्शन इति प्रौढेन नाम्ना पुरा ।

यद् दृष्ट्वा नृप आश्रित मुनिसम त क्षामयित्वा भृश,
जाता चाऽमरसम्पदस्य सुवरा गाने व्रतस्य स्थिते ॥१५॥

यद्यपि प्रतिव्रत मुनीश्वरैस्तु भावना ,
पञ्च पञ्च कीर्तिता स्थिरत्वसाधनाय ता ।
दुराचर मत त्विद जिनेशशासनाधिपै-
मतोऽधिका मता नवैव घृत्तयोऽत्र बाह्यये ॥१६॥

व्रतेषु शेषेषु विनाधनोत्थितौ, यथा मता साधुपदैकभावने ।-
प्रोक्ष्याऽत्र तासा उदितस्वरो नहि, नेगे यथा स्यान हि घृत्तयस्तथा॥१७॥

नैवनवासो ललनाजनेन, नाऽस्या पुरो वा कथयेत् कथा न ।
नासीत साधुस्त्वयैव आसन, विलोकनीयानि न चेन्द्रियाणि ॥१८॥

गुप्तान्तरस्थो न भवेच्चु तस्या , स्मरेच्च नैवामरतिक्रियाया ।
उन्मादकारीणि न चाऽनुवीत, यद्वाग्नो नैव भवेच्च साधु ॥१९॥

ल्दीरिते यद् क्षमा न स्तिन्तु, प्रागेव रक्षावरणे समर्था ।
ता घृत्तयो यत्नभव यत्नाता, क्षेत्रस्य शिष्टा धृतिराप्तमुर्त्यै ॥२०॥

मुनीश्वरा पञ्चमहाव्रतौ मता, शियाप्तिकामा निरघा वदन्ति ।
तथाऽन्यनन्य जगुराप्तपाता , सद्ब्रह्मचर्यं यदनीतमन्यम् ॥२१॥

स्थितो जिनेनोदितमाधुमार्गे, तप प्रभावात् शमिताश्च घोरा ।
तथापि योषित्पुरुषाप पात, धर्तार गत्वा सुदुष्करक्रिया ॥२२॥

गुरो पुरे धाम उदीयते हा , सद्ब्रह्मचर्य मुनिमार्गसौं ।
साधो समग्रा मुनिमार्गचर्या, क्षान्त्यादिधर्मे दृगमङ्क्यमाने ॥२३॥

स उत्तमन मत तु धर्म, गुणोऽयनुत्तो मुनिमूलमार्गे ।
तथा च तत्रैव स्थिरतनाया, मूलस्य रक्षाकरणाय तस्तु ॥२४॥

निवृत्तिरूपाणि महाव्रतानि, ततो मिथुनाद्विरतिर्न्यंगादि
ब्रह्मार्थकत्वे गुणताऽऽत्मतत्त्वे, न तत्प्रतिज्ञा न भवं च यावत् ॥२५॥

हिंसादिवच्चेदमघस्य धाम, लोके प्रतीतं मिथुनं ततोऽस्मात् ।
प्रसिद्धरूपा विरतिर्जनेषु, लोकोत्तरे चाध्वनि सुष्ठु गीता ॥२६॥

मानुष्यकं ब्रह्म समाचरन्तो, गवाश्वरं तत्तु विहेडयन्ति ।
तल्लोकवृत्तेर्विहितं न तत्त्वाद्, वधादसूनां विनिवृत्त्यभावात् ॥२७॥

ये ब्रह्मचर्यात् परिभ्रष्टिमाप्ताः , सद्ब्रह्मचर्यान् यतिनः पदेषु ।
स्वीयेषु भ्रष्टाः परिपातयन्ति, प्रेत्यापि तेषां न वृषाप्तिरर्हा ॥२८॥

अमैथुनाः सन्ति दिवौक आद्याः (सुधाशनाद्याः),
परं न तेषां वृषलाभ उक्तः ।
भवस्वभावाद्विरतिर्न तेषां, तस्या अभावे न च संवृतत्वम् ॥२९॥

कृतेरभावे यदि स्यात्तु संवरो, व्यङ्गेन्द्रियाणां सविशेषतः स्यात् ।
एकेन्द्रियाः सूक्ष्मतरा न कञ्चि-न्निघ्नन्ति ते नैव परैश्च हिंस्याः ॥३०॥

प्रतिक्षणं स्युः परिणामभेदाः . स्थास्नुव्रते स्यादुररीकृते तु ।
विना प्रतिज्ञां करणैर्न चोक्तं, प्रामाणिकत्वेन लिखेत्कदाचित् ॥३१॥

ननु व्रताज्जीववधाद्विरक्ते-र्गतार्थमेतत्कथमुच्यते वै ।
यतोऽङ्गिनां स्थावरजङ्गमानां, वधाद्विना नैव भवेत्तु मैथुनम् ॥३२॥

सत्यं जिनानां पृथगेतदस्ति, न मध्यमानां जडताभृतां पुन
राद्यन्ततीर्थं यतिनां विभिन्नम् ॥३३॥

गच्छत्सु घातं न ऋजुः प्रयोगः , कायेन वाचा मनसा च कश्चित् ।
न चात्र वीक्ष्यन्त उपद्रुताङ्गा-स्तेनेदमुक्तं पृथगेव विज्ञैः ॥३४॥

परिग्रह स्याल्लनाङ्गसङ्गो, स्वीये परास्येऽपि समानमेतत ।
तत श्रुते तदुक्तपाठ एव, विभिन्न उक्तो मुनिभिर्द्वयोस्तु ।
भवेद्विरक्तियतिना बहिर्द्वा-नाद् द्वयोश्चात्र समागम कृत ॥३५॥
त्रिधा त्रिधा यतिनामिद पुन , श्राद्धास्तु विविधैरभिग्रहै ।
अणुव्रतेऽत्राप्यतिचारभावना द्विर्द्वैकधाश्रित्य धुरधुरोदिता ॥३६॥

जैन सम्यग् विशदमनसा सस्तुवीतास्तवगँ,
यावज्जीव धरति शिवद ब्रह्मचर्यं पराश्च ।
श्राद्धान् काँश्चिद् व्रतरतिमनस शक्तितस्तद्व्रतश्च,
ससाराब्धौ जनुरिदमनघ दुर्लभ प्राप्तुमेतन् ॥३७॥

इति द्वाविंशोऽध्याय ।

। त्रयोविंशोऽध्याय । (अपरिग्रहव्रताधिकार)

जैन स एव मनुते गतकिञ्चन यो,
मोक्षाध्वमाधनपटु निजमुक्तिसिद्धयै
(रागद्विषान्वितमेतत्पृवजालम्)
यस्मिन्नरेश्वरसुरेश्वरसन्तति स्यात्,
प्राप्तावतारमृतिसङ्कलिताऽघपूर्णा ॥१॥

अन्ये महा परिमिताभ्रविचारिण स्यु ,
काल चरन्ति निजराशिगतास्तु व तम् ।
चत्रा गतिं क्वचिदमी दधते स्वराशौ,
कि त्वेष सर्वविषमो महदुग्रूप ॥२॥

प्रेत्य ग्रहारते न तु सार्द्धसंधाः, न गर्भगानां प्रचरन्ति सार्थम् ।
स्वस्यैव ते तन्वत आधिजातं, कदापि सम्पत्तिमतुल्यरूपाम् ॥३॥

अयं तु सर्वासु चरन् दशासु, किम्पाकवत् स्याच्च मुखे सुखाय ।
अनन्तदुःखार्पणतत्परोऽन्त्ये, परो न सर्वज्ञमृतेऽस्ति(स्य)वे (मे)त्ता ॥४॥

अनादिकालीनसमस्तजीव–राशिस्थ आद्येकपदं नराणाम् ।
एकादशं स्थानमितोऽपि साधुः, प्रत्येति तस्मादपि मूलमाद्यम् ॥५॥

अभव्यजीवाः परिपाल्य शुद्धं, चारित्रमग्र्यं सुभलेश्यया ऽऽढ्यम् ।
पुनः पुनर्भ्रान्तिमनन्तकालं, सदा चरन्तीह परिग्रहेण ॥६॥

सदा ग्रहं विष्ट उदित्वरं न, नरः प्रयातीह सदा ग्रहं त्वमुम् ।
स्यादात्मतन्त्रोऽपि गतात्मतन्त्रो, वेत्त्यात्मतत्त्वं विदितात्मतत्त्वः ॥७॥

लोकोत्तरेऽयं त्रिविधे सचित्ते–ऽचित्ते च मिश्रे द्रविणे प्रगीतः ।
भावे च तत्त्वं कथितं जिनेशैः, मूर्च्छालवोज्झं द्रविणं किलास्य ॥८॥

अशोकवृक्षादिमहर्द्धिमत्त्वं, परःशतानां यतिनां प्रसुत्वे ।
अनन्यरूपा बहवोऽतिशेषाः, निस्सङ्गचक्रेष तथाऽपि गीतः ॥९॥

अतः स्वकीयाननगारिणो न, हठान् क्रियां कारयतीह सूरिः ।
एते मदीया इति वक्ति नैष, परिग्रहप्राप्तिभयाकुलत्वात् ॥१०॥

आदेशदाने यतिनां तदीयां, याच्ञामधिप्राप्य न चेत्स पिङ्गः ।
आज्ञापयितव्यपदं न तेषां, परिग्रहान्तःकृतिता च नैवम् ॥११॥

साधवो विदधति प्रभून् प्रति, मार्गणं प्रतिक्रियं न तद्धठात् ।
यद् विदन्ति तेन भाविनीं, व्यथां ततो मुनीशवाचया प्रवर्त्तनम् ॥१२॥

प्रविव्रजन् श्रीजिनराजपार्श्वे, यदात्मनाऽऽख्याति भविष्यदिच्छाम् ।
तदापि साहाऽत्र न विघ्नकार–स्त्वया विधेयस्तव सौख्यवृत्तिः ॥१३॥

धर्मार्थपापप्रतिषेधकारण, महाव्रतोच्चारतदर्हशिक्षणम् ।
सूत्रार्थदान शिवमार्गवार्ता, परिग्रहित्व नैकृतमेप्वमीषु ॥१४॥

स्थानेषु धर्मस्य ममत्वभाव, धरन्नपि स्यान्ममताप्रसङ्गी ।
परिग्रही यन्नहि धर्मधाम, प्रमादपोषाय जिनै प्रगीतम् ॥१५॥

कुलीनता बुद्धिरनुत्तमा यदि, बल च बालभ्यकमग्र्यमाप्तम् ।
परामिभावाय यदि प्रयुङ्क्ते, तान्येव तस्य प्रभवन्त्यधाय ॥१६॥

गृहीतिराऽऽद्रावनगारिणा या–ऽऽहारोपधे स्वीयशिनाप्तिसिद्धयै ।
परिग्रहो नैव, यतो ग्रहो न, प्रयुक्त एक परिणा सहोक्त ॥१७॥

पराणि पापप्रणयानि यानि, धामानि नो तान्युपसर्गयन्ति ।
ततोऽपवादीयपद विरुद्धे नाशोऽपि नैवात्र परे परत्वे ॥१८॥

एव जिनाद्यबहुमानवृत्त्या, स्मृत्वा च तेषामसमोपकारिताम् ।
आराधकोऽर्चादिकपूजनाद्य–मर्चामुखस्यात्स्वशुद्धिदध्यात् ॥१९॥

न तत्र तस्याघपद परत्र, वेद्य न दोषश्च गुणोत्तमानाम् ।
देवेशचीणा प्रतिमाहदर्चां, निषेधयन्नो किमघप्रधान ? ॥२०॥

श्राद्धस्य धर्माऽस्थिरजन्तुरक्षा, सदा प्रवृत्त क्षितिमुख्यनाशे ।
पूजाकृतौ योग्यपदानुसार–दर्हद्गुणेष्वेव भवन्निमग्न ॥२१॥

यथा त्रसाना हननान्निवृत्तो, मद्ये च मासे च सदैव भीत ।
यथा तथा सो भवतीह मथुने–ऽधिकेऽपि मानुष्यवधाघलेपे ॥२२॥

नाज्ञानभावो न च निर्दयत्व, गुणैकराग प्रभुपात्र्यो पुन ।
न चेन्मुनीशादिनति शिवाय, तत् कर्मबन्धस्य यत प्रशसा ॥२३॥

नैर्यापथो बन्ध उदस्य क्षीण–कषायितां सा च न दीर्घकाला ।
विहाय सार्वज्ञ्यधरं ततोऽमी, सप्ताष्टबन्धा नियमाद्भवावलौ ॥२४॥

मतं न निर्वासस उद्यमाढ्य, शिवाय योपक्रिययोपयोगि ।
सत्संयमे स्यादुपकारकं त–ल्लिङ्गाच्च धर्माच्च बहिर्भूतास्ततः ॥२५॥

न भावलिङ्गं नियतं तदेषां, नाग्न्येऽभिनिवेशश्च मते ह्यमीषाम् ।
ततश्च कैवल्ययुतां शिवाप्तिं, निषेधयन्तीह दिगम्बराः स्त्रियाम् ॥२६॥

नार्या यतः स्युः शिवसाधनक्षमा, विहाय वासांसि तदीयधर्मे ।
न चाङ्गनानां गतचीवरत्वं, न तैर्जनेषु प्रसृतैक्षि योगिनी ॥२७॥

सत्साधनानामुपकारकर्तृता–मुदस्यता तेन निराकृताः समम् ।
ईर्यादिका, येन न ता भवन्ति, विनोपकर्तृन् प्रयतात्मनामपि ॥२८॥

गृह्यन्यलिङ्गेषु शिवाप्तिभावो, माधुकरी या च मुनीशचर्या ।
तथा जिनार्चा नयनादियुक्ति – न्यषेधयेत् सर्वमिदं विबुद्धिः ॥२९॥

ये लुम्पकाः कुर्वत ऊननाम्ना, तपो यथोक्तोपकृतीः प्रतीत्य ।
दयामुखास्ते वधमङ्गिनां यतो, जिनान् विहायास्त्यवमो न तासु ॥३०॥

अणुव्रतेऽस्याऽऽद्रियते स्वकेच्छा, मानाधिकस्य विरति ग्रहस्य ।
इच्छा यतः प्राप्तधनानुयाता, सदा न सेत्यस्य मतं व्रतत्वम् ॥३१॥

ग्रहेऽप्यमुष्याग्रत आचरेन्न, क्षेत्रादिभेदेषु परिग्रहेषु ।
अन्यान्ययोगक्रयणप्रकारान्, स्तुत्यः स एवाणुधरोऽपि सद्भिः ॥३२॥

वदन्ति केचिज्जठरादिपूर्त्ते – रावश्यकोऽर्थस्तत आदरार्थः ।
मिथ्या, यतः सन्ति जना अतृप्ताः, समृद्धिमत्स्वीश्वरनिर्जरेषु न
(न्तोऽमरनायकास्तथा) ॥३३॥

अन्यानि पापानि समाचरन्त , प्रवृत्तयोगास्तदुपाददाना ।
गृहीतमर्थं मनसीहयित्वा, पुरश्च पश्चाच्च धृथाघचित्त (चेता)॥३४॥

रौद्र ध्यान लीनताभाग्धनेषु, धत्तेऽक्षाणा पुष्ट्येऽर्थं प्ररक्षन् ।
मृत्वा याति तादृश कुत्सिताया, तिरग्जातौ लोभरक्षापरायाम् ॥३५॥

जीवो ह्येक सकलभवगता एति तासा व्यथा नु
सङ्गाल्लोभे स्वजनरहितत्वासु तासु प्रदिक्षु ।
आत्त सङ्ग स्वजननिधये नैव (ते) भोगकाले,
दु ख लात्वा (परवशगता) नैव दुर्यन्ति भागम् ॥३६॥

जैनोऽसौ य सदा म्याद्गतधनकनके रक्तचेता मुनीशे,
दानार्हं सङ्गत सत्सुकृत उदितभा गेहकार्ये निरीह ।
शस्तेऽसौ तोपमेत क्षुमरपदगत त्यक्तराज्याहंमान,
सन्तुष्ट सर्वदाऽसौ जिनपत्परमणो मोक्षकामो महात्मा ॥३७॥

इति त्रयोत्रिंशोऽध्याय ।

। चतुर्वि शोऽध्याय । (जिनबिम्बाधिकार)

जैनोऽसौ जिनराजिपाब्जकमले भृङ्गोपमानश्चरेत्,
धत्ते ध्यानमनारत प्रभुपदोर्मोक्षाप्तये भक्तित ।
लोकेऽस्मौ खलु दुर्लभो भविजनाम्भोजप्रबोधे रवि-
र्यत्सङ्गात्परेऽपि भव्यनिवहा स्युधमसिद्धयै क्षमा ॥१॥

प्रतिदिन प्रग आत्रत पठे—च्छुचिमनाम्नुवाच्छुचिताचित ।
यदि पर मनसा शयने स्थित , परविधिश्च परिवृत्तता गत ॥२॥

भवति नैव विधि चरतां नृणां, श्रुतगताविधिजातमघं पुनः ।
यदि च कष्टतमा ननुजास्थिति-र्नहि तदाऽविधिरास्पदमंहसाम् ॥३॥

सा मङ्गलं प्रविदधातु जिनालिरन्यं,
स्वर्गापवर्गसुखदानपरा जनानाम् ।
या दुष्टकर्मकलिलावलितः परन्ता-
द्यस्याः परा न शिवगा न च पूज्यपादा ॥४॥

गर्भावतारसमये जननीं प्रसुप्तां,
याऽदर्शयत् सकलजन्मगताङ्कधात्रीम् ।
चक्रध्वङ्कितादधिकदीप्तिधरां चतुर्भिः,
स्वप्नालिमुद्भुरवृषा दर्शाभश्च युक्ताम् ॥५॥

जिनवरा जितरागमदाः सदा, भविजनान् सुकृतालिपरोद्यतान् ।
दुरितकर्मभरात् सुगमाध्वना, विदधतु प्रवरोद्यमशालिनः ॥६॥

अतिप्रभाते जनताहृद्ब्जे, माङ्गल्यसौख्यैकघनप्रकाशम् ।
समग्रघस्रं गतविघ्नराजि, कर्तारमाप्तं सुखदं धरेद्वै ॥७॥

त्रिलोकनाथॉस्तत आप्तबुद्ध्या, हृद्ब्जकोशे धरति प्रगेऽयम् ।
परो न तेभ्यो जगदर्थकारी, स्वर्गापवर्गप्रद एव नास्ति ॥८॥

मुखं प्रगे पश्यति सज्जनः सदा, ससन्ततेराहृतनीतिरीतेः ।
असङ्ख्यकालं प्रभुता जिनस्य, विचिन्त्य वक्त्राब्जमुपस्य वेक्षे
(पश्यामि मुखाब्जमस्य) ॥९॥

शास्त्रे यद्यपि सर्ववस्तुविषयं न्यासे चतुष्कं मतं,
भावोऽर्थाकर उच्यतेऽर्हति परं पूज्याः समेऽमी यतः ।

नाम्नि श्रीमति सस्थिता श्रुतमता सञ्ज्ञाऽऽहता नोऽपरे,
तद्धन्त प्रतिमा सुरासुरनरै पूज्या द्वितीये मता ॥१०॥

निक्षत्या वरसाधनैर्जिनपद यैर्वद्धमर्नोग्भवे,
ते द्रव्ये न तु तन्नय विरहित पूज्यत्वबुद्ध्याऽन्यवत् ।
सिद्धाद्येषु चतुषु भावगतयेऽवातीर्यतेऽर्हत्पद,
सर्वा पूज्यतमा नृणामधिगता निक्षेपसिद्धा विधा ।युग्मम्॥११॥

अन्ये यद्यपि सम्भवेयुरखिला निक्षेपमत्का जिने,
शास्त्रोक्ता विधय पर न तु पन्तेषा व्यवच्छेदकम् ।
नार्याग्विद्यत उत्तमत्र पुरत किञ्चित्पन यत्सरेत् ,
तन्निक्षेपगता समेऽपि विधयो नम्या गता अर्हति ॥१२॥

तस्मात प्रणमामि शुद्धमनसा श्रीअर्हता सङ्गता,
निक्षेपस्य चतुष्टयीं महपद यन्नाममान पुरा ।
श्रुत्वा धर्ममवापतु सुरनरो दृष्ट्वाऽऽकृतिं म्लेच्छसू-
राद्रा द्रव्यजिनस्य भक्तिपरम किं नो मुकुन्द पुरा ॥१३॥

गर्भावतारसमयात्त्रिविधोऽस्मि गीतो,
यस्यैकजन्म विधिना जिननामवन्धी ।
प्रागूजन्मतोऽमुमियन् भव इत्थमेतद्,
भिन्नोऽकृता भव इतीह भवस्तु भावे ॥१४॥

इन्द्रा समग्रा भगवन्तमूचु-गर्भावतारात् न विना तु भावम् ।
कल्याणकाना त्रितय पुरेव, भवेत् प्रभूणा निखिलप्रबोधात् ॥१५॥

आहन्त्यमुक्त श्रुतदेशनाया, तथैव पूजाऽन्तिमपदादिशिक्षा ।
स्वोत्प्रेक्षितो राम इवोदितस्त-त्पेक्षया मान्य इहार्तीर्थ ॥१६॥

तदेतच्चतुष्कं जिनानां नदन् यः, स नित्यं भवेद्धून्यमानी सुजैनः।
न धार्यो न नम्यो न जप्यो न पूज्यो, भवेत्तस्य देवोऽपरः कर्मकीटः ॥१५॥

दर्शनशुद्धिकृते करोति सततं तीर्थेश्वराणां महान्,
संसारोत्तरणैकसाधकतमं तीर्थं तदीयं परम्।
भ्रान्तोऽयं भववारिधौ जनिमृतीः कुर्वन्ननन्तान् भवान्,
यत्तान् प्राप्य तदीयतीर्थमसमं स्यात्पारगः सेवनात् ॥१८॥

यथा यथा गुणोन्नतान् सुसेवया भजत्ययं.
जिनॉस्तदात्मसंश्रितान् गुणान् विचिन्त्य मानसे।
तदेव पूर्वकारणं तथा तथोच्चये यदा-
यदाऽऽत्मचिन्तया भवेत् क्षयस्तु तद्विरोधिनाम् ॥१९॥

यथाभिधानस्य महान्त आप्या, गुणाः स्मृतेः सिद्धमिदं जगत्याम्।
एकस्य [चत्] तद्युक्तपदार्थजातेः स्मृतिः स्मृतेः कारकतापदं गता ॥२०॥

अर्थेऽसौ भवति प्रतीतविषये कोशान्न सर्वो विदन्,
सिद्धायां तु जने भवेत् स्फुटमतेः सत्यां प्रतीतौ गुणाः।
चित्ते तत्र गता यदीह निपुणाः किं नाकृतिस्था गुणाः,
स्मर्तव्या हि भवन्ति चेदवयवे निश्शेषशुद्धे किमु ॥२१॥

सर्वैस्तज्जिनविम्बसन्ततिगता देवासुरैर्मानुषैः,
स्तुत्यर्चामुखसाधना सुविदितैः किन्नाऽऽदरादाहता।
स्पष्टः सर्वजनेषु यत्प्रतिमया सिंहाद्विबोधोऽर्भके,
तद्वद् द्रष्टुमिहास्ति नैव जिनपे भावाश्रितं शक्यते ॥२२॥

मूर्तिर्जिनानां शमलीनरूपं, मुखेन वक्ति प्रशमं दृशा तु।
अङ्कोऽङ्गनासङ्गविरक्तचित्त-माख्याति युग्मं करयोररागम् ॥२३॥

नासासमेत जिनदृष्टियुग्म, दृष्टिश्च कोपादिविमुक्तसङ्गा ।
चिह्न च किञ्चिन्नहि बिम्बमाने, रागस्य रोषस्य च लेशतोऽपि ॥७४॥

तद् दृष्टमेतद् भविसार्थगाना, न्यनक्ति साक्षाद्वतरागता विभो ।
न ह्यतीर्थ्या जिनराजमुद्रा–मुपेतुमर्हा शिवदा कथ ते ? ॥७५॥

मिद्धन रूपेण तदात्मजेन, यथा तथाऽर्हत्प्रतिमा नु युक्ता ।
साध्य तदेनास्ति सुदेवभाजा, स्वार्थरूपानुगता तत सा ॥७६॥

यथा यथा ता प्रतिमामनङ्का, जिनेश्वराणा निजभावरूपाम् ।
तथा तथा तस्य गुणप्रवृद्धि , पश्येदतस्ता मुहुरात्मरूपाम् ॥७७॥

नामाऽऽकृत्योर्दर्शनात् तीर्थराजा, भव्याना स्यात् सद्गुणाना त्वभीप्साम् ।
क्रमत्या युक्त ज्ञानमावश्यक स्यात , वृद्ध तस्माज्जिनजननिमुखस्थान
दृष्टेर्यदेतद् । घृत्तैनैपा शुभगुणजनकेत्नाश्रित सत्यताऽस्ति ॥७८॥

यत्रेतिहासोऽमनुमता कुले, गुणप्रदीप्ति तनुते ह्यनृनाम् ।
यथाऽमजाना प्रसवादिधाम द्वय तदत्तत् खलु तीर्थदृष्टौ ॥७९॥

पाश्चात्यानां वृषमभिलषता दर्शनस्यामशुद्धिं,
कर्तुं दक्षा श्रमणपतिगिरा श्रावका सत्प्रभावा ।
तीर्थान्यन्याधिकृतसुरकृतान्यथपूज्यत्वयेन
चक्रुस्तेभ्यो भवशतनिचित पापपुञ्ज प्रयाति ॥८०॥

सूत्रे प्रोक्त श्रुतधरणचणोऽनेकदेशेषु गच्छन्,
लब्धाऽऽगाढ (र्दर्शन) जिनजनिमुखत पावनास्तीर्थचर्यान् ।
दश दश जिनगुणगण धारयन् भूतपूर्वं,
य स्यात् साधुर्ढवरुचियुक् सूरिपट्टे स योग्य ॥८१॥

श्राद्धैस्तस्माद्विमलमतिभिः प्रोज्झ्य संसारजालं,
तत्तत्तीर्थान्यमलविधिना सेवनीयानि शुद्ध्यै ।
सम्यक्त्वस्थैतरगुणसहितस्याप्तिशुद्धी दधानः
युक्तः सर्वैः स्वजननिचयैर्वृद्धिकृच्छासनस्य ॥३२॥

निर्दिष्टा श्रीप्रवचनपटुभिस्तीर्थसेवैव वर्या-
ऽऽकल्पः सद्दृग्धरणनिपुणमतेस्तत्र यत्कामितानि ।
स्थेमोद्भावौ प्रवचनपटुता भक्तिरार्हन्त्ययुक्ते,
स्युस्तत्कामं सुकृतसमुन्वी सेवते तीर्थधाम ॥३३॥

उदयमेनमुदीक्ष्य मनीषिभि-र्नवकृतेः सुधिया फलमीरितम् ।
बहुगुणं जिनचैत्यसमुद्धृतौ, प्रयतते यदि तत्र वृषोद्धुरः ॥३४॥

तीर्थानि तत्र विविधानि पुराकृतानि,
स्युर्दीर्घकाललालितानि समुद्धृतानि ।
हेतुः फलस्य भवतीह समुद्धृतिः सा,
सम्यग् दृशो य इह प्रेत्य सुखाप्तियत्नाः
(प्रध्वरमार्गलम्भाः) ॥३५॥

यथैवाऽर्हतां भक्तिरत्यन्तभद्रा, भविष्यज्जनतानां समुद्धारिका यत् ।
तथैवाऽऽत्मधाम्न्यर्घयुक्ता यतः सा,
सदा पुत्रपौत्रादिहितोद्धुरा स्यात् ॥३६॥

बालानां सरणिर्विचारविमुखाऽन्यानुश्रितां तु क्रियां,
कुर्युस्तद्यदि धर्मकर्मणि रतं विम्बार्चने तत्परम् ।

पश्येयु स्वजन, तत स्वयमपि तत्रोद्यता स्युरर,
तच्चैत्य गृहदेशभाग उदित कुर्वन् कुटुम्ब धरेत् ।
(निलये स्थित स्वजनग धर्मप्रचार स्यात्) ॥३७॥

जनाना सार्थाऽय निजनगरगाना समभुवा,
स्थिति वृद्धि रक्षा यदि च मनुते कर्तुमसमाम् ।
तदैकस्मिन् स्थाने मिलति जनतोद्धृतिपर ,
तथा जैन मार्गाऽनयदृत्तमतिश्चैत्यमयति ।
(तदर्थं चैत्य किं न भवति भविना सुकृतिगतम्) ॥३८॥

अधिष्ठात्रा शून्य भवति भवन नैव रतिद,
सदा सेव्यो नाहज्जिनपनिचितेरस्ति मनुज ।
तत स्थाप्यो भव्यै स्वजनवृषकृतेऽस्मिन् जिनपति-
स्ततश्चार्चां नित्य तनुत त्पमाया पद्ममिताम् ॥३९॥

आकल्पोऽद्यतन मुरायति नृणा यद्वन जीर्णस्तथा,
तद्वच्चैत्यमनूतन तत इहोद्धार प्रतिष्ठापनम् ।
श्राद्धश्चतसि तद्विचिन्त्य नियत चैत्य नवीनोपम,
धाम्नि ग्रामतले च शास्त्रविधिना कर्तुं भवेदुद्यत ॥४०॥

नैवोपकार यजने जिनाना, यतो हि ते रागरुषादिशून्या ।
कनुम्नथाप्येष यत्रा प्रयुक्ते, ज्वरादिरोगप्रशमाय रत्ने ॥४१॥

वधोऽङ्गिना पापभरैकहेतु-र्न त विना नाचनमर्हदादे ।
एकाश्मजीवोद्धनने घृणा चेत्, मितिर्गृह नेतरथा विमोह ॥४२॥

तन्वङ्गनाऽऽलयमुखार्थमनन्तकायान् ,
द्राग् हिंसतां मनसि यस्य न कापि शङ्का ।
सैषां व्यथा यतनया ह्यपराङ्गिनां स्या-
न्मिथ्यात्वमोहजनितं कुमतोत्थमंहः ॥४३॥

नरेन्द्रदेवेन्द्रसमूहसत्कृता-मर्चां जिनार्चामधिकृत्य सिद्धाम् ।
विलोप्य संसारसमुद्रगानां, करोति भक्तिं स कथं विवेकी ? ॥४४॥

जिने वर्तमाने चिदानन्दपूर्णे, कृता देशनाभूमिकार्ये सुरेशैः ।
जनौ निष्क्रमे मोक्षसिद्धौ च या तां, सुभक्ति विलुप्याघभारै-
र्भ्रमी च (भवे) ॥४५॥

त्रिधा पञ्चधाऽर्चा पुनश्चाष्टभेदा, दशान्वितैः सप्तभिश्चार्हतां या ।
श्रुतोक्तिप्रपञ्चैः प्रबोढा विलोप्य, गतिं तां च गन्ता दुरावापधर्माम् ॥४६॥

त्रिसन्ध्यं जिनानां विधायार्चनं यः, स्तवैरुत्तमैः संस्तवं चापि कुर्यात् ।
सुसौख्यानि देवस्य चिन्तातिगानि, स लब्ध्वा शिवं-
शीघ्रमाप्नोत्यवश्यम् ॥४७॥

कृतं सत्फलं तेन जन्म स्वकीयं, नरेणार्हतां भक्तिकृत्येन वंशे ।
समारोपितः कल्पवृक्षोऽनुजानां, सदा स्वर्गमोक्षैकफलप्रदायी ॥४८॥

यद्यपि पूजा फलविधये स्यात्, पौद्गलजाले धनकनकाद्यैः ।
तत्तृणमात्रं शिवफलसिद्धे-स्तत्स्याद्विबुधजनस्तन्मात्रः (द्वाञ्छः) ॥४९॥

जैनोऽसावार्हतानां प्रवरगुणगणं क्षेत्रमेतच्छ्रयेत,
मूलं यत्सद्गुरूणां प्रवरगुणभृतां धर्मकार्यस्य वर्यम् ।

कल्पातीत फल यद् भवति नरगणे तन्निदान जिनार्चा,
ध्यावेति शास्त्रवाचाऽनुगतमतिकृति साधयेच्छ्रीजिनार्चाम् ॥५७॥

इति चतुर्विंशोऽध्याय ।

। पञ्चविंशोऽध्याय । (चैत्याधिकार)

स भ्याज्जैनत्वधारी जिनपतिचरणप्लावित चैत्यमाढ्य,
ग्रामे वा पत्तने वा यदि भवति तदा वासमादातुमिच्छेत् ।
निष्काणा चेच्छत सद्धरति निजवश कारयेद्वासधाम्नि,
चैत्य नूत्न यत स्यादविरलगुणभृत्पुत्रपौत्रान्विश ॥१॥

जिनेश्वराणा महनेन भावो, यथा विना श्राद्धवृषोद्वहानाम् ।
तथादिधर्मश्रयणान्विताना, भावाय चैत्य सुकृतोद्वहाय ॥२॥

वशानुवशागतसज्जनाना, गृहस्थिताहनिलयेक्षणेन ।
न्नि दिन स्याज्जिनधर्मबुद्धे-दूरव शुद्धक्षितिरोपिता या ॥३॥

निजाम्नजाना परिमानर्नीय , सार्यश्च जाप्यश्च निवेदनीय ।
को मङ्गलार्थं परिपूजनीयो, देवोऽभवत्तत्स्मरमिद्धचैत्यान् ॥४॥

जिनोपदश विनिशम्य द्धा, येनाऽऽगमास्तीर्थविलोकनाय ।
गणेशिता सोऽर्हदुद्धारचैत्य-तिं पुरस्था परिकीर्त्तयेद्धि ॥५॥

जगत्यस्मिन् सत्र नगरवरनिगमग्रामसदृश,
जनाना भूपाना निवसनजनितगौण्यमहिम ।

क्षणाद् दृष्टं नष्टं जनपदजननाशेन नियतं,
तथापीक्षन्ते जाः पुरवरपरिगतैश्चैत्यवृतिभिः ॥६॥

पुराणामुद्वसानां प्रकीर्णैर्युतानां, मतानां नृपाणां विनाशं गतानाम् ।
विबोधो बुधानां तदारम्भणैः स्यात् सुचैत्यानि दृष्ट्वा तथैवामराजेः ॥७॥

दृष्ट्वा मूर्तिं वीतरागप्रभूणां, स्याद्वै बोधो दृष्टुरात्तस्य शुद्धः ।
दृष्टे चैत्ये चित्रकीर्णे तदीया, बोध्याऽवस्था प्राक्तनी चित्तचोक्षा ॥८॥

यथा साध्यसिद्धिर्विना साधनं नो, तथा साधुतां शुद्धधर्मोद्यमाङ्काम् ।
विना वीतरागस्तदेतद्विधानं, सुचित्राङ्किते चारुचैत्ये समानम् ॥९॥

भाषा या लिपिसंश्रिता न नियता कालेन देशेन च,
प्राप्ताऽनेकश उच्छ्रितं बुधमता चित्रं तु पाषाणवत् ।
प्रेक्षन्ते समकालगा बुधजडा गच्छन्ति सत्यं पथं,
तस्मादाचरितव्यमेतदमलैश्चित्रैर्युते चैत्यके (मन्दिरे) ॥१०॥

घनरिक्थयुतैर्वरबुद्धिधनै–र्जिनवाङ्मयविद्धशुचिश्रवणै–
र्घननित्यसदागममानधरैः, श्रमणादिसुसङ्घघनिष्ठमतैः ।
शुभसन्मतिधारकसन्धिजनै–र्जनसार्थगताऽऽहतिशुद्धरवै–
रमणीयतरं वरचित्रयुतं चिरचैत्यमुदार (दीर्ण)
मतैः क्रियते ॥११॥

तदा सन्मान्यं तद्यदि च विधिना वृद्धरुचिरं,
मनोज्ञं चैत्यं चेत् परित उदिताचारततिवृतम् ।
न चास्थाने सन्तो विहितविविधाचाररतयो,
गतिं स्थानं शंसां विदधत उदर्था यत उमा ॥१२॥

रक्षाधूलीवीक्षमाणै विशल्यै, तच्चैत्य नो दीर्घकालीनशोभम् ।
शुत्व नो चेद्धरेयुस्तीना, मान्य नित्य तन्नरै सयत्ना स्यात ॥१३॥

सन्तोप्या शुचिसारवो मतिधनैयत्ते क्रियासुवर,
चैत्य सुन्दरचित्रराजिकलित धर्मप्त देहिनाम् ।
कार्याणा रमणीयतामलमिमे कुयु प्रमनान्तरा,
यद्धेन कृतिभवेद्धन्यभूचेष्टानुगा नान्यथा ॥१४॥

विम्ब यद्यपि शोभन जिनपते काम्प्रसत्त्याऽभव-
न्नैगांछान्तर भवन्ति पर चत्यं सुचित्रान्विते ।
सच्छाद्व प्रणिधीयते न विनुधानल्पप्रे सत्स्थले,
नो र्ष्टि प्रतिमहरद्विधिवश सामात्समालोकनात् ॥१५॥

चैत्येऽधिक्रियते जिनस्तनुगा चैत्ये क्रिया चित्रणे,
नो चेद्धाम्नर भवेन्न न्य तुष्ट भवेत् प्रेक्षिणाम् ।
तत्तत्कारणयोगिनो जिनपतेराश्रित्य तिस्रो दशा-
स्तोष्ट्यास्तनुजितै प्रकरणै सेऽपि सत्कारव ॥१६॥

विम्ब रत्नसुवर्णराजतकृत नास्माद्विशिष्टा नृणा,
चित्ते शान्तिरनुत्तरा भवति तु सौन्यसत्त्वान्वयात ।
तत्तत्कारव उत्तमेन धनिनाऽङ्गीकारसिद्धय ध्रुव,
सत्कार्योस्मिन्शागतै प्रकरणै स्याद्विम्बशुद्धिर्यथा ॥१७॥

यथा नृपाणा प्रचया प्रमोदा-द्राज्याभिषेके विविधक्रियामि ।
धृते सताऽऽडम्बरराजितामी-राष्ट्र महत्त्व वचनातिग स्यात ॥१८॥

तथाऽर्हतां रम्यतराणि बिम्बा—न्यशेषकारुक्रियया कृतानि ।
विना प्रतिष्ठाविधिमार्हतानां, पूजाऽऽस्पदत्वं न हि जातु यान्ति ॥१९॥

चित्रैः सुरम्ये विहितेऽथ चैत्ये, दशाहमध्ये क्रियते प्रतिष्ठा ।
प्रभोर्न चेत्तद्भवनं मनोज्ञं, रक्षोऽधमैः शीघ्रमधिष्ठीयेत ॥२०॥

अर्हच्चैत्यप्रतिष्ठासमयमनुसृतं वस्त्रशृङ्गारकार्यं,
नाट्यं धर्माङ्गबद्धं विविधवधयुतेऽमारिघातो निकेते ।
सन्मानः सर्ववर्गे विविधगुणधरे श्रावकार्हत्सङ्घे,
कार्यो यत्तं निधायाऽव्ययपदगमनं धर्मप्राप्त्यै विशेषात ॥२१॥

उक्तं यच्छास्त्रकारैः परिणतिवशतो ह्याश्रवा निर्जराङ्गं,
तत्सत्यं यज्जिनेन्द्रो भवमुखमहसां पापबन्धो विधाने ।
तद्वत्कार्ये जिनानां प्रतिकृतिमहने विद्यतेऽङ्ग क्रियायां,
स घः सर्वोऽत्र तस्माद्विधिवदनुसरेन् सर्वशोभावहत्वम्॥२२॥

विधौ प्रतिष्ठाकृतिसंश्रितेऽत्र, कृते जिनानां महिमाऽष्टघस्रान् ।
विशेषतः श्राद्धवरैर्विधेयो. यथा मुदायै जिनबिम्बचैत्ये ॥२३॥

चैत्यं विहितं बिम्बैर्युक्तं, सङ्घप्रहितां पूजां प्राप्तम् ।
नार्प्यं निजके धार्यं सङ्घे, व्याख्या मुनिभिः कार्या सूक्ता ॥२४॥

भव्या अत्रागत्याऽनङ्कां, दृष्ट्वा मूर्तिं धर्माऽऽरामाम् ।
बोधं यान्तु प्राप्तानन्दाः, शीघ्रं यान्तु मुक्तिं रम्याम् ॥२५॥

नैवात्र शङ्क्यैममलप्रतिबोधसारै—
र्नैवेदमाप्तविहितं करणीयमार्गे ।

शल्यादिसाम्यमुदित खणान्सिद्धे,
शास्त्रेषु नैव जिनबिम्बगृहादिकार्ये ॥२६॥

न्ते मुनिभ्योऽशनपानखाद्य-स्वाद्यानि यो हि वपमादि कृत्वा ।
तत्रापि चेच्छास्त्रकारै प्रभूता, सन्निर्जरा तर्हि विमोहन कथम् ॥२७॥

केचिन्मुनीना खलमाश्रयन्त , पुष्पादिपूजा विहिता गृहस्थै ।
पदऽपवादस्य मनन्ति, तन्ना-धिकारियोग्यो हि निधिस्तथा न ॥२८॥

निषेधो विधिर्वा मत कर्तृयोग्यो, मुनीशो निषिद्धो गणेतस्मिकार्ये ।
मुनेर्मार्गगत्या निषिद्धोऽस्ति पाठो, निषिद्धा स्थिति कल्पिकी
पालनाये ॥२९॥

ष्ट्वा जिन चैत्यविराजित जना, घजन्ति राग जिनशासनेऽनघे ।
समूल ग्प क्षयति प्रकाम, द्विष्ट मपक्षे खलु नीतिनाश्च ॥३०॥

जिनाय शान्तिप्रथमाननाय, नत्वा निज तद्वन्तिागमाय ।
भवेत्प्रवृत्तो नर आत्मतायी, प्रकृष्टशत्रो पदमाश्रितो यत् ॥३१॥

एका नतिर्या जिनराजभानवे, कृता नरै साऽष्टविधान्धतामसम् ।
निहन्ति यन्नव हतो दिनेश-प्रभाऽलसा म्यात्तिमिरावलीनाम् ॥३२॥

पूजामष्टविधा तथाविधमति प्रात स्वकीये गृहे,
चैत्य याति मनोहर पुरगत श्रीसद्घसत्ता श्रिते ।
भक्त्यारव्यानपरो विधाय गुरूणामाचारचर्यां वर्गं,
मध्याह्ने प्रतिलम्भ्य साधुनिचय जैनोऽशन स्वादति ॥३३॥

सन्ध्यायां गुरुसाक्षिकीं विधियुतामावश्यकीं सत्क्रियां,
ग्लानत्वादिदृशाश्रिते वरगुरौ विश्रामणामाचरन् ।
स्वाध्यायं परमं विधाय जिनराट् चैत्येऽर्चनां सम्मदात,
कृत्वाऽऽयाति निकेतनं शुचितनुः (स्मृतिधरो) जैना
नयेद्यामिनीम् ॥३४॥

जैनश्चेत् प्रबलाघसन्ततिभरात् क्षीणेऽथ रिक्थेऽथवा,
हेतौ वा समुपस्थितेऽपरतमे देशान्तरं गच्छति ।
जानीते स्वकमन्तरायमुदितं लाभादिघातोद्यत,
क्षीणं नैव भवेत्तकद्यदि परं, लाभो महान् धर्मगः ॥३५॥

जैनो देशान्तराणि व्रजति यदि तदा चैत्ययुक्तं निवासं,
गत्वावश्य सुचैत्यं मुनिगणसहितं याति नत्वाऽन्यथा न ।
पश्चात् संसक्तिरेभिर्भवति यदि परं स्मारयेद्वन्दनं तत्,
स्यादेवं जैनमार्गो मिलितविमलहृद्धारकः शासनस्य ॥३६॥

श्राद्धो भवेज्जिनवरार्चनबुद्धिपूरो, नैतच्च चैत्यजिनबिम्बयुगं विहाय ।
तच्छ्राद्धधर्ममतयः प्रतिपाटक हि, कुर्युरत्वदो जिनमतेऽतितरां
हि रक्ताः ॥३७॥

एवं विबुध्य विबुधैर्जिनरिक्थमेतत्, सङ्घाय दिष्टममलाय शिवोद्यताय ।
तद्वर्धनावनविनाशफलं प्रदर्श्य, त्रैधं गृहेऽर्चनविधौ सकले च योगि॥३८॥

यो वर्धयेज्जिनधनं प्रवरोपयोगं, श्रीजैनशासनगतोन्नतिसूत्रधारम् ।
सज्ज्ञानदर्शनचरित्रविकाशधुर्य, प्राप्नोत्यसौ जिनपदं प्रथितं
पृथिव्याम् ॥३९॥

द्रव्य जिनस्य न भवेदपरिग्रहस्य, भक्त्या गृहीतममलेन हृदा जिनस्य।
वृद्धौ जिनेशवजनोन्नतिविड्म्य भावी, सच्छासनस्य मुनि वर्त्तयिता
न चिन्नम् ॥४०॥

चैत्य विम्ब जिनस्य प्रभवति सकले सम्भेद हिताय,
बाला वृद्धा युवान सुकृतमतिधरा स्वीययोपामिरक्ता ।
जाया वशेन देशे प्रचुरनिचयिनोऽवाधधामाभिलाषा ,
लाभ नोचेल्भन्ते जिनपतिपठित सुस्थित तद्धि दृष्ट्वा ॥४१॥

तत्सद्म रक्षतावा जिन-जिनगृहयो सुस्थितत्वोद्भवाया,
सा स्यात्तद् द्रव्यसिद्धेरिति सुकृतभरा वर्धने वद्धकक्षा ।
न्यायेनाऽऽरम्भशून्या गतविषयवधा धर्ममाताथवाञ्छा ,
सर्वेषा मुक्तिकाङ्क्षा जिनपदमतुल नाद्भुत यद्धरन्ति ॥४२॥

ये सत्या नहि तादृश धनबल युक्तिप्रयोग कला,
बुध्यन्ते प्रबल च नो कथमपि वृद्धे पर कारणम् ।
दवस्य तत्र नरान्तरने स्यु सोद्यमा मुक्तये,
सर्वेषामुपकारकस्य विधिना मुक्ति लभेरन् लघु ॥४३॥

ये तु प्रोल्कटमोहराजजनितप्राबल्यभानो नरा,
मिथ्यात्वाऽऽकुलचेतसो जिनधन तान्क् प्रभावान्वितम् ।
नो वृद्धिं न च रक्षण प्रतिपन्न नेतु प्रवृत्ताऽऽदरा ,
भक्षन्ति प्रसभ परैश्च निहते नो वारितु सादर ॥४४॥

ते धर्मस्य निबधन स्थितियुत निर्णीयन्तीतरे,
त्र मोह समुपाज्य दुस्तरतर प्राप्स्यन्ति दुःखान्विता ।

श्री खरतरगच्छीय ज्ञान मन्दिर, जयपुर

संसारेऽधमवृत्तयो नरकगा दुःखेन वोधि परे,
जन्मन्यासुरभावनोद्यतहृदो नैव शिवश्रीश्रयः ॥४५॥ युग्मम्

श्रुत्वा फलं जिनपतिनिद्रविणे प्रवृद्धे, रक्षागतं न मनुजाः शुभवोधशून्याः ।
पूजादिकार्यविधिषु द्रविणं व्ययन्ते, ये तेऽपि नैव विधिमार्गपराः समेषु ।
चैत्येषु विम्बसहितेषु यथार्हमाधाः (मर्प्यम्) ॥४६॥

देशप्रदेशेषु परापरेषु, विम्बानि चैत्यानि पुरातनानि ।
दृशं दृशं भव्यजीवा अनेकै-ऽवापुर्वोधिं तद्भृतश्च स्थिरत्वम् ॥४७॥

प्रमादतोऽकारि सुसंयतेना-ऽकृत्यं कदाचिन्न च तत्परेभ्यः ।
गीतार्थसंविग्नमुनिभ्य आशु, निवेद्य शोध्यं परतोऽपि जातु ॥४८॥

ततः प्रत्ने चैत्ये भवति जिनपतेर्या प्रतिकृति-
स्तदग्रे शास्त्रेण स्वयमपि समालोचयति सः ।
गीतार्थः शोधीनां सकलशुचिकरान् वेत्ति सुविधीन्,
अकृत्यं निर्मायं शुचितरमनाः शुध्यति ततः ॥४९॥

पुराणानामेवं जिनपतिगृहाणां प्रतिमया,
जिनस्याख्यानां द्राग् महिमप्रततिं वीक्ष्य सुधियः ।
सदा कुर्युस्तूत्थां निरघमतमुदा पालनयुता,
लभन्ते ते प्रेत्याशुभमततर्तिं पापपदिकां ।
निहत्याऽर्हच्छास्त्रप्रथितमहिमानं शुचिपदम् । इति वा ॥५०॥

भवेद् जैनोऽसौ यः प्रतिनियतसामर्थ्यसहितो,
विधेयाच्चैत्यानां विविधघटनां विम्बसजुषाम् ।

म्यय ससारा-धेस्तरणनिपुणस्तारयति वै,
गता धर्मारामं न भवति विदुषा स्वान्यविभिन्ना ॥५१॥

इति पञ्चविंशोऽध्याय ॥

। षड्विंशोऽध्याय । (ज्ञानाधिकार)

जैनोऽसौ नियत तनोति मतिमान् यो ज्ञानकार्यं सदा,
जैन यद् भुवि शासन विजयते हृत्वान्यतीर्थप्रभाम् ।
सोऽनर्घा महिमा प्रचण्डतरको ज्ञानप्रभावोत्थित ,
प्राप्तेष्वन्धनरेणु यद्वद्दुतरेष्वीक्षाधर श्राध्यते ॥१॥

ज्ञानेन जात भुवि जैनतीर्थं, ज्ञानेन तत्स्थापितमर्हता पुन ।
ज्ञानप्रवृत्ति भुवि जायमाना-मपेक्ष्य तीर्थं जगतीह वर्तते ॥२॥

ज्ञानस्यैव महद् परात्परतरो, जागर्त्यनून पर-
स्तीर्थेशा परिपत्सु यच्छ्रुतधराश्छद्मस्थभावान्विता ।
गन्धेशा श्रुतकेवला निखिलविद्वृन्दात् पुर स्थानगा-
स्नानादौ च नमस्करोति निखिल शेष सभासज्जन ॥३॥

मुनीश्वराणा गणानायकत्वे, स्थाप्ये मता या निखिला गुणालि ।
सर्वोऽपि सा युक्तमाऽपवादै , पर श्रुताऽऽचारगुणे त्वसौ न ॥४॥

नियाचिर्तेनिऽपि मुनौ जनाना, मिथ्यात्वभावो न तथाकृतिश्चेत् ।
गीतार्थताया सुमुनौ (च) तद्वद्, भवेत्य चेत्कृतवारको न ॥५॥

गीतार्थनिश्रामभिहत्य ये स्युः , क्रियापराः संयमिनः प्रभूताः ।
तेष्वंश एकोऽपि न संयमस्य, ज्ञात्वेदमार्यः श्रुतसाधनो भवेत् ॥६॥

भेदाः पञ्च ख्यातिमन्तो बुधेषु, ज्ञाने गीताः शास्त्रकारैर्हिताय ।
मत्याद्यास्तु व्याहृतिस्तस्य शास्त्रे, कालाद्येषु गीयते शास्त्रनिष्ठा ॥७॥

जैनैः पर्व राध्यते ज्ञानसत्कं, पञ्चम्यां वै शुक्लपक्षोपगायाम् ।
तत्र स्थाप्यं शास्त्रवृन्दं पुरस्तात्, तस्याग्रे श्रीसङ्घ आप्नोति धाम ॥८॥

वर्षाऋतौ स्याद्वरपुस्तकाना–मार्द्रत्व तद्धेतु विकुत्थनादि ।
तत्सारणादावधिकः प्रभावो, मत्वा श्रुताराधनमिष्यतेऽत्र ॥९॥

तदाश्रया कार्तिकपञ्चमीयं, मता जिनेशानुगतैः समस्तैः ।
पर्यायभेदेन मता ततोऽसौ, सौभाग्ययुक्ता श्रुतपञ्चमी वा ॥१०॥

चिरन्तनानां यतिनां न काचित्, पुस्ताद्यपेक्षा स्मृतिपाटवानाम् ।
तथापि तत्रामलशास्त्रपद्धति – र्गीतार्थताहीनजनोपयोगिनी ॥११॥

देवेन्द्रयुक्ताद्गणिनः पुरस्तादा–ऽऽसन्मुनीनां वचनानि मानम् ।
परं परस्तात् स्मृतितानवानां, पुस्तानि सर्वेभ्य उदारमानम् ॥१२॥

ततोऽधुना नैव वचांसि मानं, न बिभ्रतीष्टं शुचिपुस्तकानि ।
महामुनीनां गुणगह्वराणां, नासम्भवी यत्स्मृतिलोप उग्रः ॥१३॥

प्रवक्तुमेतद् यदि नोचितं न, प्रवच्मिनिःशेषमिदं हि शासनम् ।
लेखान् सुपुस्तप्रथितान् विहाया–परेण नैव ध्रियते कथञ्चित् ॥१४॥

यदा स्मृतीहाधरणादिमेधा–प्राचुर्ययुक्ता मुनयः प्रशस्ताः ।
तेषां तदा पुस्तकसङ्ग्रहस्य, परिग्रहः कारणमेव नान्यत् ॥१५॥

मेधा यदा हीननरा मुनीना, कोशाय निर्युक्तिमुखग्रहोऽभूत ।
हानिर्यदा तत्र बभूव भूरि-स्तदा ममग्रन्थ बभूव सङ्ग्रह ॥१६॥

यथा ह्यचेलत्वश्रमे हि वस्त्र, परिग्रह स्यान्मुनितापदाङ्गम् ।
परेषु यत्सयमसाध्यता स्यात, तेषा ग्रहान्चीवरभाजनादे ॥१७॥

अतोऽधुना पुस्तकसङ्ग्रहो य , स एव बोध जनयत्यनूनम् ।
धरन्ति चेत्तानि न पुस्तकानि, हास्यास्पदिभक्ता मुनयो
भ(वेयु) वन्ति ॥१८॥

ततोऽधुना ज्ञानगुणेप्सुना मदा, काय द्वय ज्ञानपदाहणायाम् ।
आराधना ज्ञानपदस्य जाप-ध्यानादिभि पञ्चपदानि लाभा ॥१९॥

अन्त्य मुनीभ्योऽमलपुस्तकाना, विलखनामर्चनमारचर्य ।
समर्पण वाचनमन्ययुक्ति-द्वयोपकाराय सदा प्रयोज्या ॥॥२०॥

न दर्शन शास्त्रविहीनमार्ग शास्त्राणि सर्वाणि समाश्रितानि ।
सुपुस्तकालिं गणिना वरेण, ज्ञातु स्वकान्यानि निदेशनानि ॥२१॥

धार्याणि निःशेषमताश्रितानि, तत्काल कालान्तरपुस्तकानि ।
गणी भवेन्नेतरथा स्वकान्य-मतोद्भवे शक्तिधर प्रकाशम् ॥२२॥ युग्मम्

यावत्तीर्थ निनम्य प्रचलति भुवन तावदपोऽपि सङ्घो,
यावच्चाऽसौ जनेषु प्रकटतिमिरहा तावदर्हच्छ्रुतानाम् ।
तत्त्वाना सप्तकस्यानवमपरधृतिप्राप्तिहेतुत्वमाप्य,
तानि स्यु पुस्तकाना निचयमनुमनान्यचनीयानि मत्वै ॥२३॥

अन्त्याऽऽवर्तप्रमिते (माणे) भवगतिगमने शेष आप्नोति मार्गं,
भव्यो जीवः प्रभावात् सुकृतनियतितो जातकालात् प्रधानात् ।
तत्रानाभोगवान् सन् प्रचरति जिनपोद्भाविते यद्वदन्धो,
सद्भाग्यो भव्यजीवश्चरति गतपथो सार्वदेशितमार्गे ॥२४॥

तद्वज्जीवोऽपि मार्गे यदि व्रजति पथि ज्ञानहीनस्तदापि,
देवाद्यर्चादिवत्सोऽनुगतविमलधा लेखयेत् पुस्तकानि ।
अभ्यर्च्यार्शेषशिष्टद्रविणनिचयतः सद्गुरुभ्यः समर्प्य,
सत्याप्य श्रोतृकार्य गुरुवचनसुधापानमादत्त उच्चैः ॥२५॥

देवो गुरुर्धर्मवरश्च बोध्या–न्येषां समासाद्य ऋतां प्रमाणाम् ।
व्याख्यात्रधीनानि यथा श्रुतानि, विशेषतोऽमूनि तथाङ्कितानि ॥२६॥

तथापि बाहुल्यमनेहसीय–प्रभावतो बुद्धिधनस्य विस्मृतेः ।
कुवादिनां कल्पितपाठवादिनां, विलोपकानां च न विद्यतेऽन्तः ॥२७॥

एतादृशेऽनेहसि मार्गरक्ताः, कथं श्रयेयुः शिवशुद्धमार्गं ।
अतो विसंवादहरानऽभिन्न–रूपान् सुपुस्तान् भविनोऽर्चयन्तु
त्रिभिर्विशेषकम् ॥२८॥

निशम्य पैशाचिकवृत्तमार्त–स्नुषाकथां च व्रतिनः स्वशुद्धयै ।
क्रियातिरिक्ते समये विदध्युः, स्वाध्याय एषोऽपि सुपुस्तकाश्रितः ॥२९॥

एवं च ये स्युः सततं समुद्यताः, स्वाध्याययुक्ते वरधर्म्यचित्ते ।
सुपुस्तकानां धरणे प्रवीणा, ध्यानेऽन्यथा बाध उदियात् प्रचण्डः ॥३०॥

तीर्थोद्धारतया सुपुस्तनिचयस्तेनैव मल्लप्रभो–
र्दिव्यानीत उपाय आगमविधौ पुस्तस्य वर्षावधिः ।

सिद्धेषे प्रतिबोधनाय गुरुणा रत्नस्य चोद्धे मते,
न्यस्ता सुन्दरपुस्तिकाऽस्य निमले जैनेन्द्रधर्मे मति ।
पूज्य-श्रीहरिभद्रसूरिरचिताऽस्याऽऽलोकनेऽजायत ॥३२॥

निधोत्ता जिनागमा अनन्तर-परम्परा-
ऽऽत्मस्वरूपभेदत पुनर्द्विधाऽमूवत ।
द्विधाऽपि वर्ततेऽधुना परम्पराभिधानको,
जिनेशागमने मुने परम्पराविहानित ।
सुपुस्तकाश्रितस्तत स एव पूज्यतामिह ॥३३॥

सत्यैव शासनस्यानुपमहितकर पुस्तक तत्पुरोगै-
र्भक्ति कोगा कृता सत्पुरुषवचनत शासनोद्योतनाय ।
नवे श्राद्धोत्तमास्तु विविधविधियुतान्याचरन्ति प्रकाम,
तत्तद्विचित्रभाषु तप उद्यक्ते यापने तद्विलेखान् ॥३३॥

यथा जिनेशभक्ति बहुप्रकारिकार्चना,
जिनेश्वरेषु पूजने तदीयविम्बसहते ।
तथा जिनेशशास्त्रवृन्दभक्तिभारिता जना,
सुशास्त्रबोधिनस्तदाशयाँश्च पूजयन्ति वै ॥३४॥

अत श्रुते समीरित त्रिधाऽऽश्रुतेर्विनिर्धन,
साधनाच्च बोधि-बोध-तद्भवाऽङ्गसहते ।
अय तु चेत्समीहते प्रकाममात्मकाम्यया,
त्रिपूरय तत्कृते क्रियान् सुपुस्तकान्वयान् ॥३५॥

चैत्याना नूतनाना वितनुत उदिता भक्तिया यद्वनाश्वा,
उद्धार प्राक्तनाना विविधपुरयुजा तन्यते भक्तिनघ्रा ।

विम्वानां नव्यजीर्णप्रकरणनिपुणा उद्यमं सन्दधन्ते,
सङ्घे जैनेशनस्ये वहुविधविनयं सन्नयन्ते सुधर्माः (वोधाः) ॥३६॥

सर्वोऽप्येप प्रभावो मुनिवरसजुपः सङ्घसार्थस्य तीव्रो,
भेदैर्युक्तश्चतुर्भिः श्रमणमुखगतैः पुस्तकाधारजीवैः ।
व्याख्यानं सत्क्रियायुक् प्रवितरणचणैः शासनस्तम्भरूपै-
र्युक्तस्य पुस्तभक्त्या त्रिकरणविधया संश्रितस्यैव नूनम् ॥३७॥

शास्त्राणां विहिता वरा सुरचना पुस्तेपु विज्ञोत्तमैः,
सा चेद्वाधमियर्ति तर्हि जिनपस्याऽभूत्परं वाधितम् ।
सर्व यद्धरति प्रकृष्टमनिशं सर्वत्रगं सद्यशः,
सूत्राणां मित्वाधने परममुष्मिन् धर्मवार्ता वृथा ॥३८॥

ज्ञानं सर्वमतानुगैरभिमतं धर्माद्दतौ सारभृज्,
जैना अप्यभिमन्वते परमिदं तत्त्वाशया नो परम् ।
जैना यच्छिवसाधनं परतरं मन्वन्त उद्धारकं,
ज्ञान सत्क्रियया युतं न विकल चैकं ह्यपीप्स्यप्रदम् ॥३९॥

रोगी नैव निदानरूपभिषजां रोगस्य वोधाद्भवे-
दल्पेनापि गदेन मुक्ततनुकश्चेन्नागदानां क्रिया ।
वार्धेस्तारकतां श्रितोऽपि पटुधीश्चेत्तारणे नोद्यतः,
पारं नो ससियर्त्यसौ नदनदीष्वेवं क्रियाऽऽवश्यिकी ॥४०॥

युक्तोऽपि क्रियया विचित्रविधया रत्नाकरेष्वागत-
श्चेन्नासाववबुध्यतेऽत्र पतितं सारं गतार्घ च वा ।

तत्तन्नागतिरम्य मुग्धहसनी सिद्धिर्न काचित्परा-
प्यथाऽस्य सकलप्रयास इह चाऽज्ञानिक्रियाया सम ॥४१॥

प्रागुक्त श्रुतधारकै श्रुतिपर य सयत सयत ,
गत्या स्थान उदाहृतौ शयविधौ वाच्यासनेपूद्यत ।
वध्नात्येष (न) पापमण्वपि यतोऽसौ रक्षक प्राणिना,
चैत्प्राणान्तमिता परेऽसव इद पापाय नो तादृशे ॥४२॥

एव नो विधितत्परोऽपरमुनि साध्य विहायाऽऽत्मना,
कुर्यात्ता परमप्रमादसहिता हिंस्यान्न जन्मान्तरान् ।
जात्वेषोऽघचितानसञ्चितिकरो रथाविधौ न यत,
एष यत्नपर परेऽत्र न मृता स्वायु समर्थो यत ॥४३॥

श्रुत्वैव चच आहतिप्रचुरताभागाह शिष्य परो,
नो ज्ञाने शिवकाङ्क्षिणा मतिरत कार्या फलेनोज्झिता ।
आहात्रान्तिपदा सदा हितविधावालस्यलेशोज्झितो,
यो जीवेतरसार्थबोधरहितो रथोद्यत किं भवेत् ? ॥४४॥

तज्जीवेतरवस्तुवृन्दविषय ज्ञान पर धारयन्,
पुण्यापुण्यविधानबोधनिति मुक्त्यन्तसौख्य श्रये ।
तत्र यम जिनधाममार्गनिपुणैर्ज्ञान परध्येयसे,
माह्य यज्जिनशासन द्वययुत ख्यातव्ययाप्तिप्रदम् ॥४५॥

श्रीजिनशासनमतेऽत्र नराश्चतुर्धा, ज्ञान तु केवलमुपासतमुज्झितेयम् ।
हीना क्रिया पर उताति परा प्रवृत्ति, द्वौ चापरौ गुणविशेषतया द्विरूपौ,
नैतपु कश्चन नरो जिनमार्गमेत ॥४६॥

ज्ञानक्रियोभयगताः पुरुषेषु भङ्गा, यत्ते नरेषु भजनापदृतो विभातः ।
ज्ञानं लभेत पुरुषः प्रचुराघभेत्ता, चन्धोऽपि जातु नहि ग्रन्थिपरो
हि तस्य ॥४७॥

नैति क्रियाकृतिमसौ मतिरस्य तद्वा,
तेनायमेति पदमाराधनया प्रभूतम् ।
जैनी क्रियां प्रविदधान उपैति मार्गं,
योग्यत्वमस्य न तु सको नियमात्तमेति ॥४८॥

भव्येतराः केचिदिमां समेता, न तेऽत्र भव्या अपि मार्गहीनाः ।
आराधना तस्य भवेद्धि न्यूना, मार्गेण हीना इति दुष्टताङ्काः ॥४९॥

ज्ञानं क्रियां चापि समेत्य युग्मं, सम्यक्त्वचारित्रयुजः पुरुषाः ।
मार्गं जिनेशस्य यथास्थितं ते, मोक्षं लघूद्यान्ति विशुद्धभावाः ॥५०॥

जैने कुले ये जनिमादधुस्ते, यावन्न तत्त्वेतरभावविज्ञाः
वृद्धानुवृत्त्या क्रियया विदा च, वृतास्तथाप्यत्र न ते प्रमाणम् ॥५१॥

क्रियायुतो ज्ञानपदार्थशून्यो, निवेदितोऽरण्यगतोऽक्षिहीनः ।
निर्युक्तिकारैः प्रसभं द्वयोस्तु, समत्वमाश्रित्य युगादराय ॥५२॥

द्वयोः परं साध्यमपेक्ष्य तैर्हि, चारित्रहीनः कथितः खरैः समः ।
ज्ञानं तु दीपैस्तुलितं प्रधानं, ज्ञानक्रियाभ्यां सहितोऽर्हपूर्गः ॥५३॥

समस्तकर्मक्षयतो विमुक्तिः, श्रेणिप्रभावात्स भवेन्न सा तु ।
कैवल्यहीने शिवसाधनं तद्, ज्ञानं सदा श्रेयमिदं तु भव्यैः ॥५४॥

मार्गास्त्रय सम्मिलिता मिमुक्ते , सम्यक्त्वबोधव्रतरूपवन्त ।
सम्यक्त्वलाभात् प्रभृति क्रमोऽत्र, तत्त्वार्थबोधेन विना न निश्चिति ॥५५॥

ज्ञान कुलाचारत एव यस्य, तस्यास्ति साध्यत्वमुदारदृशेः ।
यस्त्वान्धिर्मा स नरो लभेत, ज्ञानाद्धि सम्यक्त्वगुणस्य लाभम् ॥५६॥

जिनेश्वरा यद्यपि गर्भकाला–द्विशिष्टसम्यक्त्वधरा ध्रुवं स्यु ।
ज्ञानत्रय तत्र तथापि शस्या, जैनैः कृता प्राप्नुत इन्दुसाम्यात् ॥५७॥

परित्यजन्ति तीर्थेपा समग्रपापभाजन,
गृह धनाङ्गनासुतान्सियुत स्वबोधत ।
तदैव तुर्यमाप्यते सर्वैर्मन सुपर्यय,
न जायतेऽद्र आत्तिरेप्यगारमात्मभावत ॥५८॥

घृते तु दीपेन गृहे प्रकाशन, धूलीप्रमुखस्य विशोधन परम् ।
न चेद्भवेत् तत् प्रथम तदा पुन , सुवर्णरूप्यादिरपोहित भवेत ॥५९॥

तथैव बोधेन विना कृत तपो, भवेदकामेन युता विनिर्जराम् ।
हेतु प्रति, प्राप्तिरतो न मुक्ते–रात्येहेयार्थविदा न तत्र ॥६०॥

निरोध कृतश्चेन्न नूत्नाहसा त्रा, पुराणाघनाशोद्यम आत्तरूप ।
यथार्थपापप्रचयक्षय स्या–द्विबुध्य तत्तत्करणं निरुन्ध्यान् ॥६१॥

उद्यमो यदि कृतो मनस्विना, सयमे तपसि च श्रुतागमे ।
निवृत्ति करतले पुन स तु, ज्ञानिनोऽक्षपरथाऽन्धनृत्यवत् ॥६२॥

ज्ञानेषु पञ्चसु पुन श्रुतमेकमेव,
व्याख्याति रूपममल स्वपराश्रयाङ्गम् ।

मूकानि शेषमतिमुख्यविबोधनानि,
स्वेषां न रूपममलं वदितुं क्षमाणि ॥६३॥

ज्ञानं यद्यपि केवलं वरतरं सर्वार्थबोधान्वितं,
नित्यानन्दसमन्वितं नियतताभ्राजिष्णु सर्वोत्तमम् ।
मेरौ काञ्चनसन्ततेः सममिदं लोकोपयोगोज्झितं,
तत्स्वर्ण खनिसम्भवाभमनिशं श्रोता श्रुतं संस्तुयात् ॥६४॥

कालोऽयं कलिसङ्ज्ञितो न च नृणां ज्ञानानि शेषाणि वै,
नैवाकाशविचारिणां गतिरिहासत्त्वं च लब्धिस्पृशाम् ।
मेधा नैव तथाविधा गणभृतां सद्योगयुक्तात्मनां,
तुल्या, शासनमार्हतं विजयते सामर्थ्यमाप्य श्रुतात् ॥६५॥

जैनेन्द्रशासनमिदं सकलान्यतीर्थ्य-
न्यत्कारकारणसहं जयतीह लोके ।
सर्वोऽप्ययं लिखितशास्त्रभवोऽनुभावो,
ज्ञात्वेदमत्र लिखनेऽलसिता सतां का ? ॥६६॥

जैनाऽसौ वरभक्तिभाग् वितनुते नित्यं महं ज्ञानगं,
तत्रापि श्रुतलेखनावनविधौ जैनेन्द्रविम्बेष्विव (म्वाधिके) ।
देवा यद्वदवाप्य जन्म झटिति श्रौतीं सरन्त्यर्चनां,
तद्वच्चः प्रतिवासरं वितनुते श्रौतीं सदर्चां मुदा ॥६७॥

इति षड्विंशोऽध्यायः ॥

। सप्तविंशोऽध्याय । (श्रमणाधिकार)

जैनोऽसौ जिनशासनाधिगमतो जन्म स्वकीय सदा,
धन्य मन्यत आत्ममुक्तिपरम नासीतरच्छासनम् ।
पूज्यत्व जिनशासनस्य सकलज्ञोद्गहरात सर्वदा,
जीवाना हितदर्शनान्घटितानुस्तेमुमुक्षुमहात् ॥१॥

दवो रागविनाशदृष्टि न सत्साधोर्दिशेच्छासन,
ज्ञानादित्रयसयुत निरमण पापेभ्य आरयाजनै ।
विद्वत्सु प्रतीत पद प्रथमत स्याद्दशस्मनुतो,
नो चेद्देष्टरि नतरे च विमिता नैवार्हणा सन्नृणाम् ॥२॥

आत्मा केवलल्धिभीलनपर स्याद्रागरोपान्जिद् ,
यस्माज्ज्ञानन्शोन नश्यत इहाधृत्यौ कषायान्वित ।
रधौ नैव विगच्छतो भवकरेऽनिष्ट कषायान्वये,
तस्त्यल्यधरो जगत्पतिरसौ श्रीवीतरागो जि ॥३॥

महत्त्व जिनस्यास्मि यत्सोऽखिलार्थान , समत्वेन वेत्त्येक सामान्यरूपान् ।
प्रथमपधारॉस्तु वस्ति प्रकृष्टा् विशेषान्विताा् युग्मरूप पन्थ ॥४॥

यथा यथा स्याद् ऋजुतान्विताङ्गुलि , नष्टा स्थिरोत्पादयुता तु सव ।
गय प्रभु कालभिर्गोत्थिताना, वर्त्तीह पर्यायगणाश्रितानाम् ॥५॥

द्रव्याभिधानेन समूहमेव, स्याद्वाद गवामि पदायरूप ।
बुध्यात्पर नित्यमता, परेशे, स्वस्मिन्ननित्ये न हि शुभ्रता स्यु ॥६॥

भिन्ना जीवा भवेयुर्यदि न हि करणैर्ज्ञानसौख्यादिभावो,
यातस्य प्रेत्य ज सासुभूत इह नहि प्रेत्यते किं तु देह ।

जीवे यातेन वेद्यं करणविधिगतं वेद्यते प्राणधर्ता,
भिन्नाऽभिन्नस्वरूपौ तदिह किमुत न जीवकायावपीष्टौ ॥७॥

समस्तमस्तीह जगत्स्वरूपे, सदन्यभावेन सदेव न स्यात् ।
नोभात्मरूपे विषयस्य भेदो, यदिन्द्रियैर्गम्यत आत्मगम्यम् ॥८॥

सर्वादिसामूहिकशब्दयोगे, वाच्यं समं नैव तथा ह्यवस्थाः ।
जीवेषु सर्वेषु गुणाः समस्ता, नाऽजीवगास्ते निजरूपनिष्ठाः ॥९॥

कर्मावृतत्वात्कृतिरेतदुद्भवे, कार्यं ततस्तद् द्वयरूपमेव ।
स्याद्वादमेवं जगतो विबुध्य, दिदेश नाथो भविकाञ्छिवाय ॥१०॥

नैकस्य सर्वज्ञदृशेति शिष्यान्, जगाद निश्शेषविदे सुमार्गम् ।
सर्वे लभन्तां शिवमित्थमुग्रं, जिनेश्वरीयेषु नृषु स्वतत्त्वम् ॥११॥

दिष्टो यद्यपि सर्वभावविदुषा मार्गः कषायोज्झितो,
नायं सिध्यति साध्यते क्रममृते तद्धेतवः साधकाः ।
दिष्टास्तत्क्रमशः समुन्नतिमयाः शिष्येभ्य एतत्पदे,
येनाऽशक्यमिदं समस्तकलनं त्वेतद्धि नो स्याद्रुचि ॥१२॥

न नित्य आत्मा न च नाऽन्यनुक्षणं. ततोऽस्य सिद्धत्वमसम्भवन्न ।
नैरात्म्यवादे न किमु प्रभावो, नश्येन्न पश्येदिति शल्यनाशः ॥१३॥

निरीहतायां न सतोऽपि रागो, वैराग्यनिष्ठो न च दुःखरोपी ।
आत्मा स्वभावेन युतो न सुख्यपि, स्वरूपरक्तस्य न मोहहेतुः ॥१४॥

स्वरूपमालिन्यमतो न तस्य नैर्मल्यसिद्ध्यै खलु मार्गदृष्टिः ।
साध्यत्वमस्यैव तदीयजीवे, तत्रैव सम्यक्त्वमदर्शि विज्ञैः ॥१५॥

साध्ये निश्चित उद्यमो नु विदुषा मोक्षे त्वनन्यात्मक-
श्चारित्र ह्यर उद्यमो न च फलेज्ज्ञान विना कस्यचित् ।
हेतो साधनसाधनप्रचयग कर्मागमोद्योतने,
साधनबाधकसार्थग भवति तत्कर्मागमोद्भाधने,
ज्ञातव्यानि ततोऽघसङ्घमहतौ रूपाणि सत्त्वोद्धुरै ॥१६॥

मत्वैव जिनराड दिदृक्ष भविन सम्यक्त्वबोधव्रता-
न्यन्ये तद्विधबोधवृत्तरहिता देव्दु न चैव क्षमा ।
तत् ससारसमुद्रवाहनिरतोऽनादेरसौ नासत्त,
पुण्योद्रेकपर समस्तविदमुन्मोह जिन दुगत ॥१७॥

मत्वैव भवपारिधे परतट गन्तु मुनीगो जिन,
दातार शरणम्य कर्मकटकात त्रातारमाशिश्रियत् ।
सेनानी सुभटान् रणाङ्गणभुवि प्राप्तत्रिय स्यादल,
कर्तुं चेत्सुभटा रणोद्यमपरा अन्योन्यमस्तद्वित ॥१८॥

मत्वेति प्रवरोद्यमा मुनिवरास्त्यक्त्वाऽऽश्रवान् पञ्चधा,
ससाराम्बुधिवर्धने पटुतरान् दुःखैकदावानलान् ।
पोत सवरूपमाप्य मथने शुद्धे तपस्युद्यता ,
यातान् वृद्धतपस्विनश्च सतत ये स्यु सदा सेविन ॥१९॥

शिक्षासु प्रवणो भवेन्न मतिमानाऽऽरम्भत कास्वपि,
किं कमक्षपणाय सादरतया प्रारम्भतस्तत् क्षिपेत् ।
सच्चेष्टोऽपि ततो नरो धृतिपर प्रोद्युक्तयत्न सन्,
काङ्क्षी चेत् प्रवरम्य तस्य यतते काष्ठा परा यावता ॥२०॥

आजन्मभाविनि कलानिचये यदीदं,
किं तर्हि नैकभवसाध्यफले चरित्रे ॥
तत्राऽस्ति योगजकृतिर्वहिरात्तहेतु-
रात्मोद्धृतिः पुनरिहान्तरसाधनाढ्यः ॥२१॥

छात्रत्वं यदि न त्यजन्ति सकलां विद्यां ग्रहीतुं गता,
मन्दं मन्दमनुश्रयन्त उदितां तां शिक्षमाणा अपि ।
अव्याबाधपदैषिणोऽपि हि तथा श्रामण्यमल्पं गता,
यत्कर्माऽस्ति घनं भवैस्त्राणितैर्बद्धं च क्षेय हि तत् ॥२२॥

ऋद्धौ कीर्तौ क्रियायां गिरिवरचटने ग्राममन्यं यियासौ,
विद्यायां गेहचित्यां क्षितिगृहकरणे कूपभित्त्यां कृपौ च ।
मन्दं मन्दं प्रवृत्तः स्थिरकृतिरुपयात्यन्त्यमुग्रेऽपि कार्ये,
किं तर्हि मोक्षसिद्धयै चरणमनुचरन् शस्यते नाल्पमिच्छन् ॥२३॥

यथा जनेषु स्खलना भवित्री, सर्वेषु कार्येषु जनप्रसिद्धा ।
तथाऽन्तरङ्गारिजयप्रवृत्तौ पञ्चेति भेदाः श्रमणत्व उक्ताः ॥२४॥

अज्ञानसंस्कारविमोहमादैः, कश्चिद्भवेद्रागयुतोऽथ साधुः ।
शरीरयुक्तेषूपकारकेषु, स संयमी सन् वकुशाभिधानः ॥२५॥

कषायदोषाद्विनिमोहनाच्च, भवेत्कषायी वितथादृतिश्च ।
आचारमार्गे (ज्ञानादिकेषु) प्रयतोऽप्यरागे, कुशीलसङ्ज्ञः स
मुनिर्विगीतः ॥२६॥

तपस्तन्वतः शुद्धसाधुप्रतिष्ठा—पदस्योद्भवेल्लब्धिरुदारूपा ।
सैन्यं नयं चक्रधरस्य दाम्येत्, कुप्येत् कदाचिच्च कुतोऽपि हेतोः ॥२७॥

कर्तुं क्षमा स्याद्विकल क्षमस्तथा, समद्विपात्र न तथर्धियोगात्।
एव मुनि सोऽनुगत' प्रकोप, विराधना विपयुता प्रयाति ॥२८॥

यथा सुवण मलिना दशा गता, जहाति जातिं न तथाऽनगार'।
ल्ये प्रयोक्ता विजहत्स्ववेप, सोऽय पुलाकामिधया प्रगेय ॥२९॥

हेयता सर्वथा जिनवरैर्गणधरै – र्गीतपूर्ता समस्ताऽऽश्रवाणा,
तत्र हिंसादिका नियमनै परिहता इन्द्रियाणा निरस्यैतदर्थान्।
क्रोधमुख्यान् पुनश्चतुर उद्धरति स प्राप्तसिद्धनिर्ग्रन्थभावो मुनि
स्तुर्यभेदे पुन शुचितरा परिणतिं प्राप्य निर्ग्रन्थनामा भवेत् ॥३०॥

यदा छेदो भवेद्वेतोर्धुव कार्यस्य भाज्यसौ,
च्छेदात् तत' कषायस्य क्षयो ज्ञानावरकर्मणाम्।
एव निश्शेषभावाना ज्ञाता स्नातकता गतो,
यस्मान्न लिप्यते जातु क्षीणैं कर्ममिराप्तिमान् ॥३१॥

चाद्याद्वनादे सुविनिर्गता इमे, ग्रन्थात्ततस्ते व्यवहारनीत्या।
पञ्चापि नैर्ग्रन्थ्यमनुश्रिता हि विशुद्धिवृद्धेरनुगान्विका मिद ॥३२॥

गता साधकभक्षितास्त्वतमोद्धावाद् मुनित्वे भिद,
सन्त्यन्या अपि पञ्च सयमगता सामायिकाद्या भिद।
नैर्ग्रन्थ्ये तु पुरोदिता भिन्न इह स्यात्सयतत्वाश्रया,
नोचेद्भेद उपाधिषु प्रगुणितो नाऽसौ विशेष्ये भवत् ॥३३॥

त्यजन् स्वीय गृह सर्वानर्थमूल प्रतिज्ञया,
जन्म स्वीय फलीकुर्यान तदाऽसौ सात्त्विक पुमान।

ज्ञानादिषु प्रतिज्ञां चेद्यावज्जीवितमाचरेत,
ततः साधुत्वमागत्य प्राक् सामायिकमाश्रयेत् ॥३४॥

बुद्धा यदा भवगता गुणशून्यताऽग्र्या,
जन्मान्तकाऽऽधिदहनेन जगद्विदग्धम् ।
त्राणं गुणौघसहितं परिमुच्य धर्म,
नान्यत्ततो भवमसुं परिहर्तुकामः ॥३५॥

गृहं त्यक्त्वा दीप्तालयसममिदं स्वार्थनिरतं,
कुटुम्बं पापालेर्नियतमनुभूतं भवगतम् ।
मयैवैकेनेदं विविधगतिपूहामदमनं,
विनैकं धर्मं नो पर इह परत्राऽपि सुखदः ॥३६॥

ततोऽहं प्रव्रज्यां गुरुवरसमीपाद् वरतरां,
गृहीत्वा पापालेर्निजकमभिरक्षामि झटिति ।
विचिन्त्यैवं जीवो गुरुपदमितो याति मुनिताम् ॥३७॥

त्यागः सचित्तस्य समानभावा, भ्रमिस्तु भृङ्गेण धरातले शयः ।
केशस्य लोचो भ्रमणं पृथिव्यां, चर्या मुनेस्तद्धरणे गुरुः सति ॥३८॥

तं मुण्डयेच्छुद्धतमे मुहूर्ते, भवेद्विशिष्टः परिमुण्डने विधिः ।
ततो विधौ शास्त्रकृता विभिन्न-मादेशयुग्मं कथितं यथार्थम् ॥३९॥

गार्हस्थ्ययुक्ता न सचेतनादीन्, बुध्यन्त आप्ता न यतः स्वधीतिम् ।
षट्कायभेदान् सविशेषबोधा-ज्ज्ञात्वा तदीयां यतनां विसेध्युः ॥४०॥

महाव्रतानामपि लब्धबोधाः, सम्यक् परित्यागपरीक्षणेषु ।
सुलब्धपाराः, श्रमणा द्वितीये, स्थाप्यन्त आर्यैश्छेदयाभिधाने॥४१॥

छेदोपस्थापनीयाभिहितिमुचरणात् साधुपर्यायसङ्ख्या,
गण्या यस्मात्ततोऽमी घृतपरिणतिका सद्वितीयाच्चरित्रात्।
साधूना सर्वचर्या मुनिपतिगणतद्वासिना निश्रया स्यात्,
पश्चात् प्राप्त श्रुतालिं परिणमितवृश स्यात्तृतीये चरित्रे ॥४२॥

एव श्रामण्यचर्यामनुगत उदितो मोहनीयक्षयाय,
तत्रापि प्रान्त्यभागे यदि भवति कणो लोभगो नाशनीय।
तत्राऽसौ शुद्ध आत्मा चरणमनुपम तुर्यमाधाय तिष्ठेत्,
सूक्ष्माक्त सम्पराय जिनपतिचरणाहेशमात्रेण हीनम् ॥४३॥

जिनाना चरित्र कषायैर्विहीन, यथाख्यातमेतद्धि यत्र समेपु।
समग्रा पुरोक्ता अधिकारपात्र, समाश्रित्य वर्तन्त एतच्चरित्रम् ॥४४॥

एव साध्यस्य काष्ठा विविधगुणवतीं लक्षणीकृत्य पञ्च,
प्रोक्ताश्चारित्रभेदा शिवपदपथिका सयतारया वहन्त।
सर्वेऽप्येते दशापि प्रवरगुणगणा भिन्नभिन्नस्वरूपा,
क्षाय साधुत्वमेपा निजकृतिसजुपामीर्प्यया हीनचित्ता ॥४५॥

नम्या सर्वेऽपि जैनै परमपदगता ईक्षितारो गुणाना-
मत्ये स्थाने स्थितास्ते नतिपत्सहिता सवदा दस्तु साधौ।
यत्नानेकस्वरूपाश्चरणमधिगता भिन्नभिन्नोरुचेष्टा,
सर्वेऽप्येते समा स्युर्मक्तनरपतिस्थानभेदोऽपि नाऽत्र ॥४६॥

सयते नम्यपादा मुनीशा, धर्मानीके त्वधर्मातिरिक्ता।
मोहोन्माथे यद्धक्षा सं ते, नम्या गुण्या सर्वदा सन्ति लोके ॥४७॥

धर्मातिरिक्तं सकलं समुज्झित-मनन्तरं चापि परम्परं च ।
तेनैव शास्त्राधिगतावमीषां, स्थानं यदेते दुरितान्निवृत्ताः ॥४८॥

धर्मातिरिक्ते नहि सद्दृशां स्या-च्छ्रेयस्त्वबुद्धिर्जगतीपदार्थे ।
तथापि पापप्रवरोऽवसाय इतीह नो तेप्यधिकारिणः स्युः ॥४९॥

मिथ्यादृशो जीववधेषु सक्ताः, परिग्रहस्य प्रचये च लीनाः ।
ते त्याग(मोक्ष)मार्गोदितयः समस्ताः, संसारमार्गा इति सङ्गिरन्ते॥५०॥

न काकवक्त्रे परमेष्ठिवाचो, निष्ठा वधे यैं च परिग्रहे च ।
तेषां हि वक्त्रे शिवसार्थवाचो, भवेयुरा नैव च तासु रागः ॥५१॥

ज्ञानं मुनीनां शिवमार्गसिद्धयै, पर्यायमानेन ततो ह्यमीषाम् ।
अङ्गोदितीनां क्रियते हि दानं, नेत्थं विदन्ति प्रसभं ह्यगीताः ॥५२॥

उद्घोषणां कर्तुमलं नयानां, ये सन्नयेषु प्रसभं प्रवृत्ताः ।
आरम्भमग्ना नहि जैनवाचां, हीनां वधाद्यैर्गदितुं समर्थाः ॥५३॥

शास्त्राणां प्रथनं कृतं जिनवरैः सद्वस्य धर्मोदये-
रादानाय शमप्रबोधचरणान्यघोत्तराणि सदा ।
धर्तुं सत्परिणामरत्ननिचितेः पाठोऽपि तेषां मुनेः,
तत्तत्साध्यमृतेऽङ्गमुख्यपठनं शाठ्यं परं कदृग्दृशाम् ॥५४॥

मत्यादीनि विबोधनानि भवितां चत्वारि सन्ति स्वयं,
जातानि प्रशमाकरं श्रुतमिदं तीर्थङ्करोक्तं परम् ।
कारुण्यं भवभावविच्युतिकरं चित्ते निधायात्मनां,
दत्तं तत्सफलं भवेद्यदि पुनरुद्यम्यते मुक्तये ॥५५॥

मत्यादय सन्ति ससाधना इह, बोधा -स्वरूपेण फलेनयुक्ता ।
आदेयहेयादिफला स्वय ते, श्रुते तु चारित्रफल न चान्यत् ॥५६॥

ये त्वात्मवेद्यो न निवृत्तचित्ता, न सवराणा धरणे प्रसक्ता ।
मिथ्यादृशस्ते मतिशास्त्रहीना-श्चक्षुर्वृथा कूपपतज्जनानाम् ॥५७॥

अध्येय मुनिमि सदा गुरुपदोराराधनातत्परै-
यद्वक्त्राद्विनिरेति शास्त्रममृत नित्य मृतेर्वारकम् ।
घासोऽनेन गुरो धुले फलभर दत्ते मुनित्वे धृतिं,
नोक्त ह्येकचरस्य स्वयमसुखो धम परार्थान्वितं ॥५८॥

सद्धेऽत्र पूज्यपदवे गुणसङ्घयुक्ते,
मैश्चतुर्भिरुदितेऽमलमार्गकाक्षे ।
उद्देश एक -उचित सकलाघनाश-
स्तनोयसा मुनिवरास्तत्सेविनोऽन्ये ॥५९॥

दा सुधान्नमिति यद्वदित मुनीश-
स्तत् सयमस्य परिपुष्टिनिधानहेतो ॥
प्रेयात्तिरस्य मनुते निरघैस्त्यना-
द्यत्प्रोच्यते परभवे शमशास्त्रतापि ॥६०॥

मुरारिस्त्रिखण्डस्य नाथो विरत्या, हीनस्तथा श्रेणिकराजराज ।
भविष्यतस्तीर्थकरौ तदेतत्, निदानस्यास्य मुनित्वदानात् ॥६१॥

मुनिभ्यो नितान्त स्तौतीद्धवर्गो, निदान सुधाना धनिश्रावकाणाम् ।
यदन्नपानोपधृतिप्रधान, तेषा भवेत् सयमसाधन सुखम् ॥६२॥

याच्यं परेभ्यो मुनिभिर्यदेतद् , मुधाऽस्य हानं विहितं किमेभिः ।
दोषोज्झितं तन्मुनिभिर्गृहीतुं, युक्तं यतो याचितमेव तेषाम् ॥६३॥

अकल्पितं न लभ्यते परं पचिक्रिया यदा,
मनो दधत्तु साधुपूद्यतं तदा तु दोषितं तकत् ।
अरण्यसूतकादिकेऽपि दानशून्यपाचनं,
ततश्च शक्यतोत्थितो मुनीशधर्म आहितः ॥६४॥

फलं दातुर्दानात् परिणतिदिशामाश्रितमिति,
मुनित्वाप्ति प्रेत्याप्य—इति मनसा ह्यभिलषन् ।
असौ दुष्करकारस्त्यजति च सदा दुस्त्यजमिदं,
न जात्वर्थ(र्घ) लेखे लभत उदितं लेखविगतम् ॥६५॥

दाता चेद्भवतीदृशो मुनिमभिप्रेत्याघराशिं क्षिपेद् ,
द्रव्यं चेद्रहितं विशुद्धिविधिना पापं क्षिपेद्भूरिशः ।
किन्त्वल्पं विदधाति नूतनमयं पापं परं नानुगं,
पुण्यं साग्रमुपैति बोधरहितो दाताऽशनादेर्मुनौ ॥६६॥

तारकं भवोदधेः समर्पकं गुणावलेः ,
शोषकं तमोदले विबोधकं शमाचले ।
आश्रवाम्बुनाशने निदाघतापसन्निभं,
मोक्षसार्थवाहमेनमर्चतान्मुनीश्वरम् ॥६७॥

भवसागरतीरमभिप्लवनं वरसंवरनिर्जरणोन्मिलितम् ,
जिनमार्गमनुश्रयितुं प्रवणं परितर्पयतीह निरीहजनम् ।

शमबोधचरित्रगुणापणत शिवसाधनशुद्धसहायकृते ,
गतकाममनुश्रितधर्मपर परिचारयतिश्रयताच्छ्रमणम् ॥६८॥

भव्यमाराधयेच्छिवपथ साधयेत् गुणगणाप्तिनिपुण हृत्य धरेत् ।
पापमार्गाच्च्युत समरश्रेणिग निजरावहनग सयमधर हृदि चिन्तयेत् ।
कर्मदावानले शमपयो वर्षयेद् गुणिजने मोदमनिश मनसा वहेत्,
क्षान्तिवारानिधि कृतमघ चिन्तयेन् मन्तगे नैव गमन सुचनो
धरेत् ॥६९॥

न यस्य रागरञ्जन न लेप आश्रिते जने,
सचित्तमुख्यसाधने न सङ्गलेश आप्यते ।
ज्वलँत्सपोजतेजसा दिवाकरोऽवदीप्तिमान्,
स सौम्यतागुणैर्जनेषु चन्द्र आप्तवानमुम् ॥७०॥

स ईदृश मुनिं सदा श्रयेत भावशुद्धितो,
द्वयेऽपि याति सद्गतिं मुनीश्वरोऽथ वन्दक ।
न जैनशासने मताऽधमणरीतिरल्पश ,
प्रदीपकान्तिवत्समेषु जायते फल वहौ ॥७१॥

स जैन म्यात्छ्रेष्ठ प्रचुरतरगुणैर्युक्तमनिश,
सदा मोक्षोद्योग दधति च परमानन्दकलित ।
शिवाप्त्य सत्साधु निजपरिकरतो वत्सलधर,
नमेन्महत् शुद्ध निजजननफल नापरमत ॥७२॥

इति सप्तविंशोऽध्याय ।

। अष्टाविंशोऽध्यायः । (श्रमण्यधिकारः)

जैनाऽसौ श्रमणीगणं शिवपथोत्साहं धरन्तं सदा,
पश्येत् स्वीयकुटुम्बलोकललनावर्गान्मुदा सादरम् ।
स्त्रीत्वाज्जन्मन आरतोऽपरबल निश्राययो जीवित-
स्तं संरक्षणमानभक्तिकरणैः पुष्याच्च धर्मोद्यतः ॥१॥

तं रक्षेन्निजसारसुन्दरतरस्त्रीसार्थमध्ये धरन्,
तस्योपासनया स्वकीयजननं सम्प्राप्तसारं निजम् ।
मातास्त्रीभगिनीमुखः प्रतिदिनं स्वस्योक्तितो मानये-
देवं चेत्प्रविधीयते यदि तदा सच्छ्राद्धतामाश्रयेत् ॥२॥

स्त्रीभ्यः पुराऽनेकविधान् प्रचक्रुः सुदारुणान् देवनराग्रगाणाम् ।
सङ्ग्रामलक्षान् महतो भयङ्करान् योऽसौ मुरारिः समदीक्षयत्
स्त्रियः ॥३॥

मात्रा पुरा सप्त वराः सुपुत्र्यो व्युद्ग्राहिताः कृष्णपुरो विमार्गणे ।
याः स्वामिनीत्वस्य कृते स विष्णुस्ता नेमिनाथं सकलाः समर्पयेत् ॥४॥

द्वारावत्या विदाहं जिनपतिमुखतो भाविनं वेदयित्वा,
शाम्ब-प्रद्युम्नहेतोर्मरणमुखकृतोग्रान्निदानाद् मुनीशात् (तमोऽन्तात्)॥
पुर्यां तत्रांखिलार्यां प्रव्रजनकृतयेऽदापयद् घोषणां सः,
यः कश्चिद्दीक्षितः स्यात्तनुजमुखजनं निर्वहिष्यामि तस्य ॥५॥

परःसहस्रान् जिनराजपार्श्वे, राज्यादिलोकान् समदीक्षयत् सः ।
विष्णुस्तथाकारणतो न्यबद्ध (भान्त्सीत्) श्रीजिननामाऽचलितस्व-
भावम् ॥६॥

शिप्यापणान्मुनिपतिभ्य उपार्जित प्राग्,
यत्तीर्थनाम जिनपते परिवन्दनाया ।
तद्धारित फलभर सुनिकाचनेन,
सेनापरामवभवोद्दलनाय दीक्षा ॥७॥

मगधदेशविभुर्नृपनायको, विविधकूटभरेण समजयन् ।
बहुतमा ललना जिनवीरत श्रमणमार्गमय समतारयत् ॥८॥

विविधशास्त्रसुधारससेकत , (फल) श्रमणवृत्तिरुद्गमफलानता ।
स्वयमशक्तित उग्रप्रसक्तितो, भवरतोऽपि परान् कुरुते मुनीन् ॥९॥

नरा यथा मोक्षविमार्गणोद्यता-स्तथैव नार्या भवभावभेदिका ।
दुर्गं सुदुर्गं व्यतिवृत्य मोह-मनन्तबन्धान् प्रविनाशयन्ति ॥१०॥

सम्यक्त्वलाभात् प्रथम सुदीर्घा, क्षेया स्थितिर्मोहनृपस्य तीव्रा ।
अतीत्य ता चेल्लना समीयु प्रयान्ति कैवल्यमिमा (ममू)
न चित्रम् ॥११॥

स्त्रीतस्य हेतुर्यदभूदसु सा-ऽनन्तानुबन्ध क्षयितु समर्था ।
सा किं न शेषा प्रकृती क्षिपेत, भागे ह्यनन्ते बलमेव तासाम् ॥१२॥

दर्शने विबन्धक च कर्म व्रत, प्रगीयते,
क्षेपकोऽस्य साधुतोऽपि निर्जरेदसङ्ख्यकम् ।
अस्ति चेत् समर्थताऽङ्गनाजने तदाश्रिता,
तदा सदा स किं भवेन्न साधुतापदान्वित ॥१३॥

न चाम्बर विरोधभाक् चरित्रसम्पदा मत,
यतस्तनोर्न किञ्चिन्न्यदाश्रित ममत्वकृत् ।

न धर्महेतुतो मता तनुर्ममत्वसाधनं,
तदाऽम्बराणि किं ततस्तथाभूतानि सन्ति न? ॥१४॥

पत्यौ मृते तदनुकश्चिदिहाङ्गनाजनः,
स्नेहाद्विशेद्यदि चितां जनतासमक्षम् !
तस्यास्ति दुस्त्यजमिदं किमु चीवरं यद्,
नग्ना न सन्ति बहुशः किमु योगिकान्ताः? ॥१५॥

स्थानानि सन्ति ललनाङ्गगतानि जीव-
संसक्तिमन्ति यदि नैव ततश्चरित्रम् ।
तासां तदा पुरुषकायगतानि किं नो,
चिह्ने गुदे जठरभाग उदीक्ष्यतेऽङ्गी? ॥१६॥

षट्कायजीवयतनाप्रयतस्य न स्यात्,
पापस्य लेश इति वारिधरेषु सिद्धाः ।
न ह्यङ्गनासु यतना नहि, जीवबोधात्,
तत्केवलं चरणयुक्तममूषु (न स्यात्) कि न? ॥१७॥

अध्येतुमर्हा नहि दृष्टिवादं, स्त्रियस्तदाऽऽसां किमु केवलं स्यात् ।
न जातिहीनाय चरित्रदानं, ततो न किं सोऽव्ययमाप्नुयान्नो? ॥१८॥

जिनादिकल्पा न भवेयुरष्टा-व्द्यानो(उ)नवर्षा विधिशास्त्रवाक्यात् ।
एकोनत्रिंशच्छरदामधस्ता-च्छ्रामण्यभावोऽपि न केवलं किम्? ॥१९॥

भवेन् मनः पर्ययवेदनं न हि, त्यक्तो न यावद्गृहकार्यभारः ।
ततो न किं स्यात्स्वकलिङ्गशून्ये, सार्वज्ञ्यमुक्ता कथमत्र भक्तिः ॥२०॥

नाथ प्रकृष्ट ललना प्रयान्ति, स्थान तत किं परमेयरुग्ना ।
पापोपचित्या नहि ता स्वतन्त्रा, धर्म तु कस्ता परतन्त्रयेन्नु ॥२१॥

न चास्ति साम्य त्वध उर्ध्वगत्यो , स्पष्टो विरोधो जिनराड्विचारे
(अ जिनेन्द्रमुन्ये) ।
समस्तसौख्याधिमियर्ति साऽग्र्य, स्थान युत केवलशाश्वतश्रिया ॥२२॥

तप प्रभावोऽसम आर्हताना, नगावरोधेऽथ पुराण (रोऽघ) नाशे ।
प्रत्यक्षमासा प्रबलो जगत्या–मसौ तत किं न शिव क्षमूषाम् ? ॥२३॥

विकल्पभेदान् प्रविदश्यदभि–र्भाष्ये न्यगादीत्वरलिङ्गभेद ।
भेदो न चोक्तोऽत्र मनोविबोधे, लिङ्गोद्भवोऽस्तु प्रमदासु मोक्ष ॥२४॥

स्त्रियो जगत्या खलु दुष्करक्रिया , प्रेतेऽपि पत्यौ मरणावधिं या ।
वर्मेव रक्षन्ति सदा स्वशील, मृतेषु नरेषु नरास्तथा नहि ॥२५॥

रक्षायै स्वकशीलरत्नसुनिधे कोटिं व्ययाना परा,
या सत्यो जगतीह सुन्दरतरोद्धावा न किं सेहिरे ? ।
तासा शोषितपापिका गुणधरीमाप्या दशा को नव ,
श्रद्द याद्भतकुश्रुतिस्मयमदो नैवागमौघेरिताम् ॥२६॥

श्रद्धा हि धमस्य पवित्रताभू–न्मूल सदा जीवगत सुगार्यम् ।
तद्रोपयेद्धशगत सुरामा – स्ता सुष्ठुमार्गा श्रमणीसुसङ्घात् ॥२७॥

वशे स्थले चापि भवेत्प्रभुत्व, आज्ञा स्वकीयामनघा निवर्तुम् ।
निवेद्य तस्मिन्छ्रमणीसमूहो – ह्यहं गणीश श्रमणीवरेयु ॥२८॥

निवेश्य ताः साधव उग्रसत्त्वा, ग्रामान्तरे वासमुपश्रयेयुः ।
वासो हि मासद्वयमेव धाम्नि, गणोद्धुरैस्ता अपरं तु नेयाः ॥२९॥

प्राक् प्रत्युपेक्ष्यापरधाम वृद्धा, योग्यं मुनीशाय निवेदयन्ति ।
मत्वा निरावाधमुदारभावं नेतुं परं धाम नयेयुरार्याः ॥३०॥

यथाऽवरोधस्य नृपा गताघं, कुर्वन्ति देशान्तरगन्तुकामाः ।
रक्षापुरोगं नयनं तथाऽऽर्यै—स्तीर्यन्त आर्याः शुभसत्त्वरक्ष्याः ॥३१॥

गणोद्वहा नैव समे मुनीशा, आर्यागणं वर्त्तयितुं समर्थाः ।
आर्यागणं वर्तयितुं क्षमो यो, भवे तृतीये शिवगो ध्रुवं सः ॥३२॥

सूत्रे हि पर्योषणकल्पनाऽस्ति, द्वितीयभागे प्रथमाङ्गसंस्थे ।
गण्यादिपुगात्पृथगुक्त आप्तैः, सार्यासु धत्ते गणधार आज्ञाम् ॥३३॥

यथा पदानि ग्रथितानि गच्छे, सूरीश्वरादीनि सुसाधुमान्ये ।
तथाऽत्र पञ्चापि महत्तरीमुखा—न्यर्च्याणि साध्वीगणपालकानि ॥३४॥

आर्याऽपलापे त्रय एव भेदाः, सङ्घस्य वा पञ्च न चेदमार्यम् ।
तत्सूत्रभेदे प्रवणो हि मन्यात, साध्वीव्युदासं ननु नग्नचारी ॥३५॥

कस्या अपि स्पर्श उदस्यते स्त्रियाः, स यात्वसौ त्याज्य उदारसत्त्वात् ।
स्पर्शः पुरुषस्य तथा द्वयोर्भवे — च्चारित्रसारस्य यथार्थरक्षा ॥३६॥

धामद्वयं तत्पृथगेतयोः स्याद्, गमागमौ नैव न च प्रवेशः ।
यथा तथाऽन्योऽन्यसमागमो न, यथार्थतथ्या जिनशासनाज्ञा ॥३७॥

अतो ऽन्यपेक्षि श्रुतमार्गरै श्रुते, वर्षादिहेतोरपि धाममध्ये ।
ऊर्ध्वस्थिति शीलसुसाधनाय, न पञ्चम स्याद्गृहिणा न चेक्षणम् ॥३८॥

रक्ष्या श्रमण्य सकलस्वशक्त्या, समस्य सङ्घस्य शिवाध्वसिद्धये ।
अकार्पुरन्या श्रमणीजनस्य,(रक्षा)टुष्टोपसर्गात् सूरिकालकार्या ॥३९॥

शशाङ्कशशाकबन्धू चक्रतू रक्षण प्राग्,
न्शागतहतिशक्तौ आर्यिकाया प्रकामम् ।
रुचिरमुनिनिधीना दुष्टनिःशीलरुद्धा
सकलनलक्लामिरार्यिका त्रातुमुत्कौ ॥४०॥

परिपेलवसत्त्ववर्ती श्रमणी, शिवमार्गपरा निरता विमला,
शिशुपालतपस्वि जराज्वरिता, किमु रक्ष्यपदानुगता न मता ।
रहिता व्रतधारणया गृहिणो, यदि तामसहा पटयेयुरिह,
व्रतलोपमधिश्रयति प्रवरा, तदुदाहरको नहि सत्तविद् ॥४१॥

तत्त्वतोऽनुमान्नहि स्ववेदधारको विभु
यत समस्तवेदनाशसम्भवा समस्तविद् ।
वेपदेहमश्रितो विकार आत्मनो ननु
न वाऽते यत सको न मोहजातिसम्भव ॥४२॥

यदि च सङ्गमानता विनायिकाऽस्मि केवले
सवेदले सतीह कोऽपि चीवरेण वेष्टयेत् ।
तन्न विनाशि केवल विभूरीभूत नहि ?,
यद्वाङ्गनाशुचेन चेलवा तु नश्यति द्रुतम् ॥४३॥

यदि च संहननं नहि योपितां, प्रथममेतदरिष्टमवाससाम् ।
यत इदं नहि जैनमते क्वचि-द्भवति कीकसतो जनकाश्रितात् ॥४४॥

सङ्ज्ञी यो जातिमाप्तो नरभवसहितां स प्रभुः केवलाय,
संहननं यो विभर्ति सकलसुरगतिप्रापणादाद्यभावि ।
विघ्नानां घातिजानां क्षणभरकृतितो नाशमाधातुमर्हं,
मत्वेदं सर्ववेदाः शिवपदमयितुं द्रव्यतोऽर्हाः श्रुते न ॥४५॥

वेदो नपुंसकमपि पुरदाहतुल्य-श्चेद् द्रव्यतो न विदधाति विवाधमाल्याः ।
भावात्तु ते प्रवरमाप्य वल त्रयोऽपि, श्रेणेः क्षयं ननु व्रजन्ति न
कापि शङ्का ॥४६॥

प्रवरवरशासनं जगति जिनशासितं, द्रव्यमेकान्तिकं न ह्युवाच,
प्रवलतरमोहतः परवशितचेतनो द्रव्यमेकान्तिकं प्राह मूढः ।
सिचयचयबाधनं द्रविणललनाश्रितं वेदमाहानुयुक्तोऽधर्मोक्तिः,
शृणुत सुजना जनिं वरसुफलसाधनीं वाचमाधत्त चित्ते स्वकीये
(ऽर्हदुक्तां) ॥४७॥

वासोऽन्वितात् सितपटाद्धरिद्-म्बराणां, जातः प्रभव इत्यभवत्तदङ्काः ।
प्रश्ने कृते जनतयाऽम्बरसत्त्वजाते, दिक् चैव मेऽम्बरमिति प्रतीता
तदाख्या ॥४८॥

प्राक् पार्श्वनाथजिनपस्य बभूव सङ्घः,
साधूद्धुरः कलितसर्वासितादिवर्णम् ।
वस्त्रं दधच्चरमतीर्थगतस्तु शुभ्रं,
ख्यातं ततो जगति शुभ्रपटा इतीमे ॥४९॥

ईर्याद्या नहि साधुतामनुसृता निर्ग्रन्थराणा यतो,
रात्र्यादौ लघुनीतयेऽपि निरयन् कुर्यात्कथ रक्षणम् ।
जीवाना करिपादवद्धि दधत श्वेताम्बरा आयत,
पादोन्मार्जनमस्ति सम्भवपद जीवावन निश्चयपि ॥५०॥

सूक्ष्माणा नहि दर्शन भवभृता वस्त्र विना वादिनो,
नच स्याद् भ्रमरोपम हि गमन प्रासादिहेतोर्यते ।
निष्पात्रस्य कथ महोज्झिती पर स्याता विनोपक्रिया,
हा ! हा ! निश्चितनष्टमूलचरणोऽसौ नग्नकायो मुनि ॥५१॥

यथा जिनाना वरतीर्थनाम्नो, भोगे भवेदिन्द्रमुखै कृताया ।
सत्प्रातिहार्यैश्चिरराचनाया, अरागभावात्तु न दोषलेश ॥५२॥

नह्यचने तत्प्रतिविम्बराशे र्विचित्रवस्त्राभरणैर्बुधानाम् ।
नो चेन्मौ तर्हि कथ विचक्षु-र्वस्त्राञ्चलोरीक्रियतेऽर्हदर्चा ॥५३॥

विधेश्चित्राधारा परिणतिमिता विश्वविषये,
यदेक निर्माय प्रदमशुभकर्म्याऽस्ति न विरति ।
स्त्रिया लुप्त्वा शाटीं परिणतिमितोऽसौ जिनपते
र्विलोपायाऽङ्गोऽस्तु शतमुखनिपातो विधिकृत ॥५४॥

दिग्वस्त्रैर्लब्धनामगणैस्तदनुगै शोच्य द्वय स्वान्तरे,
सम्यक्त्व कथमाप्यतेऽधिगमिक सूत्र च योग्य कथम् ।
चेत् साध्व्या, नहि सा पुन श्रुतमृते साधो प्रसङ्गे तया,
वृत्तिभङ्ग उदीयते तत इत चीरेण नाश मतम् ॥५५॥

सङ्ख्यातीताः स्त्रियोऽगुः शिवपदमसमं प्राप्य कैवल्यमग्र्यं,
ग्रैवेये ते हि जग्मुः सचरणभविनो ये नु चैते पुमांसः ।
तत्रेयुर्येऽप्यभव्या न च पुरुषवरा नैव चैता अनाद्यं,
प्राप्याऽस्थ्नां सञ्चयं स्युस्तदपगत शुभस्यास्ति वाचां प्रसारः ॥५६॥

श्रीआदिनाथेन विधेर्विधात्रा, बोधाय मुक्ते भरतानुजस्य ।
आर्ये, ततश्चाप स बाहुसाधु–र्निर्ग्रन्थयोपे ह्यमितप्रभात्रे ॥५७॥

चलितमपि चरित्रान्नेमिनाथस्य बन्धुं,
व्रतपथदृढतायै योपदेशं ततान ।
स्थिरतरचरणोऽसौ बोधमाप्य प्रजात–
स्तत इति न समोऽयं राजिमत्याः प्रयत्नः ॥५८॥

भूपेषु वर्यो नृप आर्हतः श्री–सुहस्तिपादाम्बुजभृङ्गरूपः ।
श्रीसम्प्रतीति भरतं सशोभं, चकार यश्चैत्यमुखैर्विभूषैः ॥५९॥

सुहस्तिनस्ते भरते त्रिखण्डे, स्वदीक्षितानेकमुनीन्द्रवर्यैः ।
प्रस्तारयामासुरनेकशाखा–प्रशाखयाऽशेषधरां सुसाधून् ॥६०॥

तानाचार्यान् विविधविधिना पालयन्ती जिनानां,
धर्मस्योग्रां सकलसुकृतिनां भाविमोक्षप्रधानाम् ।
ख्यातिं चक्रे प्रवचनयशसे सोदरेणाप्तसङ्ज्ञान्,
नाम्ना यक्षा प्रवरमतिधनाह्यार्यगिर्याख्यधर्त्री ॥६१॥

मात्रा गुरुभ्योऽर्पित आर्यवज्रः, षण्मासमात्रावयस्कबालः ।
स्वोपाश्रये तं धृतवत्य आर्याः, कथं न सङ्घस्तदुपक्रियां स्मरेत् ॥६२॥

जैनोऽमो विविधद्धाति हृदये स्नेपा जनाना मतिं,
जैनेन्द्रे वरधमकमणि परा कर्तुं सुधासोदराम् ।
चिन्ता तत्र विशेषतो निजकुले मात्रादिके स्त्रीगणे,
ता सफलीकुरुते श्रमेण सुधूपार्यासङ्गतो बुद्धिमान् ॥६३॥

आर्याणा महिमाऽयमास्तयशसा वश्म्य यन्निश्चल,
शील मेरुसम बिभर्ति ललनालोक समस्तोऽमलम् ।
तत्रैषोऽत्र भवेद्यदीतरकुले जात नर न स्पृशेत्,
शीलेनास्तयशा भवेच्छ्रमयुपा ससगरक्तो भवेत् ॥६४॥

येषामार्याकुल नो सुकृतकृतिनिधौ शुद्धमार्गप्रवेष्टृ,
धर्माचारे प्रवीणा सुकृतवरखनिं देष्टुमर्हाऽनलानाम् ।
शुद्धा धर्मस्य चेष्टामपरपुरुषत स्याच्च धर्मप्रवृत्ति,
स्त्रीणा नो तत्र शील भवति ऋजुशीला धर्मनाम्नाऽघमग्ना ॥६५॥

आर्याकुलेनापि तथात्र कार्य, श्राद्धयो यथा स्यु सुकृतोद्यता दृढम् ।
वगा महान् यत्र पुरुषादृथाऽऽसा, कुल च धर्मप्रवीण व्यधास्यन् ॥६६॥

यथा च मोह न व्रजेयुरन्य-कुलोत्थिते पुसि पराश्च धर्मे ।
भवेयुरेता व्रतधारिवृत्तै, सत्कारमाप्या श्रमणीजनेन ॥६७॥

निसर्गसम्यक्त्वमुदीरित श्रुते, श्राद्धाभकाणा प्रवर तदेतद् ।
आर्याजनाद्धर्मपरायणत्व, जात समाश्रित्यबलाजनस्य ॥६८॥

शोभनस्य कुलधर्मसद्विधे-र्या पुन फलमस्यगऽनघा ।
भाविनी भव इहापि ता गुन-र्लभेयुरार्यिका न चापर ॥६९॥

श्रमण्याः सत्कारं विपुलविधिना श्रावकजनो,
विदध्यान्नित्यं चेत् कुलमपि सकलं तत्कृतिपरम् ।
अवेदेवं धर्मोद्यमपरहृदः सर्व उदिता-
ज्जिनेन्द्रैः सद्धर्माच्चलयितुमलं नाऽमरगणः ॥७०॥

जैनोऽसौ धर्ममूलं विनयमधिगतो धर्मकार्योद्यतेषु,
साध्वीवर्गेषु यस्माज्जिनगणयतिनां या गुणानां प्रसक्तिः ।
तां सर्वां मूलरूपां विशदतमगुणामेष वर्गो दधाति,
मानं धत्ते गुणानां च इह नरगणो धन्य एवैव जैनः ॥७१॥

इति अष्टाविंशोऽध्यायः ।

। एकोनत्रिंशोऽध्यायः । (श्रावकाधिकारः)

जैनो यो मनुते भवाब्धिमटतां सूक्ष्मान्निगोदाद्बहि-
र्निस्सरणं नहि दुष्करं परकृतं लोकानुभावो यतः ।
सम्मील्याश्रितभव्ययाऽघनिचिति दुःखित्वभावे धरन्,
निर्मायाऽल्पमसुश्रितं नयति तन्नेदं फलं स्वोद्यमात् ॥१॥

एवं क्रमेण समिलायुगयुक्तिवत्स,
मोक्षस्य भूमिमनघां नरतां च तत्र ।
देशं कुलं प्रवरजातियुतं लभेत,
सुश्राद्धमेकमलमश्नुत आत्मयन्नात् ॥२॥

मोहस्य संस्थितिमयं क्षिणुतेऽप्यबोधा-
देकोनसप्ततिमितामधिकां च किञ्चित् ।

वाराधरेषु निरवधितकोटिकोटिं,
नेव तथापि लभते श्रमणोपसेवाम् ॥३॥

भव्यत्वभावे परिपच्यमाने, भवेद्विनाशस्तदुपयवस्थिते ।
कृतिर्भवेदात्मन ईदृशी या, भेदस्तु भावी कुलिशाभपापे ॥४॥

न तादृशीयन्तमटाट्यतो भव, प्रस्फोरयामास कृतिं कदापि ।
गीत ह्यपूर्वं तत एव विज्ञै-रभ्रान्तपूर्वं करण कृतिं ताम् ॥५॥

नैतत्कस्यापि पूर्वं जगदनुभवतो वर्जयित्वाऽऽत्मयत्न,
जात कस्यापि जन्तोर्न भवति भविनो भाविनीद्धेऽपि काले ।
तद्ध्रुवं स्वात्मयत्ने प्रचुरतरबले स्फोरिते भव्यभावाद्,
जात श्राद्धत्वमस्मान् परममधिगतौ शुद्धसम्यक्त्वलब्धे ॥६॥

एतच्चित्ते निधायेतरजनहृत्ये तत्त्वनिष्ठा प्रमाय,
शुश्रूषा धर्मरागो जिनगुरुविषयेऽभिग्रहो व्याप्तुतौ चेत् ।
सत्या ज्ञेया हि तस्मिन् परिणतिरमला शास्त्रवाक्यानयेन,
स्वस्मिन् ज्ञाने यद्वन्न च परवशिनो नैतदपराङ्मुताभाक् ॥७॥

सत्त्वेऽस्य स्वात्मनोऽपि प्रभवति रुचिरा नित्यतान्वितेऽथ,
जीवादौ स्यात्पदाङ्का रुचिरमनराऽकम्पनीया सुयोधात् ।
द्वेधाऽम्या दुःखघाम्नि फलमनुघृणयोद्विग्नता जन्मवार्द्धे-
र्मोक्षे लीन मनश्च न भवति कणदास्तत्त्वभूते (सार्थे) दुरात्मा ॥८॥

सम्यक्त्वे शुद्ध (भाव) रत्ने दृजिनचयहते प्राप्ते तीव्रभावाद्,
यत्नेनात्मामलत्वकरणकृतिमरे स्यात प्रवृत्ति ध्रुवेन ।

अन्धोऽरण्यं प्रयातो यदि शुभसुकृतो देशकादध्वयार्यी,
चेदेपोऽशुभ्रभावी दुरितचयधरो याति मार्ग श्रमाढ्यम् ॥९॥

यथा न भाविभाग्यवान् वृथोपदेशदायकान्,
शरणमेति भाविसौख्यसम्पदा समन्वयात ।
तथा कुतीर्थ्यतन्मतानि मन्यते न दर्शनी,
मतं ततो हि दर्शने सति श्रुतं शुभं ननु ॥१०॥

एवं प्राप्तः स्वयं स्याच्छुचितरमननं स्युः परेऽपीदृशाश्चेत,
संयोगः श्राद्धवर्यैर्भवति नियमतो धर्मकल्पद्रुमाम्बु ।
संयोगाः सर्वरूपा निखिलजनचयैर्लब्धपूर्वा ह्यनन्ताः,
संयोगः श्राद्धलोके सवति तु कतिचिज्जन्मभावान्न भूरीन् ॥११॥

सम्यक्त्वाराधनं यद्भवति भवभृतो वर्जयित्वा विराद्धि,
सप्ताष्टौ जन्मभावान्न परत उदयो यत्ततो मोक्षधाम्नः ।
एवं श्राद्धैरपि स्याज्जिनमतरसिकैस्तद्धृतः स्वस्य योगो,
ज्ञात्वैतद्दुर्लभत्वं शुचितरमनसा सादरः श्राद्धलोके ॥१२॥

कुलं सच्छ्राद्धानां सदृशमनघं देवमणिमि-
र्यथा तान् भाग्याढ्यो भवति नर आराधनपरः ।
तथाभव्यत्वं स्याद्यदि च परिपाकगतिमत्,
सुसम्प्राप्तं श्रेयान् भवति जिनमार्गमतिमान् ॥१३॥

यथाऽभव्यानां स्याज्जिनपगदितश्रौतपठनं,
घने मोहे क्षीणे पुनरपि च तस्मात् क्षपयति ।
ककारादेः पाठे सुगतिगमनं धर्मकरणात्,

तत्रा स्याच्छ्राद्धाना प्रवरतरैवशजनुपा ।
कव मोहो जातोऽपगलविषभा न स्थितिमित ॥१२॥

यथा धात्र्या युप्तान्यवनितलमाप्यरुचिर,
भवन्तीष्टोत्पत्तौ कृषिकृतिगणैकार्थितमतौ ।
समर्थान्यप्येषा पचनविधिसिद्धिस्तु करणा,
तदाऽज्ञानेनाप्तात् प्रथमकरणाच्चात्र इह ॥१३॥

जीवेनाधिगत निसगजनित सम्यक्त्वमात्मा न चेत्,
तज्जायेत सुधीरनिर्मलमते सयोगतद्वाक्यत ।
श्राद्धाना वरयोगतोऽधिगमज प्राप्ति सुसेनास्य च,
सयोगैकधन न कायमुत्येत् क्वापीष्टसिद्धिग्रन्थम् ॥१४॥

चैत्येभ्योऽपि च जायते जनिभृता सम्यक्त्वमेतत्पर,
चैत्यानि प्रतिबिम्बमन्ततियुता येनाकिन श्रावकात ।
स्युर्नव न च तानि सन्ततमिहार्चाया पद जायते,
चैत्याना जिनबिम्बराजिसजुषा योग समूहोत्थित ॥१५॥

जिनवरागमपारङ्गो मुनि, शुचितरागमवस्तुकथोदिते ।
भवति सद्दृगनुत्तरताश्रितो, मुनिवरागमन समवायत ॥१६॥

समना क्रिया धर्ममयो जनाना, स्यु साहचर्यात समूहे भवेत्तत् ।
ग्रुमामवास दधता लघु स्यात्, धर्मोद्यतानामपि धर्मनाश ॥१७॥

धर्मो द्विधाऽऽद्य सहकारसाध्यो विचारसाध्यश्च भवेद् द्वितीय ।
सामर्थ्यसाध्ये द्वितीयेऽपि तस्मिन्, नोपत्तिरक्षापरिवर्धनानि ॥१८॥

शक्तेः समुत्पत्तिरथ प्रयत्नात , स्थितिश्च वृद्धिश्च ततः प्रसूते ।
समग्रमेतत्समुदायसाध्यं, मत्वेति कुर्यान् सततं सुसङ्गम् ॥२१॥

प्रबलवरपुण्यतः कल्पनातिगसुखं, साधनैः सह नरं शुद्धमेति,
प्रचुरतरमोहजः संश्रितो नहि भवेत् , प्राणिनं वृषधरं कृष्णलेश्यः
(तीर्थ्यमोहः)
सुगुरुचरणाश्रितः शास्त्रशासनयुतः प्राप्नुते जिनमतं स्वल्पयत्नात् ,
अपगतकुकर्मकः सिद्धजिनधर्मको मन्यते सुखकरं श्राद्धवर्यम् ॥२२॥

आत्माऽनादित आहितो घनमले मिथ्यात्वपङ्कोद्भुरे,
नैव ज्ञातमनेन सुन्दरतरं नित्यस्वरूपं निजम् ।
तत्सर्व जिनराज एव विमलज्योतिर्भरेणेहितं,
भव्येभ्य उदयाय तन्निगदितं मत्वा जिनं मानयेत् ॥२३॥

रागद्वेषमुखारिवर्गविलयाज् ज्ञात्वा समग्रं जगत् ,
स्याद्वादाङ्कितसर्ववस्तुनिकरं भव्याय मोक्षाप्तये ।
योऽदिक्षद् विनयेषिणे मननभूरूपं स्वरूपं परं,
जीवाद्यर्थचयस्य तच्छुचिमनाः श्रद्धापथं नामयेत् ॥२४॥

भावा भविष्यन्त उदाररूपा–स्तदा यदा शस्तमना इदानीम् ।
जीवस्तथाऽसौ शुभशास्त्रसक्ते–स्ततो यतिभ्यः श्रवणं क्रियेत ॥२५॥

ससङ्गश्चेदन्यो रुचिततरवस्तुविषयं,
स सन्तोष्यो दत्त्वा दलितविषयादिवस्तुमननः ।
स सेव्यः स्याद्भव्यैर्निरुपमविधेः सेवनगतात् , ॥२६॥

लुप्तापा जगतीह जैनमतिनां श्रद्धा समस्ताङ्गिभि-
लम्या दुष्करमेव सौम्यमनसा मुक्त्यै समाराधनम्।
प्राप्तो चिन्तकराणि कर्मदलिकान्युद्वेष्टयेद्भव्यता-
ऽऽरब्धार्थान्धिमोहरक्तमनस स्याद्दुष्कर पालनम् ॥२७॥

चेपाश्चित् फलभाजनान्तसुभगा श्रद्धा नराणा यत ,
ससार भ्रमता भवाश्रितिमता चिन्तोत्करोद्भूतय ।
स्वल्पान्येव हि साधनानि मतिमत्ससगसारोद्भवा-
न्येतान्यात्मबलातिरिक्तसहितान्यथप्रदानीह नो ॥२८॥

लभ्येय भवभावतानरता ता नेतरेऽर्हो श्रुतौ,
चिन्तामण्यमरद्रुमाहृतिपरा नेच्छान्तरा सत्कृतिम् ।
लब्धेप्वेपु भवेन्न चेन्मुधिकया तेपामनाराधना,
तत्साध्य फलमश्नुतेऽत्र तदिवाहच्छासने सद्रुचि ॥२९॥

प्राप्या श्रद्धा सुत स्यान्निजपरिजनगा स्याद्गुणाना समूहो,
मार्गानुश्रायवर्त्ती मुनिपतिसथिता पञ्चयुक्ता च त्रिंशत्।
उप्त धान्य प्रभूत भवति यदि भुवि शर्कराद्य न भूरि,
श्राद्धाना भाग्यमेतत् प्रचुरतगुणैर्वासित यत्कुटुम्बम् ॥३०॥

गपा गुणाना सुलभा स्वसत्ता, स्वजन्मन प्राङ्मुनिशासनरूपा।
हेतुर्भवेत्तत्र सुभव्यतैव, भाग्योदयोऽप्यहगुणालयेषु ॥३१॥

निगृह्य पुनरासुसंस्कृति, यदि भवेत् सुकृतायनवधने ।
इतरथा तृणपुञ्जसमुद्गम-सदृशमेव न रक्षणवधने ॥३२॥

निजगृहे तु गुणाः स्वजनैः पुरा, यदि भवेयुरुपैति सुरम्यताम् ।
निजकृतेर्यदि सम्भव उद्धरो, वरतरं त्रिकसप्तमिता गुणाः ॥३३॥

अवाम्यकुम्भः शुभवासवासितः, प्रशस्यते प्राज्ञवरैः प्रकाशम् ।
तथैव यः स्याज्जिनधर्मवासितो-ऽवाम्यः कुतीर्थ्यैः स वरोऽस्ति
जैनः ॥३४॥

हृदब्जभागे शुचिसौम्यरम्ये, कुवासनालेशविमुक्तिशुद्धे ।
लोकोत्तमानां शरणे प्रभूणां, ध्यानं सदा मङ्गलकारकाणाम् ॥३५॥

एतादृशो गुणवतो जिनसिद्धसाधून्,
धर्मं च यो धरति नित्यमरागरोषः ।
सयः स एष परधर्मगतात् समूहा-
च्छ्रेष्ठो यथा मणिगणोऽमलकाचजातेः ॥३६॥

विनयवान् श्रुतसारविबोधनः, कृतपरस्परधर्मविरोचनः ।
शिवपदं प्रति यत्नवतां समा रुचिरतो भवतीह सुनोदनः ॥३७॥

परमतानि कृतेषु गुणान् बहून्, जगति सर्वजनास्निगदन्ति तु ।
जिनमतं निजरूपमुपानय-न्नकृत आह दुरात्मन आश्रवान् ॥३८॥

यतो व्रतानां निजरूपता तत-श्चारित्रमोहोऽसुमतां विबन्धकः ।
उक्तानि नान्येन दुरात्मकान्य-व्रतानि मुक्त्वा जिनराजमेकम् ॥३९॥

चारित्रमोहस्य विबन्धकत्वं, पापान्निवृत्तेर्नहि तत्प्रतीतेः ।
तत्त्वाश्रिताया: प्रतिबन्धकत्वं, रुचेरनन्ताश्रितमित्यनन्ताः ॥४०॥

पापप्रहाणस्य समस्तधर्मै, सुव्यापकत्वात् सुरभावसाम्यम् ।
गुणे चतुर्थेऽच्युतसीम्नि तद्वद्-देशाद्विरक्तिं श्रितवत्यपीह ॥४१॥

भूयत्नपाकेन यथैव भव्या , क्रमेण सम्यक्त्वमुपान्त्यगापु ।
स्थानानि तद्वद्भवितव्यतागुणा-न्मुक्तिर्भविनी लघुदीर्घकालात् ॥४२॥

ततो न दीर्घेऽमरजीविते वा, लघुन्यपीष्टस्य विलम्बचिन्ता ।
श्राद्धा द्विधाणुव्रतसंहिता वा ऽन्यथा न तत्राऽस्ति मिदा सुरत्वे ॥४३॥

सम्यक्त्वसत्त्वे यदणुव्रतानि, योग्यत्नभाञ्जि परथा न चैव ।
गीतार्थनागैम्तु यदुक्तमेतत्, त्रसेतराणा मननाद्धि योग्यम् ॥४४॥

गुणक्रमो य प्रतिपादितोऽग्रिमै , स प्राग्गुणाना स्थिरतादिसिद्धये ।
न चाग्रिमाणा भवितव्ययोगा-दुपागतानां विनिपेधनाय ॥४५॥

नित्य सम्यक्त्वशून्या अपि जिनवचनालोचत साधव स्यु-
र्भवेये देवभाव परिणतिशुचयोऽनन्तसङ्ख्या व्रयान्ति ।
सम्यक्त्वावाप्तिहेतुर्यत उचिततरा रक्षायते जीवरक्षा,
तस्मात्स्थैर्याय सोक्तिर्न तु गुणहतये तत्त्वविद्वेद्यमेतत् ॥४६॥

असयत सयतता वदन् यो, मतोऽस्ति पापश्रमणीयमध्ये ।
शून्य स साधु यनहारवृत्त्या, तथोदिति सयमिवन्दनाय ॥४७॥

सम्यक्त्वचिह्वानि शमादिकानि, निजात्मनि ज्ञातुमिह मतानि ।
परात्मनि ज्ञातुमिद तु धर्म-रागादिकानि ग्रथितानि शास्त्रे ॥४८॥

एव च तत्त्वात्परधर्मवानपि, स्वाचारमात्रेण जिनेन्द्रधर्मी ।
साधर्मिक त म सा प्रबुध्य-माने न मिथ्यात्वकणोऽपि भावी ॥४९॥

तथैव योऽभव्यतया जिनेन्द्रधर्मात्च्युदे मुद्गिलासमानः ।
तथापि शुद्धं मुनिचर्यया मुनिं, वदेन्न तत्राऽस्ति कणोऽघघाप्तेः ॥५०॥

श्राद्धस्य चर्या जिनपस्यह्याद्या, धार्या सदा मस्तकमञ्जरीव ।
जहात्यपथ्यं सुमती रुजातुरो, यथा तथा दर्शनिनो विमिन्नान् ॥५१॥

सम्यक्त्वचर्या जिनपूजनाद्याः, करोति संसारसमुद्रसेतुम् ।
स्थिरा मतिः प्रत्यहमाहृताभिः, क्रियाभिरस्मात् प्रतिघस्रमुद्धुरः ॥५२॥

आवश्यकपट्के मुनिभावसिद्ध्यै, शिक्षाव्रतानीष्टदिने विवेयात ।
दानं सुपात्रे मलमुक्तशीलं, चित्रं तपो भावसमोघमेयात् ॥५३॥ युग्मम्

स्वाध्यायलीनो व्रतभावरूप-प्रमुख्यदर्शिश्रुतरत्नराशेः ।
सर्वास्ववस्थासु निधानभूतं स्मरेत् सदा पञ्चनमस्कृतिं च ॥५४॥

श्राद्धत्वशोभावहने प्रवीणः, परोपकारोऽस्ति ततोऽत्र यत्नः ।
यथात्मनो जीवितमेव कान्तं, तथा समेषामिति तत्प्रदेयात् ॥५५॥

त एव धुर्याः सुजनेषु ये स्यु-र्गुणान्वितान्निःस्पृहमर्चयन्ति ।
तदाऽमितान् प्राप्य गुणान् शिवाध्वो-देशास्तदर्हा न हि किं
जिनेशाः ॥५६॥

गुणानाधायान्तः सुजनसमुदायो गुणिजनान्,
गुणाप्त्युद्देशाच्चेद्भजति नितरां वै समुचितः ।
ततोऽर्हन्तोऽर्च्याः स्युर्जिनपतिगुणानां स्तवनतः, ॥५७॥

देवो धर्मो जीवमुख्यार्थसत्त्वं, जीवे न स्यान्नैव स्वज्ञानगम्यम् ।
अज्ञातेऽस्मिन् साधनं तत्फलं च, नैव स्यात्तत्सूरिरर्च्यो बुधानाम् ॥५८॥

धर्मोन्निकायैं सुसहायनिष्ठ, सहायका धर्मपरा सदैव ।
अनेकभेदा विदधीत भक्तिं, कुटुम्बिलोकान्धिनाथकारिणाम् ॥५९॥

मनोऽनुसृत्याऽध्यवसायभावो-ऽन्येषा मनोर्जितजातिकानाम् ।
तदन्यथात्वेऽपि ससाधने नरे, भवेत्प्रवृत्ति सकला समाधना ॥६०॥

मनश्च कायेन तदीयवर्गो-नादाय निष्पाद्यत आत्मरूपम् ।
कायश्च जीवस्य गृहीतमन्धो-ऽनुसृत्य तद्रूपभजो यत स ॥६१॥

सुसाधुरत्न नयहीनराद्ध-मशुद्धमत्त्वा स सुमोप गेहम् ।
यान्ते गृहेश सममार्पिपत्त-दन्ने प्रजग्धे किमु नीतिहीने ॥६२॥

चैत्यारम्भ प्रवरतरफल श्राद्धवर्गस्य कार्य,
तन्नाद्रव्य भवति च धनक नीत्यनीत्यो प्रकारात् ।
तत्राऽऽरम्भे द्रविणमाय यस्य तत्तस्य देय,
सद्व्यस्यामेऽणुकनकविषये चान्यमेतस्य सोऽर्य ॥६३॥

ग्रहस्थधर्म प्रवर हि दान, न्यायागत तत्प्रथम निरीक्ष्यम् ।
श्रद्धान्वमाद्या सुफलास्पदा स्यु द्रव्येण शुद्ध यदि तानकार्यम् ॥६४॥

भावो हि दाने फलदानस्य , पर न सोऽन्यायपथान्वराणाम ।
समन्नमेतन्मनसा विचिन्त्य, कुर्यात्सौ सद्व्यव्यवहारशुद्धिम् ॥६५॥

न हिंसावृत्त्या न च क्षुद्रमाद्यान्न चौर्ययोगान्न च वञ्चनेन ।
यद् द्रव्यमाप्त न क्लेशमाल्या-दाभन्नमो यत्र न लङ्घित
म्या ॥६६॥

लोके श्लाघा शासनस्योत्तमा स्याद्–यद्वच्छुद्धया नो तथाऽन्यैः
सुकार्यैः।
तिर्यग्देवास्तीर्थकृद्दानहेतो–श्छिन्नोद्दंशादानयन्तीह हेम ॥६७॥

पत्तने पटुतरो धर्ममहिमाऽसमोऽशेषजैनेन सत्वरमुपेयः,
धर्मगात् पटुतरात् मानमहिमाहतात् शेषकार्येण नो सुघटतेजाः।
भावनां पटुतरीं लोकसमुदायजन्यां कर्तुमर्हेण जैनमतजातां,
स्यन्दनो वरतरो देवतरुसन्निभो भ्राम्यते दानकीर्तिपरगानः ॥६८॥

श्रीशत्रुञ्जयरैवताचलगिरिप्रोद्यत्प्रभावार्बुद–
जीरापल्लिसुवर्णसानुसहितः सम्मेतशैलोऽञ्जनः।
यात्रैषां करणीयतापदमितः स्याद् दर्शनं यद् दृढं,
तीर्थेशादिविहारनिर्वृतिमुखोदन्तावलेः संस्मृतेः ॥६९॥

श्राद्धः सर्वजिनेशशासनरतः सूत्रोक्तमेकं पदं,
संसाराम्बुधितारणेऽसमफलं द्वारं नरामर्त्यशम्।
एकं शाश्वतसिद्धिधामगमने सामायिकं प्रत्यलं,
मत्वेत्यात्मनि शान्तिमुद्धरति संवारग्रवेकोन्मुखाम् ॥७०॥

दोषा ये क्रियया भवन्ति भविनां कष्टप्रचायोन्मुखा–
स्ते सर्वे सुनया विरुद्धकृतितस्तस्याः पदोन्मार्जनात्।
दुर्वाक्याज्जिनरागगीतपदतोऽर्थानां प्रलापोत्थितात्,
संसारे भ्रमणं गतान्तमिति वाक्चेष्टां श्रुतोक्तां सरेत् ॥७१॥

राजा रक्षति रक्षणीयपदगां स्वीयां प्रजामादरात्,
तत्साधनमिदमित्यवेत्य जनता तां गोधनेनाञ्चिताम्।

जीवम्यास्ति विकम्पन पर इति ग्रासोद्यतास्त्रायते,
षट्काया परिरक्षणीयपदगा जन परो मन्यते ॥७०॥

शास्त्राणा विधिवाक्यराशिरधुनत्पापप्रतानोदय,
यत्सङ्ख्यागतमानमेय इह तत्तात्पर्य सद्युक्तियुक् ।
ताभ्या यत्र निवारित पदमधो वाक्यै सहस्रैर्मनक्,
दृष्टान्तप्रतिदर्शनात् क्षणमियात्यावद्धूय सङ्गति ॥७३॥

मत्यैव वरधर्ममार्गनिपुण श्राद्ध पर समसेत,
ग्रामे यत्र जिनेन्द्रचैत्यततय स्याच्चागमत्यागिनाम् ।
निष्णा वमनिधौ च जैनमतगा क्षेत्रे गतोपद्रवे,
मत्र स्युर्गुणराशय फलधरा सत्स्थानकात्तच्चित्तात् ॥७४॥

श्राद्धस्य जन्ममरणोज्झितमेव धाम,
प्राध्यँ, न तच्च दमनेन विनेन्द्रियाणाम् ।
चारित्रमेत्र पटु तत्र तदा स्वतन्त्र-
स्तत्कारके सुबहुमानयुतश्च मद्धे ॥७ ॥

गुणाय यत्स्याज्जिनराजमार्गे, पूज्य तदेवेति सुपुस्तकानाम् ।
पूजा यत्नन्यन्नहि साधन स्या-त्कलौ गुरूणा गुरवेष तद्धयत् ॥७६॥

आराधनेन जिनपादिगणस्य मुक्ति-
राराधन च परिणाममनुप्रधानम् ।
भवेत्तुभ सोऽनुसरन् क्षणालि,
यथाशक्ति प्रतनु क्षणाँस्तत् ॥७७॥

यथार्थ श्राद्धत्वं भवति भविना शास्त्रगदितं,
जिने ज्ञानाद्यर्थास्तत इह विधेया बहुमतिः ।
न विघ्नानां भावो गुरुगुणसपर्या विदधतो,
महादानं नित्यं भवति गदिता चिह्नततिरियम् ॥७८॥

चर्यामसौ नित्यमुदारबुद्ध्या–ऽहोरात्रिकीं श्राद्धगणोचिता धरेत् ।
न चेत्समेतो मुनिभावमन्त्ये, संलेखनामुत्तरसौख्यदामयेत् ॥७९॥

जैनोऽसौ वरधर्मकर्मकरणेऽनन्योपकारक्षमं,
मत्वा श्राद्धवरं तनोति नियतं तस्य प्रभावप्रथाम् ।
सङ्घस्यापि चतुर्विधस्य नितरामाराधने स प्रभुः,
कर्ता कारयिता प्रशंसनपरस्तुल्यास्त्रयोऽप्यार्हताः ॥८०॥

इति एकोनत्रिंशोऽध्यायः ।

। त्रिंशोऽध्यायः । (श्राविकाधिकारः)

जैनोऽसौ मनुते समस्तजिनपैर्मोक्षं वरेण्यं पदं,
गन्तुं येऽसुभृतोऽर्हतां निजगतां सन्धारयन्तो मताः ।
तेषां यो भणितः सुकर्मकरणो वर्गः शुचिर्योपितां,
तं नित्यं शिवधामसाधनपरं पूजास्पदं भक्तितः ॥१॥

श्रद्धाऽनघा शासनगा सदाऽस्याः, श्राद्धीतिशब्दो न पराप्तसङ्गात् ।
बाला युवत्योह्यजराविजीर्णाः, श्राद्ध्यास्तु वर्गो जिनपैः प्रशस्तः ॥२॥

स्वर्णंगवेण यथा जनाना, म्लेच्छीकृता कोटयधिका जनानाम् ।
द्विजैस्तथा निग्रसनै स्ववेद-गर्वेण योषा प्लविता शिवाप्ते ॥३॥

न जैनमार्गे शिवसाधनाया, वणम्य वेदस्य विशेषवार्ता ।
श्रेण्या क्षपण्या स्पपयन्ति वेदा-स्त्रयोऽपि मोहस्पपणे क्रमेण ॥४॥

भावो हि जीवस्य शिवाप्तिमार्गं, म्याकुलितो रोद्धुमल, न चान्यत् ।
पञ्चेन्द्रियत्वप्रमुख तु साधन, म्यात्साधको भाव उदारूप ॥५॥

यथा मुनीना ग्रवह शिवाय, प्रवर्त्तमानो गृहिवर्गयुक्त ।
तथा श्रमण्योऽपि शिवाप्तिहेतो-रीदृश त युक्ता स्वकसेविकामि ॥६॥

श्राद्धयो गृहिण्य सकल तु कार्यं, गृहाश्रित नित्यमुपाचरन्ति ।
जग्धौ च पाने च गृहाश्रिताना, जीवारनास्कर्तुममूयदीशा ॥७॥

स्तम्बीचसारोद्वहनेन पत्यु-र्मदव यावद्धनमार्थयेद्वहम् ।
शय्या न पत्युयदि नैव लड्घेन्, पर सहस्रा शरनो दिवि म्यात् ॥८॥

विना तात बाल भवति वनिता पालितु (रक्षितु) मल,
विधायायेषा तु मवरधनिना कण्डनमुखान् ।
विना योषा बाल भवति न हि रक्षणविधौ,
कियन्काल जीवेदपरवनितारक्षितभव ॥९॥

अत स्त्रीणा प्रोक्त मतमतुलित स्वेतरनरै,
सदा धाय मक्षाऽपरपुरुषमीक्षेत न इगा ।

स्त्रिया भूषा शीलं कुलमपकलङ्कं च भवति,
सुशीला यत्रैतास्तत उदितशीलाः स्त्रियः उमाः ॥१०॥

यदा शुद्धं शीलं भवति वनिता पत्युरुदितं,
प्रतीतेः पात्रं यद् धनकुलसुतादिप्रद इह ।
भवेत् स्वामी प्रेते भवति वनिता वंशवहनी,
ततः पाल्यं शीलं चरितमुदितं प्राक्तनमुनैः ॥११॥

भवाब्धिसन्तारणयानतुल्यं, दानं सुकृत्येषु परं सुकृत्यम् ।
अस्य विधानं महिला विदध्युः कथं न तासां भवनार्धिपारः ॥१२॥

मध्याह्नकालः प्रवरो मुनीनां, भिक्षाभ्रमस्यागमसम्मतत्वात् ।
तदा च दानप्रसवो हि धर्मो, भवेद् गृहावृत्तितयाऽङ्गनानाम् ॥१३॥

त्रिसन्ध्यं जिनार्चां विधातुं समर्था, महेला यतः कालसुसाधना सा ।
खरः सन्दधात्यर्धदग्धो निषेध, महेलाऽस्ति योग्या श्रुतोक्त्या न
मिथ्या ॥१४॥

मुक्तेर्निषेधं ललनागणस्य, दिग्वाससश्चक्रुरुदारूपाम् ।
जिनेन्द्रपूजां न तु मुक्तिसाध्यां, खरस्तु मूलप्रविणाशदक्षः ॥१५॥

प्रभाते शय्यायां पठति परमां पञ्चपदनति,
विमुञ्चन्ती निद्रां यदि च निजकं स्याच्छुचिवपुः ।
स्मरन्ती तां चित्तें यदि च तनुकं स्यान्नहि शुचि,
ततश्चित्ते कुर्यात् कुलममलिनं धर्मपरमम् ॥१६॥

चैत्यं ततो गेहगतं प्रविश्य, नैषेधिकीमुख्यविधिं विधाय ।
कुर्याज्जिनेन्द्रार्चनमात्मलाभ – प्रद्योतनं पुष्पमुखैः सुद्रव्यैः ॥१७॥

स्तुतिस्तोत्रे स्तौति प्रसितममलेऽहन्तमतितमे,
गुणाना सङ्घाते जनिमुनिशिवाप्त्याप्तिजनिते।
गृहस्थानामेषोऽमितगुणकरो भावमतिगत
स्तवस्तेनाजस्र विनयसहिते स्तौति गृहभाग् ॥१८॥

प्रत्याख्याय निजात्मशक्तिनियत प्रातस्त्यमादौ यम,
सङ्घमाकृतमर्हतो गृहमितो यात्वा विशेत् सा विधे।
कृत्वा चार्चनमर्हता बहुविधै पुष्पादिभिर्भावत,
प्रत्याख्याय च निर्गता गुरुमुखाच्छ्रुत्वा शृणोतीष्टदम् ॥१९॥

आगत्याऽऽलयमाचरेद्विधिपरा धर्माङ्गिनान मुना,
यद्वा भोजनधारण वितरतीशे साधवे दातरि।
कुर्यात्पौषधपारणेऽपि यदिद पम्फुल्यते दीपवज्,
जैने शासन एष नो ऋणगतो न्याय कदापीप्यते ॥२०॥

धान्येन्धोऽम्बुविशोधने निलयगा सर्वत्र रक्षापरा,
कुर्यात्कार्यमपायपापरहित प्रेत्यावतार हृदा।
अग्रे कृत्य सुकृत्यदुष्कृतिफल नो विस्मरेच्चित्तत,
श्राद्धेयेरा ह्यमाप्नुते सुखकर कीर्ति परत्रामरम् ॥२१॥

तार्थाना विधिवाहदादिमहिमाढ्याना जनु पावनाद्,
यात्रा सत्कृतिसयुता भवतरी कार्याऽऽप्य सत्साधनीम्।
सम्पत्ति सहचारतत्परजन चाथम्य सिद्धौ फल,
ज्ञेय, कष्टभरार्जितोऽघनिचयो दावाऽन्यया दुर्गतिम् ॥२२॥

धर्म म्या प्रभुशासनोन्नतिकर सत्यापितो जन्मना,
दा चैन्निरघ विधाय विधिवच्छील धृत निर्मलम्।

पूर्वोपार्जितपापपङ्क्तिविलयेऽसाधारणं कारणं
तप्तं दुष्करमुद्धृतिकरतपो भावं च भव्या धरेत् ॥२३॥

या श्रद्धाभरसंयुता, जनगणो चां संस्तुते शीलतः,
वंशौ द्वौ विशदीकृतौ सुकृतितः सज्जन्मवत्या यया ।
यस्यै धर्मपरः सदा नतिपरो, यस्या गुणानां व्रजः,
सङ्घे सञ्चरते मतिश्च तरुणा जायेत यस्यां यशः ॥२४॥

नारी यद्यपि निन्दिता श्रुतधरैर्वाक्यप्रबन्धोद्भुरैः,
स्थाने स्थान उपोढसन्मतिभरैः सा नैव जातिद्विषा ।
किन्त्वेतैः पुरुषप्रधानमतगं संश्रित्य वाक्यव्रतं,
स्त्रीराश्रित्य निरूपणे पुरुषगा सैवाद्दता पौरुषे ॥२५॥

स्याद्वादो जिनराड्मतेऽप्रतिहते दोषैर्गुणैः संश्रिते,
सोऽनेकान्तनिरूपणेन सफलः सर्वामपेक्षां दधत् ।
नास्त्यत्राश्रयता स्त्रियामघतत्तेः सम्पत्तु सम्पद्गते-
र्हीनो दोषगणेन ऋद्धिवरको नैवेति नो मन्यते ॥२६॥

साधून् यथोद्दिश्य जिनेन्द्रमार्गे, दोषाः श्रमण्याः प्रतिपादिता बुधैः,
त एव साध्वीव्रजसङ्ग्रहे स्युः, निर्ग्रन्थवर्यानपि संश्रिता हि ॥२७॥
कामः स्त्रिया यद्गुणितश्चतुर्भि-र्नरात्तदेतत्पृथगस्त्यपेक्षया ।
ज्योतिस्तृणानां झटिति प्रजायते, निर्वाति चेत्थं न च फुम्फुमेषु
(क्षारीषेषु) ॥२८॥

स्फुलिङ्गसंयोजनतस्तृणानि, ज्वलन्ति घट्टादियुताग्नितोऽपरः ।
शाम्येच्च तार्णो द्रुतमेव नान्य, इति प्रबोधात् स्मरकारणं त्यजेत् ॥२९॥

साधुनचाना न चतुर्थयामो-ऽपवादभूर्यत्करण न तस्य ।
रागद्विषौ चेत्स नरात्मनस्त-न्नचाङ्गनाना स गतापवाद ॥३०॥

इत्यस्ति शास्त्रे मिथुने श्रमण्या, द्रव्ये, न भावे भवनस्य सम्भव ।
हठप्रकारस्य यदस्ति तस्या, सुसम्भवो नैव तथा सुपुस्सु ॥३१॥

अत प्रयत्नात स्वयमादरेण, वृद्धादियत्नेन सुरक्षितत्वम् ।
शील स्वयशस्य वर हि जीवित, मत्वेति शील परिरक्षणीयम् ॥३२॥

अत कवीशै सुकलनाशो, यथा सम घोषितमेति सत्यताम् ।
नाशो गृहस्येतरजन्मनाशो, घुष्ट तथा नो कविना जनेन ॥३३॥

यथा हि शस्यस्य धरानुसक्ति-स्तथा न कव्यन्दसमीरणानाम् ।
अनुश्रितिस्तद्वदिहाङ्गनाना, सत्कारवृत्ति सकले स्वयशे ॥३४॥

शरीरतत्त्व रुधिरानुसर्त-रक्त च नार्यागतमेव मूलात् ।
मातृप्रसूते तनुतत्त्ववेत्ता, परीक्षते ह्यस्त्रमिन्न विवादे ॥३५॥

यस्मान्माता प्रसूते शिशुमनघपद तेन सा गीतिमाप्ता,
सत्पुत्रादीन् 'जगत्या प्रचुरगुणगणे गार्गिमातेति काव्ये ।
शास्त्रे रत्नप्रदीपप्रवितरणकरा रत्नकुक्षिर्नमस्या-
ऽऽराध्या सा सर्वलोके त्रिभुवनपतिभिरानिरम्नेति सोक्ता ॥३६॥

ख्यातो जिनेन्द्राऽऽगम एष शब्द , स्त्रिया च यद्वत्पुरुषेऽपि तद्वत् ।
जिनेन्द्रवाक्यादिषु सुष्ठु दवा-दनुप्रियेति प्रयुतो न भिन्न ॥३७॥

सङ्घेऽपि सम्बोधनमेतदेव, श्राद्धी तथा श्राद्धगणो मियस्तु ।
हेशब्दपूर्वं हि पद तेन नार्या न तस्मात क्वचिदप्यधस्त्वम् ॥३८॥

सर्वाङ्गिकीं कोऽपि करोति भव्यः , समस्तसङ्घे परमादरेण ।
सर्वत्र कुर्वन् प्रथमं द्विधा स्त्रियां, विशेषहीनं सधवाधवायाम् ॥३९॥

श्राद्धीनां स्याद्धर्मक्षेत्रेऽमलत्वं, कुर्याद्येनोद्वाहकालेऽपि पूजाम् ।
धार्म्यो महिमाऽनून एषोऽपि तादृक्, पापारम्भे साधयेद्धर्ममादौ ॥४०॥

मर्त्यिर्या भवान्ते गतिः साऽपरत्रा, वाण्यत्र प्रेत्यास्ति समानलेश्या ।
च्यवे भवे चेति विबुध्य सर्वा–नार्त्तान् सुनिर्मापयितुं यतेत ॥४१॥

आराधनां निर्मलभावपूर्णा, चतुःशरण्या शुभपापकर्मणोः ।
प्रशंसया निन्दनया च भावात् , स्वान्यातुरत्वे हि करोति वर्याम् ॥४२॥

यथा परैः प्रेत्य सुरालयानां, मुक्तेश्च गीतः परिदायकत्वात् ।
महेश्वरः सर्वजनोपकारी, मिथ्येयमाराधनकारिका तथा ॥४३॥

यान्ति प्रशान्ताः प्रसुभक्तिवाणी–प्रणोदिताः स्वर्गपदं शिवं वा ।
तत्कारिका किं नहि कारिका हि दुग्धान्न किं म्रक्षणसर्पिराप्तिः ॥४४॥

कुर्वन्ति वैवाहिकमत्र पुत्र–पौत्र्यादिकस्य निजबान्धवः ।
तथापि तच्चण्डक्षतिनिवृत्त्यै, नीतौ स्थिताः स्वर्गशिवार्गमयोग्याः ॥४५॥

तथाविधानीति पराभवेयुः, सत्कर्म कर्तुं शिवमार्गमेतुम् ।
अतः स्वकीयं कुलवंशयुग्मं, पुरा हि रक्ष्यं सुधियेति गीतम् ॥४६॥

यथाऽऽर्यदेशः सुजनोपकारकृत् , सङ्गं विधायार्हतसाधुचैत्यैः ।
वंशः कुलं वा मतिभाववत्यपि, विधाय तैः सङ्गमिहोपकारी ॥४७॥

दत्ता कुले यत्र स्वसा च पुत्री, धर्माऽपि तत्रत्य उपासनीय ।
तत सदाचारभवान्तराणा, रक्षार्थिनी ता न परत्र दद्यात् ॥४८॥

अत्रत्यवैतत्य उपागते म्या-द्वयर्थैहिकी धर्महतेऽन्यभाविकी ।
आद्याऽल्पकाल परथा परा तु, वित्तक्षेत्रमन्यत्रितये न दद्यात् ॥४९॥

यथानुराग आत्मन प्रस्थान्ततोऽधिकोऽस्या निजपुत्रवग ।
भिन्न तु धर्मऽधमस्य सश्रयो, नीचैस्तरा वृत्तिरबोधमोहिनी ॥५०॥

सिद्धाद्रिप्रमुखप्रशान्तगिरिषु प्राप्ता परा कोटय-
स्तत्स्वप्नेऽपि न याति सम्भवपद येषा न श्रद्धाऽनघा ।
मोक्ष किन्त्विदमात्मवशसहजा सस्कारवार्तामति-
र्येषा ते सुतरा विधाय सुमतिं तीर्थानि तानि स्मरेत् ॥५१॥

आद्या सिद्धा समग्रे भवभ्रमविगमावाप्तमोक्षालये या,
साम्प्रत्या जैनमार्गेऽवतृपितिसुपमदुष्पमाया जिनाम्बा ।

नैवाऽऽसीत्तत्र तीर्थं निजगुणमहिमोल्लासितात्मप्रभावान्,
मत्वैव स्वात्मशुद्ध्यै जिनपतिरचनाच्छ्राविकाणा प्रयत्न ॥५२॥

यर्ग श्राद्धया प्रणम्योऽविचलसुमतिधर्मकार्ये सदोक्तो,
देवानामप्यचाल्यो बहुतरविधिमि सयमादाप्ततत्त्व ।
तत्रास्ति ज्ञातमग्र्य चरमजिनपते नागभार्या प्रवेका,
सम्यक्त्वे देवतुष्टौ जिनवरशिवगे शुद्धसयाऽमदृष्टि ॥५३॥

समग्रो नगर्या जनो भ्रान्तिमाप्त , यदाऽमज्जिनेशस्यागम कर्तुमिष्ट ।
स एवाम्बड प्राप्तजनार्चनादि, न मुग्धा सुसम्यक्त्वधरा न याता ॥५४॥

जम्बूस्वामिन आप्तसुन्दरवराः प्रेयस्य आप्तादरा,
अष्टापि प्रवरां व्यधुः समगतां तत्कृत्यकृत्योद्यताः ।
यातेऽस्मिन् मुनितां स्वयं गतमदाश्चक्रुर्मुनित्वं परं,
जाताः संयतमार्गसाधनपराः श्रीचन्दनायाः पुरः ॥५५॥

श्रीवज्रप्रसवित्रसंयमकथां लोकात्ततश्चागतां,
श्रुत्वा श्रीधनगिर्युदारचरितां वव्रे सुनन्दा वरम् ।
जातं वज्रप्रभुं ददौ लघुतरं पण्मासमात्रं शिशुं,
तां को न स्तविता जिनागमरुचिः श्राद्धीं परं पावनीम् ॥५६॥

श्रीहेमचन्द्रं प्रभुमार्पिपद् या, श्रीदेवचन्द्राय मुनीश्वराय ।
भर्त्तुः सुकृत्यं परमं विदन्ती, श्राद्ध्या अहो वा स्वमतीत आदरः ॥५७॥

श्री वस्तुपालाग्रजतेजपालं, प्राप्तं निधानं खनितुं विचित्तम् ।
दृश्यं जनैश्चौर्यकृतावनर्ह धेयं तथेत्युक्तमलोभपत्न्या ॥५८॥

श्राद्धी सुभद्रा जिनमार्गमोदा, जलेन द्वारत्रितयी पुरस्य ।
सतीत्वभावस्य महाप्रभावं, जनेषु जनयन् पुनरुद्घटित्री ॥५९॥

राज्ञा सुशीलो महिषीप्रदत्ता-भ्याख्यानयुक्तो हननाय युक्तः ।
सुदर्शनो रक्षित आर्यधृत्या, श्राद्ध्या स्वकीयाचलधर्मभावात् ॥६०॥

श्रीरेवती नाम जिनस्य वद्ध्वा; भावी जिनो तीर्थपदानशक्तेः ।
निर्णीय को न स्तविता जिनानु-यायी वशं श्राद्धपथोन्मुखां स्त्रिम् ॥६१॥

शाही अकब्बरमुदारमतिं दयायां,
लीनं न वेत्ति जिनशासनतत्त्ववेदी ।

सर्वाऽप्यसौ समभवत् प्रभुवीरनाम्ना,
मूल तु तस्य तप आर्हतिश्चम्पिकाया ॥६२॥

भवेत् प्रतिष्ठा जिनबिम्बराज्या , प्रभुत्वभाव यदिय विदीपयेत् ।
सर्वोङ्गशुभ्रापि न पूज्यतापद, श्राद्धश्रा युतोऽम्या(न) निधायको
धव ॥६३॥

चैत्ये च यत्रापि जिनाकृतीना, पटे प्रतिष्ठापनमाद्रियेत ।
तत्रापि तासामधिकारभावो, विशेषतश्चात्र विनामनाविधौ ॥६४॥

या सद्धना अत्र निमाननाविधौ, समाद्रियन्ते न च ता अतीयु ।
दु खानि दौर्भाग्यभवानि कान्यपि, यावद्भव शान्तिसुखान्युपेयु ॥६ ॥

यद्यप्यनीशै सत्कारलेश , शरीरशोभावहको न्यपेधि ।
तत्सत्कपौषत्य निषेधनात्त पर, तीर्थानतौ किन्तु स सेवनीय ॥६६॥

यदेव कर्माश्रवणाय घृत्य, ससारहेतोरघनिर्जराय ।
तदेव धर्मानतिकार्यहेतो-यदाश्रवास्ते हि परिश्रवा यत् ॥६७॥

जिनाधिपाना रुचिराणि यानि, दिनानि कल्याणवराङ्कितानि ।
ग्रामानामारि-रथोत्सवैश्च, श्राद्धीजन शोभयतेऽङ्गचीरै ॥६८॥

कल्याणकेषु प्रवरा न पूजा, श्राद्धीजनो वाऽपर आहत मन् ।
जिनेश्वराणामधिधाय घत्ते-ऽन्येषु कुर्वन भवत्युदार ॥६९॥

चत्वार उक्ता श्रमणप्रधाने, सङ्घे विभागा परमप्रगामी ।
चार्थेषु धर्मप्रवरेषु वग , श्राद्धश्रो यतो भूरितमा सुयन्ना ॥७०॥

गृहेषु धर्मीय उदारभाव , प्रवर्तते तत्कृत एव भूरि ।
समानि कार्याणि तदुत्थमत्या, धर्म हि जैनेश्वर आदरेण ॥७१॥

श्राद्धयश्च देव्यश्च न विभुत्ववत्य–स्तथापि साम्येन नयन्ति सर्वान् ।
श्राद्धॉश्च देवॉश्च जिनोक्तधर्मे, स्वयं दृढाः कुर्वते धर्मरक्तान् ॥७२॥

यथा परेषामधिकारिता नहि, गृहे च धर्मे व्रतमुख्यकेऽपि ।
तथा न जैनेष्विति सर्वधर्मेऽत्यासां समो ह्येवमतोऽधिकारः ॥७३॥

नासां धर्मो वंशजात्यादिरुद्धो, यद्धर्मोऽत्राराधनीयः स्वभावात् ।
आत्मार्थं तद्धारयन्त्या नितान्तं, गीता तीर्थ्यैर्निन्दयित्वा न्वनर्ह्या ॥७४॥

जैनः स स्यान्मातृवर्गेण तुल्याः, सर्वाः श्राद्धीर्मानयित्वा महेद्यः ।
मोक्षार्हायाः समक्षेत्र्या विभेदं, चित्ते नैव सन्दधीताचलेक्षः ॥७५॥

इति त्रिंशोऽध्यायः ।

। एकत्रिंशोऽध्यायः । (देवाधिकारः)

जैनः स एवार्हतधर्मधारी, यको भवान्धोरवनोऽर्हताऽभूत् ।
नास्त्यन्यधर्मग्रवणो जनेऽस्मिन्, पुनातु देवो भविनो जिनोऽर्हन् ॥१॥

कालादनादेर्निजभव्यतायाः स्वरूपमन्यासदृशं दधानः ।
यथाऽऽम्रवृक्षः स्वकजातिवीजात्, पुनातु० ॥२॥

भवस्थरूपे भववालकाले, जहौ न तादृग्वरभावसत्ताम् ।
मलीमसं स्वर्णमयो विभिन्नं, पुनातु० ॥३॥

तथा तथा कालविवर्तसङ्ख्या–तीतं भवाब्धौ परिवर्त्तमानः ।
तुल्यं परैः कालभवानतुल्यः, पुनातु० ॥४॥

यथा महाम्बुतलाद्वहन्त्या , सुवाहिनीस्रोतसमान्धया ।
चिन्तामणिर्नापलवुन्तुल्य , पुनातु० ॥ ॥

परोपकारप्रवणैकचेता, निबद्धय कश्चिज्जिनकर्म जीव ।
गतोऽन्यजन्मानि वराणि तानि, पुनातु० ॥६॥

नष्टे तु तस्मिन्नपतीर्थपत्ये, भवेज्जनाना प्रवरा गतिर्न ।
क्षान्ता सुधा नैव गुणाय लेशात्, पुनातु० ॥७॥

पर तथाभव्यभव जिनत्व, वर न बद्ध क्षमतीह कश्चित् ।
पयो ददाना सुरभिन चाभा, पुनातु० ॥८॥

जिनेन्द्रनामार्जितमन्यथा वा, निकाच्यतेऽन्त्ये भवने तृतीये ।
अर्हच्छिवाप्तादिपदेषु भक्त्या, पुनातु० ॥९॥

जिनेन्द्रनाम्न्येवमुपार्जितेहि, तिर्यक् पद नेव कदापि गच्छेत् ।
पराथकामी न भवेद्धि तिर्यङ्, पुनातु० ॥१०॥

यथाऽऽगमिप्यन्नृपभोगभाव, रत्न न वार्धेस्तलगाकरे स्यात् ।
नोत्पद्यते भाविजिनोऽसुरादिषु, पुनातु० ॥११॥

स्वप्नप्रलम्भो न मनोऽनुसारी, यस्यागमे कुक्षितले सचिवो ।
पश्यत्यमुष्य चतुरश्चितान् दश, पुनातु० ॥१२॥

हस्त्यादिका नानुगतिर्हरीणा, सप्तस्वपीष्टेषु भवेत् प्रलम्भे ।
गजादिका ह्या गति प्रधाना, पुनातु० ॥१३॥

जन्मक्षणे शक्रशतावलीद्ध, चकार मेरौ नियताभिषेचनम् ।
षड्युक्तपञ्चाशदपि कुमार्य , पुनातु० ॥१४॥

यस्याम्बिकाकुक्षिरपेतपङ्का, जम्बालमुक्ताऽप्रकटोद्भवाङ्का ।
सुरासुरश्रेणिशतेन वन्द्या, पुनातु० ॥१५॥

जन्माभिषेकेऽप्यमराचलेऽगुः ; सुरासुराधीश्वरकोटयो मुदा ।
अष्टप्रकारार्चनमावि(द)धातुं, पुनातु० ॥१६॥

बाल्ये न मातुर्विदधाति पानं, स्तन्ये सुराधीशशतेन नीताम् ।
सुधामपादङ्गुष्ठगां मुदाढ्यः, पुनातु० ॥१७॥

चकार चेष्टां लघुदीर्घनीत्यो–रुरोद बाल्ये न महेश्वरोऽयम् ।
वंशे महेन्द्रैः कृतराज्यवृद्धौ, पुनातु० ॥१८॥

परैर्न येषामवकल्प्यता स्याद्–तिशयॉस्त्रिशतमाश्रिताः समम् ।
चतुर्भिरार्हन्त्यपदोदितास्ते, पुनातु० ॥१९॥

क्षेमाय विश्वस्य विधाय दीक्षां, जित्वोपसर्गांश्च परिषहॉश्च ।
निर्मूल्य घातीन्यखिलानि सर्वविद्, पुनातु० ॥२०॥

प्राग्बद्धतीर्थंकरनामकर्मणो, द्विधोदयोऽर्चाश्रमणादिसिद्धचा ।
द्वितीयमार्हन्त्यपदेन देशना, पुनातु० ॥२१॥

यद्दीक्षितानां भवतीह याव–त्तीर्थं प्रवाहो न नवोऽपरं विना ।
भाग्यात्तु भव्यत्वयुतात् स एव, पुनातु० ॥२२॥

तीर्थं द्विधाऽऽरपराश्रितं दिशन्, कार्येण युक्तं शुचिकारणेन ।
जनाः प्रभूताः क्रमसिद्धिसाधनाः, पुनातु० ॥२३॥

वर्गद्वयेऽपीष्टपथानुसार–स्ततश्च साधून् गृहधारकॉश्च ।
नुनोद धर्मार्थमरक्तदोषः, पुनातु० ॥२४॥

कायस्थिणो नैव महाँल्लघुर्वा, सत्साध्ययुक्तस्त्वनघीरणापन्म् ।
चतुर्विध तन्नमतीह सङ्घ, पुनातु० ॥७५॥

ह्यज्ञानकर्माश्रवरोधयुक्त, मार्गं सदा श्रोतृगण दिदेश ।
तदुक्तितो मान्यपद हि तीर्थं, पुनातु० ॥७६॥

अर्हत्त्वमुख्यजितसंसृतिकान्तभावा-
त्रिदशपरार्घ्याधिकसंयुज आप्तयोग्या ।
तीर्थप्रवर्तनविधौ सतत स्वरूपा-
दहन्पुनातु सतत भविनो भवान्ते ॥७७॥

अर्हत्त्वनाम्न उच्च फलतो जिनत्वे,
पूर्वभवेऽनेकजनिषु प्रविचिन्तितोऽन्त ।
अन्त्ये गुणे हि भवनान्न तनुक्रियाया, अर्हन् पुनातु ॥७८॥

यत्कर्मज फलमिहाचनमर्हत स्यात्,
तद्यावदेव भव इत्यपयोगितायाम् ।
देवैः कृत सम्प्रतिहारमयोगिभाव-महन् पुनातु० ॥७९॥

तीर्थप्रवृत्तौ सकलातिशेषा, अर्हत्त्वमुख्या जिनपात्मसंस्था ।
पूजा (दृक्षा) दिकास्त्वन्त्यक्षण त्वराप्य, पुनातु० ॥८०॥

मुक्तेरवाप्तौ द्वितयी ध्रुव स्या-दुत्सङ्गपर्यंकमयी दशा तु ।
तेन प्रतिच्छन्ददशाढ्यमी तत्, पुनातु० ॥८१॥

जगज्जनि-स्थेम-लयै प्रवक्ष्य, जानन्न तेषु प्रभुता दधाति ।
मोक्षाध्वदीप्ते प्रभुता दधान , पुनातु ॥८२॥

न स्त्री न चास्त्रं न च वाहनानि, न स्वर्गदानादिवृथाप्रचाराः ।
कल्याणकृत् किन्तु शिवाध्वसिद्धिः , पुनातु० ॥३३॥

गतो न गन्ता न च गच्छतीशः , परां गतिं सिद्धिविनाकृतां यः ।
भवाटनाद्दूरगतो नितान्तं, पुनातु० ॥३४॥

न कर्म तृष्णा न च रागकोपौ, नाज्ञानलेशः परमात्मताभृत् ।
न तीर्थनाशाऽवनवद्धलक्षः , (अर्हन्) पुनातु० ॥३५॥

जैनः स एवात्यटनं भवाब्धौ, न वाञ्छति प्रेप्सति सिद्धिमार्गम् ।
जन्मान्तकेभ्यो भयभृच्छिवेप्सुः , पुनातु० ॥३६॥

इति एकत्रिंशोऽध्यायः ।

। द्वात्रिंशोऽध्यायः । (साध्वधिकारः)

जैनः स एव मनुते मुनिराजपादान् ,
संसारसागरतटप्लवने सुपोतान् ।
दारैर्धनैश्च रहितान् धृतधर्मयोगान् ,
सेव्याः सदाऽऽदरभरेण सुसाधुवर्याः ॥१॥

ज्ञात्वा जिनेशवचनाद्यदि वा मुनीशात् ,
(गुरूक्तेः) स्मृत्वा च पूर्वजनुषं भवभावभीरुः ।
षट्कायहिंसनभवान् प्रचुराघहेतून् (शिवमार्गलीनाः) सेव्याः० ॥२॥

बुद्ध्या भवोदधिगता विविधा व्यथास्ता,
जन्मान्तकाऽऽधिविविधामयजालजाता ।
ज्ञात्वा तदन्तकरणं मुनिमार्गमेक, सेव्या० ॥३॥

पातो यथा परतट नयतीद्धभाण्ड,
निर्यामकेण मतिसाधनसयुतेन ।
धर्मं वरा भविजनोद्धरणैकलभ्या , सेव्या० ॥४॥

लोक प्रदीप्तमखिल जननानलेन,
मृत्युाम्जो यममयाश्च विबुध्य मया ।
शान्त्यै जिनेशगदित वरधर्ममाद्दु , सेव्या० ॥५॥

मातापिता सूनुरपारमोहा, अथ समस्त घृजिनौघलातम् ।
गृह्नन्ति न प्रेय फल विदन्तो, सेव्या० ॥६॥

सर्वे जना ऐहिकसौख्यदु ख-समागमाना प्रचयात् प्रभीता ।
नातीतभाविभ्य इमे तु तेभ्य , सेव्या० ॥७॥

अर्था सता जनकुलागतनीतिरीत्या,
रक्ष्या मनन्ति गृहिणो न च जानते ते ।
दौर्गत्यपातिन इमे मुनिभिर्निसृष्टा , सेव्या० ॥८॥

सर्वार्थसाधनमिद वपुरक्षय नो,
यत्त्वेति नाद्दा बहुकारणाश्रितम् ।
त्यक्त्वा सुभयमकृते परिरभ्यन्ति, सेव्या० ॥९॥

मत्वाह तत् प्रथमतो महिमानमुग्र,
धर्मस्य मागफलयुग्ममिहानगार ।
सामान्यत' परिचरे(द्) भ्रमरोपमान , सेव्या० ॥१०॥

नाज्ञानिवन्मधुकरैः समताऽत्र वृत्ते,
श्रामण्यमुक्तिसहिता सुगुणावलीष्टा ।
बोधेन युक्त उदयेप्सुरतो मुनीशः, सेव्याः० ॥११॥

प्राणाः परैः स्वे परिरक्षणीया, मता न तत्रास्ति दयाप्रचारः ।
प्राणैः स्वकीयैरपि जीवरक्षाः, सेव्याः० ॥१२॥

सत्यं परेषां परमं हि तत्त्वं, दयाङ्गिनां जैनमते तु तत्त्वम् ।
स्वजीवनाशः परहानिमुक्त्यै (गुरुः), सेव्याः० ॥१३॥

सत्यं व्यलीकमुदितं ललनादिहेतौ,
रागो द्विषा चात्र परावबीजम् ।
त्यजेदलीकं भवभृत्सुरक्षं, सेव्याः० ॥१४॥

विप्रा यथोत्पादमलीकमुक्त्वा, नादत्तमत्र ग्रहणे मनन्ति ।
इमे पराक्ये तृणमात्र आज्ञां, सेव्याः० ॥१५॥

परे नियोगं विधिमार्गमाहु–रिमे त्रिधाऽब्रह्म परित्यजन्ति ।
तैरश्च–मानुष्य–सुराङ्गजातं, सेव्याः० ॥१६॥

स्वीयं ग्रहं पापमयं परेऽगु–रिमे कृतं कारितमाहृतं पुनः ।
स्वत्वेन वर्ज्यं न परिग्रहत्वं (स्तुत्याः), सेव्याः० ॥१७॥

महाव्रतानां परिपूर्णतायै, स्वाध्यायशान्त्योः परिरक्षणाय ।
त्यजन्ति दोषाकरमन्धभोगं, स्तुत्याः० ॥१८॥

उरीकृतानामवनं सुदुष्करं, क्षणे क्षणेऽन्ये यत आत्मभावाः ।
मत्वेति निस्सङ्गतया व्यहार्षुः, स्तुत्याः० ॥१९॥

सदने पूज्या श्रमणा समस्तै–र्धर्मप्रचारो मुनिसङ्गमोत्थ ।
नृपोऽत आन्ध्रादिषु सयतानऽमुक्, स्तुत्या० ॥२०॥

तावद्धि तीर्थ जिनराजगीत, वतत यावन्मुनिराजसङ्गम ।
अतो मयूरोपमिता गृहस्था , स्तुत्या० ॥२१॥

धर्मो मुनिभ्य प्रददे जिनेशै , परप्रदानाय सभासमक्षम् ।
तीर्थ धरन्तो मुनयोऽदुरेन, स्तुत्या० ॥२२॥

न किञ्चनासीह मुनीश्वराणा, विहाय दृष्ट्यादिगुणान् जगत्याम् ।
दुरस्य मूल पर इत्यमौज्झन्, स्तुत्या० ॥२३॥

योग्येषु देशेषु परिभ्रमन्त , श्राद्धोपदेशेन नवानि कुर्यु ।
चैत्यानि जीर्णानि समुद्धरेयु , सेव्या० ॥२४॥

तीर्थानि पूर्वर्षिमहाप्रभाव–विद्योतकान्याप्तमहत्त्ववन्ति ।
प्रभावयन्तश्च समुद्धरन्त , सेव्या० ॥२५॥

क्वचिद्गुहाया विजने वनान्तरे, सान्वग्रभागे सरितस्तटे वा ।
निराकुले पण्डितवीर्यमन्त , सेव्या० ॥२६॥

उत्सर्गमादृत्य समस्वभावा , मित्रे रिपौ जीवन आत्मनोऽन्ते ।
मृतिर्हि येषा क्षणकालभूता, सेव्या० ॥२७॥

गुरूपदेशाद् भवितव्यताया , प्रभावत स्वीयसमुद्यमाच्च ।
क्वचेऽपि मार्गे शिवगा भविष्या, सेव्या० ॥२८॥

आत्मानमात्मप्रतिबद्धरूपं, जानन्त आत्मव्यतिरिक्तमिन्नाः ।
कापायिकं स्थानमपाहरन्तः, सेव्याः० ॥२९॥

ये नित्यरूपं प्रवरं विदन्त–श्चैतन्यसौख्यैकमयं जिनोक्तेः ।
अधिष्ठिताः स्वं निजरूपहेतोः. सेव्याः० ॥३०॥

ये पौद्गले नैव सुखे निमग्ना, न द्वेषिणः पूर्णनिजस्वरूपाः ।
निरुध्य योगान् विगताघबन्धाः, सेव्याः० ॥३१॥

परे हि तीर्थ्याः निजसेवकान् सदा, तैरश्चभावप्रभवं निदर्श्य ।
दुःखं विपण्णा भवभावमेते, सेव्याः० ॥३२॥

पूजा परीवारकृते न दीक्षां, सम्यक्त्वचारित्रविदादिरूपाम् ।
चक्रुर्भुजिष्ये भवमन्थनाय, सेव्याः० ॥३३॥

मुक्त्यर्थमात्ता य इमे परेभ्य–स्त्यजन्ति तानंशुकवासमादीन् ।
विमुच्य बोधादिमयं तु जीवं, सेव्याः० ॥३४॥

न वाहनं प्राप्तपुरस्य काम्यं, नौर्वा समुद्रस्य तटं गतानाम् ।
मत्वेति हात्वाऽपरमात्मलीनाः, सेव्याः० ॥३५॥

जैनः स एवाखिलतत्त्ववेत्ता, मार्ग मुनीनां दृढभक्तिभावः ।
सदा धरॅस्तेषु गतः शरण्यं, सेव्याः० ॥३६॥

इति द्वात्रिंशोऽध्यायः ।

। त्रयस्त्रिंशोऽध्याय । (धर्माधिकार)

जैन स एव मनुते जगदेकसार, हेतुस्वरूपसुविशुद्धमुदारूपम् ।
सार्वज्ञ्यलाञ्छितजिनैरदित सुधम,
धर्मा जिनोदिततया भविना शरण्य ॥१॥

सवपु धर्म उन्ति परमार्थसारो,
दौर्गत्यवारणसह सुगते प्रदाता ।
तीर्थ्यैं समैस्तत इय प्रतितन्त्रसिद्धि- धर्मा० ॥२॥

सामान्यमेकमिह नैव विलोक्यते ह्रो-
स्तस्य स्वरूपममलाशयशुद्धिसिद्धम् ।
उक्त्वापि मङ्गलतया जगुरस्य सङ्ख्या, धर्मो० ॥३॥

शब्देन नैव न च तन्मनसाऽस्य जन्म,
किन्त्वस्य भेदधरणात् त्रय एव भेदा ।
तच्छून्यतामुपगते न हि धर्मतत्त्व, धर्मा० ॥४॥

स्वप्राणनाशसमयेऽपि न पर विहिंस्याद्,
यत्नश्च सवभविनामवनाय नित्यम् ।
प्राग्बद्धदुष्टदुरितोपशान्ति , धर्मो० ॥५॥

देवा प्रमाणमिति धर्मधरानमन्ति,
तेऽतोऽभ्युपेयममल श्रुतवाङ्मणीतम् ।
मिथ्यात्वसङ्कतिमियेदमसाध्यमुक्त, धर्मा० ॥६॥

शेष समग्रमुदित द्रुमपत्रनीय, सिद्ध ततोऽधिकरण त्रितयप्रसिद्धये ।
धर्मस्य धृत्तगनगारपदोपशोभ, धर्मो० ॥७॥

निर्दोषधर्ममपवाधपदोदयाय,
प्रोच्याऽसमर्थजनतापरिसाधनाय ।
तस्यैत्यगारसहिताय लघुव्रतानि, धर्मो० ॥८॥

शक्तेतराप्तिविधया महतां प्रयत्नः,
सर्वेभ्य उद्यततमा हितकार्यदक्षाः,
लब्ध्यो गुणाय मुनिताऽभ्यसनाय कृत्या, धर्मो० ॥९॥

'मुख्या निवृत्तिरुदिता यतिधर्मसार्थैं,
दानादिवृत्तिसहिता गृहिणां तु धर्मे ।
गृद्ध्युग्रकामरसनार्त्तनिवर्त्तनाय, धर्मो० ॥१०॥

यत्राऽस्ति दानमुदितं ममताविमुक्त्यै,
स्वायत्ततेन्द्रियगणस्य हता सुशीलात् ।
(भवे भवे धर्मपरं कुटुम्बं, धर्मो०)
क्षान्त्यै तपोऽधगमनाय शुभस्तु भावो, धर्मो० ॥११॥

अर्थार्जितिर्नसुदृशां किल धर्मवृद्ध्यै, लब्धस्य तस्य सुकृतावुपयोग उक्तः ।
मोक्षस्य वर्त्म परसङ्गतिनिःस्पृहत्वं, धर्मो० ॥१२॥

संसारवासजनितः प्रमदप्रकर्षो,
नो तादृशो भवति यादृश आत्मकार्ये ।
तस्यैव लब्धिरुदयाय भवाङ्गिनां स्याद्, धर्मो० ॥१३॥

जन्मानि जन्मजलधौ भविनामनन्ता-
नावर्त्तकान् प्रकटितान्यघभारभाञ्जि ।
दानादिधर्मसमलङ्कृतमेकमेतद् धर्मो० ॥१४॥

इष्टस्य सिद्धिरधिकंमतिसाधनाद्यै-
नान्यान्तरेण विदुषामपि तान् कदाचित् ।
धर्मस्य सिद्धिरमला भवितव्यताया, धर्मा० ॥१५॥

पुण्यादिभि प्रभवमेति नरत्वमुख्य,
कालस्तु मुख्यपदमन्त्यविवर्तभावे ।
यीयँ ह्यपूनमुपयाति शुभायतिर्नो, धर्मा० ॥१६॥

कर्माणि यानि विविधानि गतादिकालात्,
तेषा शमेन नियम शुभधर्मलाभे ।
जीवस्तनोति शममेतुमुदारवीय, धर्मा० ॥१७॥

जीव क्रमेण शिवमार्गविधानसिद्धौ,
यत्न तनोति दुरितानि तथाऽपयान्ति ।
हेतुर्हि कर्मविलयोऽङ्गिविकाशसाध्यो, धर्मो० ॥१८॥

पातोऽपि सम्भवि पद न तथापि यत्नो
जीवेन सृष्ट उपयाति न निष्फलत्वम् ।
अन्तो भवस्य नियत शुभधर्मभाजा, धर्मो० ॥१९॥

पञ्चेन्द्रियत्व-नरजातिमुखा समग्रा,
लब्ध्वा सुसाधनतति नर गति मोक्षम् ।
साध्य तु बोध-दृशि-सच्चरणाग्रिमत्व, धर्मो० ॥२०॥

सम्यक्त्वमाप्यत इहाङ्गिदृतात् सुयत्ना-
च्छास्त्र व्रत च भवितव्यतया न किञ्चित् ।
कर्मादयो निगदिता सफला जिनेन, धर्म० ॥२१॥

भाव्यं यदेव जगति प्रथनं हि तस्य,
नाकारणं भवति कार्यमनादिकालात् ।
यत्ने कृते सतिमतेतरथाऽपि कार्य, धर्मो० ॥२२॥

ज्ञानानि यद्यपि मतानि बुधैस्तु पञ्च,
मोक्षैकसाधनमलं श्रुतमेकमेव ।
तत् प्राप्यते तु मतिमज्जनसक्तिभावात्, धर्मो० ॥२३॥

लब्धेऽपि लोककलनैकगुणे प्रबोधे,
निःशेषकर्मविगमो न विनैव (विहाय) यत्नम् ।
श्रेणेरदृष्टनिचयेऽपगतेऽपि जीवाद्, धर्मो० ॥२४॥

न प्रेम भक्तिरुपवास उदारभावः,
शुद्धा न मोक्षविधये विहिताः कुपात्रे ।
निर्दोषधर्ममधिगत्य समे फलाढ्या, धर्मो० ॥२५॥

धर्माज्जिनेशगुरवोऽपि च धर्मवृत्तिं,
कुर्वन्ति सन्ततमिमे दुरितालिनाशात् ।
धर्मोज्झिते नहि जिनत्वगुरुत्वभावो. धर्मो० ॥२६॥

दीपाद्भवेन्मणिगणस्य यथार्थबोधो,
नैनं विनान्धतमसेऽर्घमतिस्तदीया ।
धर्मस्य बोध उदयेद्गुरुदेवभावाद्, धर्मो० ॥२७॥

अङ्गी यदा चरममागत आत्मभावा-
दावर्त्तमात्मनिचितं विदधाति धर्मम् ।
भावीद्धभावसहितः प्रवरोदयाङ्गं, धर्मो० ॥२८॥

अज्ञानतयपि भवेच्छुभमार्गवृत्ति-
नैवामिरोचति जनो गुणलाभयोग्य ।
दुष्टत्वमेति सुनये प्रगत सुमार्ग, धर्मा० ॥२९॥

धर्माप्तियोग्य उदय यिमना प्रयाति,
मार्गं प्रकाशितमपेतभवप्रपञ्चै ।
तत्रैव यत्नपरंगुरुमि प्रतिष्ठ, धर्मो० ॥३०॥

हिंसाग्निनो घृतिनसार्थसुपैति सत्त्वो,
मुच्येत कर्मनिचयात् सुदृनाग्निलीन ।
एतद्वय न विहित नरत्वतात, धर्मा० ॥३१॥

यत्रा जिनेश उदितेतरकर्मपङ्क्ते-
र्धर्माध्वयाहकनर समुपैति मोक्षम् ।
धर्मं त्वय स्थित इति प्रद आत्मसिद्धे- धर्मो० ॥३२॥

तार्यं समुद्र त्पयात उत्तरयाने,
नतावताऽल्पगुणतोदधितारकस्य ।
तिर्यंगकस्य धृतिनोऽमित एव लाभ, धर्मा० ॥३३॥

य मन्त्रितोऽधिदैव प्रगत सुधर्मा,
सेवेति धर्मोपदोषचये प्रदिष्ट् ।
मिथ्या तमेव विदधाति चयप्रवा सा (आले) धर्मा० ॥३४॥

गाढाग्रहा मयिन आगमलोपधर्मा,
पुण्यस्य योगनधृते प्रभवाऽपि धर्मा ।
पुण्योत्तमधिदैवो हि सदागमार्हं, धर्मा० ॥३५॥

जैनः स एव मनुते जिनराजगीतं,
प्रोक्तं सभासु गणभृन्नियसेन धर्मम् ।
यावत् प्रभावममलं भविभिर्धृतो–हि, धर्मो० ॥३६॥

इति त्रयस्त्रिंशोऽध्यायः ।

। चतुस्त्रिंशोऽध्यायः । (ज्ञानाधिकारः)

जैनो यो मनुते सदा सहगतं सज्ज्ञानमात्मश्रितं,
ज्ञानानन्दमयो यतो जिनमते जीवः समस्तो मतः ।
यावद्येन विनाशितं भवति तत्तस्यावृतेः कारकं,
सज्ज्ञानं श्रियतां सदा भविजन ! स्वार्थप्रबोधोद्यतम् ॥१॥

सूक्ष्मोऽसौ भवचक्रमध्यमुदयन् ज्ञानस्य लेशं दधद्
भ्रान्तोऽनादित आवृती अतितरां सर्वत्र चैकेन्द्रियः । (?)
यत्कालं व्यवहारवर्जिततनुस्तावच्छरीराल्लघुः, सज्ज्ञानं० ॥२॥

आयातः पृथिवीमिदां तनुतरां प्रत्येककायं धरँ–
श्चैतन्यं व्यवहारितामनुगतः प्राप्नोति सञ्ज्ञां पृथग् ।
प्राक्कालादमितां जघन्यपदिकां वृद्धिं समेतोऽसुमान्, सज्ज्ञानं० ॥३॥

एवं वृद्धियुतो मतावतितरां वार्वायुतेजोयुते,
प्रत्येके च वनस्पतावनियमाद्वृद्धीतरे धारयन् ।
स्पर्शांशेन पदार्थरूपमननादेकेन्द्रियत्वान्वितः, सज्ज्ञानं० ॥४॥

एव य क्रमभाजन भवगणात्कायद्यजाद्धा भवन्,
ह्यानम्यागणितेन भागमुपयन् ह्यायँश्च भाव्याश्रयात्।
सम्भ्रान्त स्वकजातित क्रमधर ज्ञानस्य प्रघ्न्यादिपु; सज्ज्ञान० ॥५॥

पुण्येनापमितेन पुष्टिपत्वों यावद्भवी सम्पतेत,
तावत्सङ्घटतेऽस्य वृद्धिसहित जिह्वेन्द्रियेणादिमम्।
एव वृद्धिरपेक्ष्यतेऽक्षनिसृता रास्तेरसूना गणे, सज्ज्ञान० ॥६॥

यावन्नश्यति हन्यमाननुप प्राणापरोपोद्भवा,
सा तावत्प्रमित वधोद्यतनर पाप समुद्धावति।
नैवान्नास्ति विशिष्टता भवभृतेष्वन्येषु जीवेष्वपि, सज्ज्ञान० ॥७॥

साधुभ्यो गुरुमिश्च शोधिकृतये जीवस्य दु'खार्पणे,
तत्तद्भेदमनुश्रितैलघुबृहत्पापोच्छ्रयोच्छेदकम्।
प्रायश्चित्तमनेकधात्मममनै सामर्थ्यमाजाश्रित, सज्ज्ञान० ॥८॥

द्विज्ञाद्यशसमन्विते भवभृति स्युर्गोचरास्तच्चिंता',
स्वादाद्या रवणान्तका निजनिजाऽदृष्टोद्भसात प्राणिनि।
तस्माज्जीवशरीरगा निगदिता चिह्ना मुनीना कृति, सज्ज्ञान० ॥९॥

पञ्चाक्षत्वमधिश्रिता असुमृतो नानागतिं सश्रिता,
जाता तत्र विदा परा सुरभवे ह्यानुत्तरे दैवते (निजरे)।
तत्तज्जातिसमुद्भवस्य विलयो ज्ञानस्य दोषावह, सज्ज्ञान० ॥१०॥

मानुष्ये व्यवहारमार्गसुगम सङ्केतसाध्य पर,
लिप्यादेर्जनित 'यदत्वरभव यच्चान्तरा बोधत'।
तत्सर्वं व्यवहारमार्गपतित विज्ञै श्रुत ख्यायते,' सज्ज्ञान० ॥११॥

तत्त्वस्थं श्रुतमीर्यते श्रुतधरैः सर्वज्ञवाक्याश्रयं,
यत्त्यक्त्वा वचनं समस्तविदुषां नान्या प्रमाणान्विपा ।
तद्वाक्यैकनिवेदनं श्रुतिमतां सर्वार्थगं नापरं, सज्ज्ञानं० ॥१२॥

सर्वज्ञं वचनं समेतरगतं शृण्वन्त्यशेषाः सुराः,
तेषां नैव परम्परा न च गणी सूत्रालिकर्ता प्रभुः ।
पारम्पर्यमपीदृशं न च परं सूत्रार्थधाराः क्रमात्, सज्ज्ञानं० ॥१३॥

देवानां न विरागमार्गगमनं योगादिका न क्रिया,
मिथ्यात्वे श्रुतकेवलित्वहतिवत् प्रेत्योद्भवं नो तथा ।
शास्त्रं तेन परम्परा श्रुतगता मानुष्यिकी केवला, सज्ज्ञानं० ॥१४॥

तिर्यञ्चो न यताः परम्परपदे दूरे परात् संयमात्,
श्वभ्रस्थाननिवासिनश्च नरका न श्रौतमाम्नातिनः ।
मानुष्या अनिशम्य केवलविदो नाम्नायवित्तास्तके, सज्ज्ञानं० ॥१५॥

न ज्ञानं विरहय्य शासनमिदं श्रौतं समुत्तिष्ठते,
तीर्थस्यापि जने प्रवृत्तिरनघा श्रौतप्रबोधोद्भवा ।
श्रौतं चेन्न प्रवर्तते न भवति तज्जैनं परं शासनं, सज्ज्ञानं० ॥१६॥

निःशेषाण्यपि पञ्चधा प्रतिपदं ज्ञानानि गीतानि यत्,
तान्याराध्यपदानि दर्शनमुखान्यात्रिपदीवोद्भवौ ।
तीर्थेशानि पदानि पञ्च सुधियामर्च्यानि तेभ्यो ननु, सज्ज्ञानं० ॥१७॥

ज्ञानं श्रौतमपोज्झ्य मूकसदृशान्यन्यानि चत्वार्यपि,
ज्ञानानीति यदीर्यते श्रुतधरैस्तत्रानुयोगाहतिः ।
स्वार्थाभासनरूपता नु निखिला भव्याब्जसूर्यप्रभा, सज्ज्ञानं० ॥१८॥

पूज्य विश्वतले विशेषमतिना द्रव्य जिनाप्तास्तत ,
पश्चाप्येत उदारभावविधयाऽऽख्यन्ते परा स्वामिन ।
युक्ता दर्शनमुख्यगुद्धगुणयुग्-गुण्याश्रयाऽऽराधना, सज्ज्ञान० ॥१९॥

ज्ञान यद्यपि मोक्षसाधनतयोद्गीत श्रुतार्थैर्दुरं ,
सामान्येन तथापि न श्रुतमृते मोक्षप्रयाणोचितम् ।
'यत्कर्मागमलोचनाशनिपुण सद्वृत्तस्थितौ साधन, सज्ज्ञान० ॥२०॥

कैवल्य विमल चरित्रममल सुर्योन्मुक्त प्रवर,
बुद्धियद्यपि साधने सहचरी साध्या पर सा श्रुते सज्ज्ञान० ॥२१॥

यावत्तीर्थकरो वदेत् परिषदि प्राग्भारमर्थाश्रित,
ज्ञात्वा निर्मल-केवलेन यतिना पावच्छ्रुत तत्त्वत ।
यज्ज्ञात न निवेदित परिषदे तत्केवल केवल, सज्ज्ञान० ॥२२॥

मया यान् विविधान् मनोगतसमान्वेत्तीह योद्धा नरो,
नंतान् वस्तुमल वतो न गदित स्वं भवि केवला ।
मया यच्छ्रुतमुच्यते मतिधनैस्तत्साधनापेक्षया, सज्ज्ञान० ॥२३॥

संस्कार मतिग तनोति सुतरा यत्सस्कृता स्यान्मति ,
श्रौतेनान्वितमानसा नहि भवन्त्यल्पत्यभाजो मते ।
अज्ञाने तु भवे श्रुते प्रगमत शब्दादयो बुद्धिगा, सज्ज्ञान० ॥२४॥

ज्ञानस्य निर्दिश गमात्मफलयाऽऽदेय च शास्त्राद्या,
श्रुत्याऽधीयत सर्वमात्मपरगा मोक्षान्तामापत्फलम् ।
बोद्ध जिज्ञासमन्तर्गत ज्ञान सग यावेन, सज्ज्ञान० ॥२५॥

येऽर्थाः सन्ति चराचरे जगति ये तद्वाचका निःस्वना,
नैवैते पतिताः कुतोऽपि वियदाद्याद्वक्तृवक्त्रोद्गताः ।
ते सर्वे वरदृष्टिवादमपतन् तत्तद्धरः सर्ववित्, सज्ज्ञानं० ॥२६॥

दृष्टिश्चेन्न हि साम्यता हृदगता नैवार्थबोधोऽमलः,
स्यादित्थं वरदृष्टिवादमनतं सम्यग् दृशां सत्यभाक् ।
अक्षातीतपदार्थबोधनपटुः सम्यग्-दृगाढ्यो ध्रुवं, सज्ज्ञानं० ॥२७॥

ज्ञानार्थे यदि ते मनो भवति चेंदाराधनायोद्धुरं,
नित्यं तद्गुणगाहिनां गुणवतां भक्त्यादि कार्यं कुरु ।
ध्यानं सत्पदजाप उन्नतिकरोऽभ्यासो नवीनश्रुतेः, सज्ज्ञानं० ॥२८॥

ज्ञानं ज्ञानवतां महाव्रतजुषां भक्त्यादिभिः प्राप्यते,
यन्नैपोऽस्ति गुणः परेभ्य उदितो यो दानदेये क्षमः,
पाठाद्या अपि संगता न मतये चेद् नैत आत्मा नयं सज्ज्ञानं० ॥२९॥

यस्यान्तः प्रकटाः समा नयभिदो वाचश्च नो विधृता-
स्त्यक्त्वा सद्विनयं सदा सविनया जीतेन यत्तद्वशाः ।
कायः स्वप्नदशागतोऽपि विनयं नोज्झेत्सुगीतात्मनः, सज्ज्ञानं० ॥३०॥

नाप्तुं योग्यपदान्वितो नरपतिर्धिक्कारदूरीकृतो,
देवानां न करोति साधनयुतां भक्तिं परां यौगिकीम् ।
चेत् तज्ज्ञानपदान्वितेषु गुरुषु त्रिधाश्रितो ज्ञानयुक्, स० ॥३१॥

नास्त्यन्योऽपर एतद्विसदृशः प्राप्तर्धिकः सद्गुणो,
यः सङ्क्रामपदं भजेत् परजने मूलाद्भवेद्वाऽधिकः ।
चेत्तादृग् गुणसद्ग्रहो न रुचिदो गन्ता कथं सोऽव्ययं, स० ॥३२॥

ता देवगतिं सदोदयवतीं नीचा गति नारकी-
मानित्यं जनुमता श्रुतमं रयात त्वध्यात्मकम् ।
त्यक्षागान्तरनुश्रितो यदकृतिं सुस्था च दुःस्था धरेत्, स० ॥३३॥

जीवानामुपकारिणीमय परा कुर्यात क्रिया सज्जन ,
सज्ज्ञानन्वितयाद्धयापि परतो जायेत पुण्य तथा दुष्कृतम् ।
येये द्वे अपि सद्गतावितरयाऽऽयद्यत्र तन्न ते, सज्ज्ञान० ॥३४॥

जीवानामपरापरासु गतिषु प्रोन्मुच्छुभाच्छुभयो ,
प्रोग्यद् यमुग्र कृतादमितग सदा तनुनाऽन्यया ।
सद्धा भावि विनानताऽसुधरण तान्भवेच्चेद्विदा, सज्ज्ञान० ॥३५॥

तुयं मानमगारसद्धमहित क्रिया धरेत्साधुराड,
नित्तेवल्लचिद् द्विधा गृहयतो गिमन्यिते द्वे सरेत् ।
तुयं नो जनिसम्भव गुणगणोद्वद्धैकसाध्य मत, सज्ज्ञान० ॥३६॥

सर्वान् द्रव्यमुमङ्गतान् मतिफल सम्यद्धभावान् समे,
क्षेत्रे कालयुतान् स्थिरास्थिरमया वेत्त्यन्त्यबोधोत्तम ।
नित्यो नाम्य परापृति स्खलति च शुद्धात्मरूप सदा, स० ॥३७॥

जैनोऽमौ परमेष्ठिपद्मरमनारूपूजनायैमयो,
नित्य नौति च सद्गतार् गुणगणान् ज्ञानादिकार् साधयन् ।
ज्ञाण्याराधननत्परो विरमते तेनम्दीय स्मरन्,
सद्वत्पूज्यमुपूजको न विरमे ज्ञानादिगुराधना ॥३८॥

इति चतुस्त्रिंशोऽध्याय ।

। पञ्चत्रिंशोऽध्यायः । (सम्यक्त्वाधिकारः)

जैनोऽसौ मनुते सदा जिनपतेराज्ञां सुखानां खनि-
माज्ञाप्यन्त उदारकर्मनिधनाः स्वर्गाय मोक्षाय च ।
ज्ञात्वाऽनादिभवाटनं भवभृतां तच्छेदनाय स्वयं,
दध्याच्छुद्धतरं चरित्ररमणं दिष्टं जिनेन्द्रैः परम् ॥१॥

उद्युक्तोऽत्र न चेदतीतदुरितो नाप्नोत्यभव्यः शिवं,
तत्पूर्व भवधारिणाघविलये सम्यक्त्वमादीयते ।
तत्र स्तो यतनावतां प्रशमिनां निर्वेदसंवेगकौ, दध्या० ॥२॥

मोक्षः सर्वमतेश्वरैरनुमतस्त्यागेन सर्वास्तिकैः ,
कर्मांशापगमाज्जिने वरमते चारित्रयुक्तेरसौ ।
यन्नारुद्ध उदित्वरेऽघ उपयात्यन्तं पुरा सन्धितं, दध्या० ॥३॥

पापेभ्यो भयमादधन्त उदिताः सर्वे जगत्यास्तिकाः ,
पापानां नहि कारणानि मनसा स्वैः स्वै रूपैर्जानते ।
अज्ञानाश्च दयामुखाः प्रतिपदं प्राणिव्रजान् घ्नन्त्यमी, दध्या० ॥४॥

पापं हेयतमं नृभिः प्रतिदिनं स्वीये सदस्यव्रजे,
व्याख्यान्तो न च तीर्थिकाः परिहृतौ तेषां समर्था यतः ।
जानन्ति न हि ते स्वरूपमथ चाङ्गं साधनाद्यं तथा, दध्या० ॥५॥

जीवानेव वदन्ति नो परमतान्यास्थाय धाष्टर्य परं,
पृथ्व्यादीन् प्रथितान् त्रसेतरविधान् पञ्च स्थिरान् (मौढ्यतः) ।
तन्वादि-प्रविधानदक्षमतिकान् कायान् जगौ षड्मितान् , दध्या० ॥६॥

जन्माप्य तनुयधन्न सहकृत लब्ध्वा ममेऽमी भुवि,
म्याहार च। सनातन भविदधत्यात्मीयजातिश्रितम्।
सत्यप्येवमनात्मतत्त्वविदुरा नोशन्ति पृथ्व्याद्यसून्, दध्या० ॥७॥

आत्मान त्यमुपेत्य मुक्तिपदवी शश्वन्मता नैव च,
भव्यानामवसानिता न च जगत्पूर्ण मत शूकरै।
यन्नास्तित्वमसुव्रजस्य सफले भोग क्रियाया निजे, दध्या० ॥८॥

सत्र प्राणभृत स्वकर्मफलिनो नैवान्यदत्त हृत,
भुञ्जन्ति प्रभुरीश्वरो न च फले धर्ता विनेता भवेत्।
ससारोऽयमनादिको जनिमृतिव्रातो मतो यत्र तद्, दध्या० ॥९॥

चेत् कर्तारमुपैति विश्वजनक दारिद्र्यदौर्गत्यरुक्-
शोकोत्पत्तिभयानि तानि जनतादु ग्यान्युपैतीश्वरात्।
तन्निष्कारणचैरितामुपगतो यत्राश्रितो नेश्वरो, दध्या० ॥१०॥

सत्पा जगतीतले दिनकरो ह्यित्वोपकारेतरौ,
निन्दास्तोत्रममानयन् जनत्रये भास्य प्रभास्ते सदा।
तद्वयन मतो जिनेन्द्र उदितादेयेतरार्थोदिति-दध्या० ॥११॥

दु खाकरिष्यति भवोदधिमज्जनेने-
ष्टो नार्चितो न जगता प्रभुरेप लोकान्।
मीत्येति नैव महनीयपदे मतोऽर्हन्, दध्या० ॥१२॥

स्वर्गापवर्गपदवी-विनयामि तस्य,
स्यान्मे न मे चरणपङ्कजपट्पदाभ।
चेत्स्यात्तथा प्रवितरामि मुदेति नाऽत्र, दध्या० ॥१३॥

आत्माऽनादिभवभ्रमिः स्वकृतसुक् चैतन्यपूर्णो भवेत्,
सम्यग्दर्शनबोधवृत्तसुगुणैश्चेदुद्यमी मोक्षणे, दध्या० ॥१४॥

यः संसारवनाम्बुदावलिसमाद्बन्धात्स्वयं निर्गतो,
लीनः संयमसाधनेऽघनिचयं क्षिप्त्वा धृतः केवलम् ।
श्रीसङ्घाय समादिशन् मुनिगृहिश्रेयः सदाऽत्रार्हते; दध्या० ॥१५॥

संसाराम्बुधिमग्नचित्तचरितोऽर्थः प्राणिनाशाङ्कित-
स्तं हित्वा गुरुयोग्यतामधिगतः सोढोपसर्गान् क्षमी ।
मान्यो यत्र गुरुः सदा शिवपथे पान्थीयति निःस्पृहो, दध्या० ॥१६॥

पूज्या यत्र जिनेशिनः शिवपथोद्देशात्स्वरूपस्थितेः,
सिद्धाः धर्मसमादरा गणिमुखाः सेव्याः सुपात्रस्थितेः ।
सद्दृग्बोधचरित्रशुद्धतपसां सङ्घः सुधर्मास्पदे, दध्या० ॥१७॥

आत्मा ज्ञानमुखामितैर्गुणगणैः सिद्धौ युतः स्फातिभाक्,
तत्तद्रूपविभावनावनमुखो धर्मः स्वरूपे निजे ।
तैलं स्यात्तिलसञ्चये न रजसि तन्नात्र धर्मोऽपरो, दध्या० ॥१८॥

पापालेः परिवारकं मतमिहोत्कृष्टं तथा वर्त्तनं,
दान्त्वाऽक्षादिगणं तपोऽनशनतो वैराग्यदं भावनम् ।
नारम्भो न परिग्रहो न विषया धर्मोच्च देहाश्रितां, दध्या० ॥१९॥

लब्धेऽर्थे क्षयमाश्रितेऽघनिचये न्यायात् पथो लाभत-
स्तं पात्रावलिसङ्गतं हृदि सदा कर्तुं मनो धारणम् ।
श्रेयो यत्र न लोभसञ्चयकरे लाभे न जातूच्यते, दध्या० ॥२०॥

कर्माण्यष्टविधानि बोधसुरसघ्रान्यामिन्य मोक्ष गमी,
भव्यो धर्ममुपेत्य शाश्वतमसु बोधात्स्वय वा गुरो ।
याऽवस्था प्रतिमागता शिवश्रिता यत्राहृता सम्मता, दध्या० ॥२१॥

धर्मो यत्र विरोधवर्जनपरो जीवान्तकारिण्यपि,
सर्वेषा भविना सुखैकमननो दु ख्यद्भिदु खापनुत् ।
रागद्वेषविवर्जितात्मनि गत मत्तत्त्ववेत्तु सदा, दध्या० ॥२२॥

यत्राश्रिता गुरुपदे क्षितिमुख्यकायान्,
जानन्त उत्तमधिया परिरक्षयन्त ।
चैत्याश्रयात्रितजनादिममत्वमुक्त, दध्या० ॥२३॥

यत्रास्ति मान्यमनघार्हतशास्त्रवाक्य,
पूर्वापरार्थविषमा नहि यत्र वाणी ।
सर्वाङ्गिजातहितकृत् परमार्थदेशि,
दध्यान्चरित्ररमण जिनदर्शन स्वाक् ॥२४॥

यत्राऽस्ति कोऽपि जगता न वधादिपात्र,
शास्ता समस्तजनवाऽघविनाशनाय ।
मोक्षाविरुद्धसरणिं प्रति सारयित्वा, दध्या० ॥२५॥

ज्ञान न यत्र विपर्याभ्यसनैकरम्य,
नैवात्मवत्परिणत फलिताथशून्यम् ।
'त्व, दध्या० ॥२६॥

दुःखद्विपो जगति दीनदशामुपेता,
देवाङ्गनादिरसलालिततप्तदेहाः ।
नैवाद्दताःसुमहनीयपदं मुनीशाः, दध्या० ॥२७॥

धर्म विदन् प्रविदधद् विरताघवृन्दो,
धर्म सदा प्रविदिशन् जिनराडुदीर्णम् ।
यत्राद्दतो गुरुजनोऽनघमार्गगामी, दध्या० ॥२८॥

प्राग्धर्मार्जितसत्पदोऽनवपथो रागादिसर्वारिहा,
स्याद्वादामृतवर्षको मुनिगणैरामाव्ययः शाश्वतः ।
अर्च्यः श्रीजिनराट् सदा सुरनरैर्देवो मत· सद्गुणैः, द० ॥२९॥

ये धर्मं परमं श्रिता जिनपदे विम्बानि तेषां सदा,
कुर्वन्त्यादरसंयुतानि विशदास्तत्स्थापनाढ्याः सदः ।
मोक्षाध्वप्रगुणोऽङ्गिवर्ग उदितो यत्रास्ति पुष्टौ धृतो, दध्या० ॥३०॥

ब्राह्म्ये पञ्चनमस्कृतिः क्षण इहाद्ये संस्मृता पूजनं,
पुष्पाद्यैर्जिनराजविम्बविषयं सत्संवरेणाञ्चितम् ।
धर्मस्य श्रवणं न रात्रिरसनं सुप्तिः कृताराधना, दध्या० ॥३१॥

पूज्यो यो न रमां रसेत विषयैर्नास्त्राणि द्वेषावहान्,
नाज्ञानाज्जपमालिकां न च परे लीनो भवोत्तारके ।
पर्यङ्कासनदृग्यतोऽखिलभवान्तेऽसौ गतः स्वां विदं, दध्या० ॥३२॥

पूज्यो यत्र गुरुर्निराश्रवतनुः सत्संयमे यो दृढः,
सोढा स्यादुपसर्गदुःखवितते निर्जित्य तृड्मुख्यगान् ।
सर्वानेव परीषहान्नघचयह्रासैकदृष्टिः सदा, दध्या० ॥३३॥

धर्मो यत्र समस्तसत्त्वततये। मा भीप्रद मिद्धये ,
पण्णा जीवनिकायरक्षणकरो युक्तश्च तस्मिन् सदा ।
आचारैरुपदेशनै फलभरत्तातैस्तदाचारिमि-र्दृष्या० ॥३४॥

सो यत्राचनमापगावलिगत नागागवृक्षाश्रित,
तिर्यग्जातिगत न सस्तृतिगते देवे कचिन्नाश्रितम् ।
कैवल्यान्वितसद्व्रतिव्रजगत तत्साध्यते सदा, दृष्या० ॥३५॥

तिष्ठेद्यत्र जन पुराकृतसुकृद्दुर्नीतिरीतिमहो,
मायस्यायपथानुगोऽघनिचयोऽज्ञासैकबद्धादर ।
एष्टव्य स्निग्धमन्तराधरहित ध्येया जिनो देवता, दृष्या० ॥३६॥

पर्वाण्युत्सवराजयोऽत्र चिंतता दाने व्रते सयुते,
भावेनोज्झितशाम्भवेन तपसि प्राणैकरक्षापरे ।
उद्यन्तु जगता हिताय शमिना शुद्धोपदेशै सदा, दृष्या० ॥३७॥

यत्र स्मत्वा पृथुगुप्ता मुनीना निवासा-
स्रोतियगादिवियुता रहिताश्च चित्रै ।
साम्निध्यतोऽपि न परे श्रितमैथुनागा, दृष्या० ॥३८॥

यत्रोक्तितानि न विवाहमुखान्यलीका-
न्यादीयते तृणमपीह परै अदत्तम् ।
धाय तु ब्रह्म नरभेन्मुनारभाव, दृष्या० ॥३९॥

यत्रास्ति नैव निशिभोजनमशतोऽपि,
बाल्यादपीह फलपञ्चकभक्षणेन ।
जानन्त्रसायनिचयोऽशनमेति जातु, दृष्या० ॥४०॥

चैत्ये यत्र विधीयते स्थितिपदं वामे स्त्रियां दक्षिणे,
पुंसां, नैव परस्परं स्पृशिविधिर्नो वेषवैयत्यतः ।
पुंसां नर्त्तनं नैव (नकं न) देवचरणं शुद्धयै निजात्मस्थिते-र्दध्या० ॥४१॥

मृत्युप्राप्तजनो हि यत्र निजतो न श्राद्धकामी स्वयं,
भोक्ता सञ्चितकर्मणो न विहितं प्राग्यं परैरर्पितम् ।
पार्थक्येन जगन्ति कर्म्म निजकं भोक्तार इत्युच्यते, दध्या० ॥४२॥

यत्र श्राद्धगृहेषु नाङ्गणगता कालाम्बुनाली भवे,
वर्चस्कस्य न कूपिका न च भवेत् स्थास्नुप्रपीडा गुरुः ।
न धर्माय नगादिसिञ्चनकृतिर्नैवानृताशीःप्रथा, दध्या० ॥४३॥

सेवालो नहि यत्र नैव च पयःपूरव्ययोऽनर्थको,
नो पण्ढादिविपोषणाय विहितिर्नो पञ्जरालिर्गृहे ।
न न्यायेन विनिर्गता चितिरपि प्रध्वस्तपुण्या कृति-र्दध्या० ॥४४॥

स्याद्यत्रास्तिकवेश्मसु प्रमितिमान् पानीययत्नो वृथा,
नो हिंसा वनतेजसामतिमिता चेष्टा भवेदङ्गिनाम् ।
त्राणायानुपदं स्थितेतरमिदां भीतिश्च पापाद्धतेः, दध्या० ॥४५॥

यत्राम्भोगलनानि धान्यतृणगोविट्काष्ठमुख्याश्रिता,
रक्षायै त्रसजीवसन्ततिश्चिते यत्नोऽन्वहं वीक्ष्यते ।
स्थाने स्थान उदीक्ष्यते मृदुगुणा सन्मार्जनीनां ततिः, दध्या० ॥४६॥

चुल्हादिग्रसिते तु देशदशके चन्द्रोदयैरङ्किते,
सत्सामायिकपौषधालययुते दानादिधर्मोद्धुरे ।
वासः स्याद् गृहमेधिनां जिनगुरुप्राप्तागमे सद्गृहे, दध्या० ॥४७॥

बाला अप्यनुवासर स्तुतिपदान्युद्घोषयन्ति स्फुट,
प्रस्फूर्जन्मुखपङ्कजाद्रु चिरतान्यर्हद्गुरूणा धृते ।
सर्वाभीप्सवाप्रता सुविनीता सद्वेषसुस्था सदा, दध्या० ॥४८॥

सच्छद्मावलीरत्न चैत्यसुगुरुस्थानेषु सद्भादरा,
दाने पौषधकर्मणि प्रविततौ सामायिकाना धृतौ ।
अर्हच्छासनमानिनाममितमुन्मान सदा धुन्वते, दध्या० ॥४९॥

ग्लानाना प्रतिचारणासु निरता सधे जना निर्भिद,
मत्वा ता प्रतिपातवर्जिततमा सद्धर्मसिद्धयै मुदा ।
यत्रक्ष्यन्त विचारचारुचनिताश्रेणिप्रभाद्योमिता , दध्या० ॥५०॥

यत्रान्ते सकलाद्भिधैरवियुतिर्मैत्री च सर्वासुमि-
र्मार्द प्रष्ठगुणान्वितेषु सतत साद्र च हृद् द्रुसिपु ।
हेयादेयविचिंतेषु सरलोपेक्षा पदार्थेष्वल, दध्या० ॥५१॥

यत्र स्याद्गृहिणा सुतीर्थगमन साधं समैर्धार्मिकै ,
पट्टीणा प्रतिपालनेन सुमहत्सद्धार्मिकोद्वत्सलात् ।
तन्वत् सत प्रतिधाममद्विधियुता पूना सनात्सल्यका, दध्या० ॥५२॥

चैत्ये विम्बनिधौ निदशलिपिषु वाचयमे श्रावके,
प्राप्ताना विनियोजन वितनुते वित्तत्रजाना सुधी ।
यत्रार्तार्पिहितो धृतो मतिमरैर्मुक्त्यथमात्तव्रतो, दध्या० ॥५३॥

य देशान्तरमाश्रिता प्रतिदिन चैत्यार्चनादौ हता ,
श्राद्धान् यत्र प्रवन्दितानि कथया वन्दापयन्त्युन्मना ।
चैत्यानि प्रतिभासमानसुरुचा सम्मीलने तै सता, दध्या० ॥५४॥

न्यायाच्चन्न समर्जनं धनगतं शस्तं प्रयोगः पुनः,
सत्तीर्थेषु जिनेन्द्रविम्बसहितेष्वाम्नायते मुक्तये ।
तस्योद्धारनवीनकार्यविधये ग्रामेऽपि चैत्यादिषु, दृष्या० ॥५५॥

स्याद्वादाम्बुधिसम्भवानि वचनान्यर्घापयन्त्यन्वहं,
रत्नान्युच्चदशंपिषु प्रतिपदं यन्नार्हताः सम्मदात् ।
पर्यायैः परिमीलितानि भुवने द्रव्याणि षट् संश्रिता, दृष्या० ॥५६॥

जैनः स्याद्विमलेन दर्शनपदेनोढः परार्थे दृढ,
आत्मानं भववारिधेः परतटमानेतुमुच्चैर्मनाः ।
जन्माद्यैर्विविधैरशर्मनिधिभिर्जातां व्यथां व्यर्थयन्,
दृष्याच्छ्रेष्ठतमं चरित्ररमणं दृष्टं जिनेन्द्रैः परम् ॥५७॥

इति पञ्चत्रिंशोऽध्यायः ।

। षट्त्रिंशोऽध्यायः । (चारित्राधिकारः)

जैनोऽसौ ननु यो दधाति सदये मोक्षैकसौधारुहे-
ऽलम्भूष्णु प्रबलावृतिव्रजहतौ निष्णं चरित्रं परम् ।
सर्वेऽप्येतदवाप्य कर्मविलयं परमेश्वराश्चक्रिरे,
आत्मारामपदं भजन्तु भविनश्चारित्रमत्युज्वलम् ॥१॥

कायास्ते पृथिवीमुखाः षडपि नो घात्या मनोवाक्तनु-
सम्भूतैः करणादिभिस्त्रिकृतिभिरात्मोपमास्ते मताः ।
यावज्जीवमनाहतं व्रतमिदं यत्राश्रयेन्निर्मम, आत्मा० ॥२॥

क्रोधाद्युद्धतया हसेन भयतो नो यत्र वाक्य मपा,
स्याद्वान्य निखिलाघहेतुतुलित ससार उद्धामकम् ।
सर्वा पापपरिग्रहैकरुचिरा जायेत चेष्टा तत, आत्मा० ॥३॥

नादत्त तृणमात्रमथमपि चादीयेत यत्राच्छता,
दन्ताना ग्रविधातुमाप्तनिकरैरंगदेयधार्यंऽखिले ।
आत्मार्थान्तनिष्ठित मतमिह सेव्य ग्रदत्त शिव, आत्मा० ॥४॥

यावज्जीवमनारत गुरुगुण धार्यं तु ग्रह्मान्वित,
सिद्धाभिनन्दि सदा सुकृतिभिर्यज्जीवितामं ग्रते ।
सर्वासयमसाधन परिहरेत् स्त्रीसङ्गमनोपित , आत्मा० ॥५॥

सर्वस्मिन् जगतीतले निदधीतासङ्कल्पभाव स्वन-
र्निशेपार्थपरिग्रह स्थित इह कर्मोणुभीतो मुनि ।
धर्मायापि धरेद्रजोहरणदृग् नि सङ्ग उक्तोपधिं, आत्मा० ॥६॥

स्वाध्यायान्विधातक धृतगुरुक्षाऽटन शार्वर,
जर्गिध चादानपानरागसहिते स्वाद्ये निशाया त्यजेत् ।
रक्षेदात्मनि यत्र सत्त्वविषया स्फृजत्सुधी सदया, आत्मा० ॥७॥

क्रोध लोभमदान्वित च निकृतिं जह्यात् स्थित मद्विरि,
शौचे सयमसयुते सुतपसि ग्रह्मण्यसङ्गे रत ।
पापद्य वशाधोक्ति धृतयतो धर्मं तु यन्नाश्रयेद्, आत्मा० ॥८॥

पृथ्व्यान्श्रितपद्मक ग्रिरमपूर्णाक्षाश्रित पूणरय,
जीवानां गतचेतनांश्च यतते प्रेक्षा समुत्प्रेक्षिकाम् ।
त्याग चापहर्तिं समीक्ष्य तनुयात्रचित्ते सदाऽनोद्यमान्, आ० ॥९॥

सूरौ वाचक सत्तपोऽसहशिशुव्राते कुले सद्गणे,
सङ्घे साधुमनोज्ञयोरुरु सदाऽऽधीयेत वैयावृतिम् ।
यत्नत्यैः प्रतिपातवर्जिततनुं स्वात्मश्रियः कामुकैः, आत्मा० ॥१०॥

योषाणां निलये न वासमुचितां वार्तां करोतीह यः,
सेवेतासनमिन्द्रियाणि दमयेत् कुड्यान्तरो न भवेत् ।
क्रीडां न स्मरतीद्धमुज्झति रसं शोभां न काये सृजेत, ॥११॥

यावज्जीवमविश्रमं दधदिह ज्ञानादिरत्नत्रयं,
द्वौ भेदौ तपसः स्वषट्कसहितौ क्रोधादिवृन्दोज्झनम् ।
सत्यत्याढ्यमिदं हि चारुचरणं यत्नाप्यते सर्वत, आत्मा० ॥१२॥

आहारे वसतौ पतद्ग्रहधृतौ वस्त्रे च शुद्ध्यर्थिता-
मीर्याद्याः समितीश्च पञ्च दशयुक् ते भावने द्वे कृतौ ।
भिक्षूणां प्रतिमाः सदेन्द्रियजयं वस्त्राद्यवेक्षां गुपीः, आत्मा० ॥१३॥

आबाल्यादपि दीक्षणं भवभिदे कर्मानलाम्बूपमं,
यावद्दीक्षणकार्ययोग्यमसमं सामर्थ्यमिष्टं तनौ ।
वर्णानां न भिदा न चाश्रमक्रमोऽन्येष्टोऽत्रधर्मेशिवे, आत्मा० ॥१४॥

नैवाऽत्र क्षितिकर्षणं पशुगणो नैवात्र पाल्यो मतो,
व्यापारोऽपि समग्रपापनिलयस्त्याज्यो मतः सर्वथा ।
आरम्भात् सपरिग्रहाद्विरमणं त्रैधं त्रिधाऽत्रार्हते, आत्मा० ॥१५॥

यावत्स्थाम शरीरजं मतिमुखान् शक्तो गुणानेधितुं,
निःसङ्गोऽत्र भुवस्तले नवविधं कल्पं समाराधयन् ।
धर्मोद्योतपरोऽघसन्ततिभिदे कुर्याद्विहारं मुनिः, आत्मा० ॥१६॥

यत्राऽऽहारवृति समुज्झितपदा चक्षुर्युगेऽप्रेक्षण-
यत्रावास उदीरितो मुनिगणान् रक्षाक्षमो ब्रह्मण ।
त्रासो जीवमनृतन न च परैरन्यै वसीतान्वह आत्मा० ॥१७॥

पण्णा जीवनिकायगानत्त्यंसुमता ज्ञाता स्वरूप यथ,
त्रैध त्रैधमुदारधी परिहरेत्तेषा तदोपस्थिते ।
स्याद्योग्योऽत्र मुनीश्वरोऽन्यजिनपे तीर्थे तथाऽऽरम्भते, आ० ॥१८॥

पर्यायेण युत समाहितवया स्यात् सूत्रलार्थी मुनि-
ष्टेदाना तु यदा भवेत् परिणतो योग्य श्रुताना मत ।
आचारस्य प्रकल्पने क्षम इह स्याद्धमदेशी मुनि , आत्मा० ॥१९॥

उत्सर्गैरपवादनैश्च विविधैयुक्ते श्रुते सार्थके,
योऽर्थाती म गीतायतामधिसरेद्योग्यो मुनीन्द्रे पदे ।
सद्योऽन्येनमधिश्रयेच्छ्रुतविधौ मोक्षकतानोऽत्र द्राक् , आ० ॥२०॥

गाहस्थ्येऽयमुपास वेषमसदृत्तत्साधुभावे यजेद्,
ज्ञातेर्याश्च विचित्रसङ्गसहितान् द्रव्यस्य सर्व व्रतम् ।
निस्सङ्ग प्रतिबन्धवर्जितमना देशेषु यत्राटति, आत्मा० ॥२१॥

यत्रस्थ प्रतिपादयेज्जनगणान् धर्म विना निस्पृति,
गुप्तीना प्रतिपूर्णवेमवयसा हिंसादिपापोज्झनान् ।
ज्ञानाद्यै सहित सुदर्शनमतियुक् सद्व्रत व्यापयन्, आत्मा० ॥२२॥

यत्राऽऽख्याति जन सुधममनिश धर्ता प्रकल्पस्य च ,
स्यान्नु सयममार्ग आगमरुचि सत्त्वोद्भवो सोयम ।
स्याद्योग्योऽयमनुव्रयन्न तु परस्त्वाम्नायको नाटक , आत्मा० ॥२३॥

देवं मोहमहाभटोज्झितिपरं सर्वज्ञसर्वेक्षिणं,
शक्राद्यैः सुरसार्थपैर्नियमतोऽर्च्यं पादयुग्मं सदा ।
यस्याशेषपदार्थद्रव्वच इह ख्याति स्थितोऽन्नोद्यत, आत्मा० ॥२४॥

सर्वारम्भपरिग्रहाद्विरतदृक् शास्त्रार्थपाठे रतो,
लीनः संयमसाधने परतपा मोक्षार्थचेष्टापरः ।
यो भवतीह मुधैकजीवनपरः सोढोपसर्गावलेः
(तं ख्याति धर्मे स्थितः) आत्मा० ॥२५॥

सम्यग्दर्शनबोधवृत्तकरणैर्मुक्तिं वदन्नत्र स-
त्तमादिन्यसनानि नीतिमितिभिर्गम्यानि तत्त्वानि च ।
निर्देशादि-सदादिभिश्च मीलितैं रोधाय कर्मावलेः , आत्मा० ॥२६॥

एकाक्षादिक्रमान्मता मतिभिदाः श्रौतस्य सार्वोक्तितः ,
स्थानान्तर्यमुखाश्रिता भिदवधौः ज्ञेयात् पुनर्मानसे ।
सर्व द्रव्यमुखं तु बोधति विदान्त्ये ख्याति यत्संश्रित· , आ० ॥२७॥

स्यादात्माश्रितभावपञ्चकमिह जीवावृतीनां क्षया-
च्छान्तेर्मिश्रणतो द्वयोरुदयतोऽनादेर्भवाम्नामनात् ।
ख्येयं कायविधानसंयुतमिदं सोपक्रमं जीवितं, आत्मा० ॥२८॥

यद्दानाद्भवतीह कर्मफलतो वेद्यं भवेत्कोटिशः ,
कायो जीवितमीदृशोऽनुभवतां श्वभ्रेषु देवेषु च ।
अत्राख्याति चतुष्टयं गतिभृतां निर्विण्णतालब्धये, आत्मा० ॥२९॥

संयोगोऽसुमतां मिथोऽणुवितते र्लोकप्रमाणात्तकद् ,
धर्माधर्मनभोऽन्वितात् परिमितिभाजोऽणवो नासवः ।
कालोऽनन्त इतीह षट्कमुदितं द्रव्यस्य याथार्थ्यतः , आत्मा० ॥३०॥

जीवे कर्म लगेत् यदाश्रवततेरात्त स चाक्षान्तै-
युंक्तैर्योगकषायनैर्निमिधतो यत्कर्म वेद्य भवे ।
मिथ्यात्वेन कषाययोगसहितेनात्मलग्न मत, आत्मा० ॥३२॥

हिंसाद्या श्रुतवेदिना प्रतिपद वर्ज्या प्रतिज्ञाविधे ,
शेषाणि त्रिदशामुतोऽघनिचयाद्यद्वा ततोऽमी तत ।
सद्वृत समितादिभूरिगुणिनोऽत्रोक्ता तप साधना , आत्मा० ॥३३॥

ससारोऽयमनान्तिकोऽन्तकजरार्कीणाऽसुखाना खनि-
रुच्छेद्यो मतिमद्भिराप्तुममलज्ञानाद्विपूर्ण शिवम् ।
लोकाग्राश्रितजन्तुपु स्थितिवर त्र्यातीति यन्नाश्रित , आ० ॥३३॥

देय दानमपापकेऽघहृत धर्माद्यमे सत्सखा,
दु खित्राणमुतोपकृ गतभय धृत्वा दया हृद्गताम् ।
जीवाद्यर्थनिबोधन च भविना ज्ञानेऽत्र दान मत, आत्मा० ॥३४॥

क्रोधो हेय उपेत्य तापप्रद(निपु णो मानोऽन्तकृन् सज्जते ,
विश्रम्भैकविघातिनीं परिहरेन् माया पर क्लीविद ।
लोभ सर्वविनाशपाटवधर जह्यादिति ग्यायते (श्लोक सत्रा), आ०

पूर्वं यत् सुकृत चित नरभवाद्याप्तिस्तत सङ्गता,
ज्ञात्वा दु खफल न किं सफल्येत सद्दर्शनाद्याप्तते ।
दौर्लभ्य पुनरस्य चोल्लक्सम बुद्ध्योपतस्वेह याकू, आत्मा ॥३६॥

नित्योऽय परिणामवान् वितनुते सङ्ग वियोग सदा,
कर्मालेर्हननादितोऽप्रियभुवोऽन्यस्या विरक्तेस्तत ।
सिद्धयै सन्ति सुदर्शनादिकगुणा मत्वति सिद्धान् स्मरे , आ०

कर्मालिप्रभवो भवो न विहितो दुःखैकरूपा विभुः,
कर्त्ता नाऽस्य न चापि दुःखसुखयोः स्यातां तु कर्माश्रिते ।
ते प्रत्येकमिहाङ्गिपु प्रयततामित्याह यत्संश्रितः, आत्मा० ॥३८॥

हेयादेयतया भिदाऽर्थनिचये ज्ञानोत्क्रमात् प्राणिनां,
पाट्याऽजीवततेः सदोपकृतिपु पुण्ये च पापे क्रमो ।
कर्मानुक्रमगो गुणेपु विलयात् पाट्याश्रवे सम्मता,
प्राप्यत्वेन च संवृतौ वहुगुणोद्दीप्तिक्रमो निर्जरे ।
वन्धे छेदक्रमो मतोऽचलपदारोहस्य श्रित्वा गुणान्,
मोक्षे धीपदगः क्रमो नवभिदि प्रोत्साहिकास्तद्भिदः ।
तत्त्वानां मतमाश्रयद्भिर्जिनपस्योच्यन्त आप्तुं शिवं, ॥३९॥४०॥

यामेऽन्त्ये निश उच्यतेऽत्र विलयः सुप्त्याः स्मृतेरर्हतां,
स्वाध्यायं चरमांश आवसनतामकोंदये लेखनाम् ।
पादोने प्रहरे तु भाण्डलिखनं सूत्रार्थपाठो द्वयो,
भिक्षा वाह्यगतिद्वयं तु तृतीये लेखां सशय्यांशुके ।
पात्रेऽन्त्ये प्रहरे तु दैनिकगतां कुर्यात् पडावश्यकीं,
व्युत्सृज्याखिलपापसन्ततिमथ स्वप्याद् द्वयोर्यामयोः ।
शेपे धर्मसिते तु मोक्षगमके ध्याने च काले हृदि, ॥४१॥४२॥

यत्रोज्झितानि मुनिभिः सकलानि कर्मा-
ण्याप्तं पदं त्वविकलं परमात्मरूपम् ।
तान्येव वन्दितुमनाश्चरतीह साधुः,
श्रेष्ठं तदेव चरणं भविकाः श्रयध्वे ॥४३॥

तीर्थं सिद्धगिरिं स रैवतमथो सम्मेतमष्टापद,
चम्पा पुरीमपापिका गिरिमथो वैभारमप्यद्भुतम् ।
तारङ्ग निविधातिशायि चिनपोपेतानि सेवेऽत्र स्नाक्, आ० ॥४८॥

मोक्षस्याप्तिरुदाररूपधरणे सद्दर्शनानिश्चये,
तद्धेतु प्रतिबन्धकार्यमनन ज्ञानात्सुधामोद्गत ।
चारित्र त्विह कर्मबन्धविलये नव्याग्रहेणान्विते, आत्मा० ॥४५॥

ये ये बन्धनहेतवो भवभृता कायान्तिप्रायिका-
स्ताँस्तान् व्युत्सृजतीह प्रेत्यगमने स्यादन्यथा बन्धनम् ।
प्रेत्यापीति विवेकरत्नमसम ध्यायेत्सुधीरत्रग , आत्मा० ॥४६॥

प्राणान्तेऽप्यनघा दधीत मुनिराट् सलेखनासयुतां,
देवादीन् प्रतिभून् विधाय सहने स्थिर समाराधनाम् ।
ज्ञानात्मिकगोचरा विधिपर शल्यानि हृत्वा सुधी
(ऽत्र बुध्) आत्मा० ॥४७॥

आम्नात फलमत्र धर्मकरणे स्वर्गापवर्गद्वय,
गर्ताशूकरसम्मिता अपि जडोद्भूते सुखे साग्रा ।
गौणीकृत्य ततोऽग्रिम परफल वाञ्छेत् सदाऽत्रोद्यत , आ० ॥४८॥

देवे धर्मयुते गुरौ च न यथा रागोऽधबन्धश्रम ,
सम्यक्त्वाद्गिगुणावलेर्विमलताऽम्मादेव वस्तुस्थिते ।
सद्बन्मोक्षपदेऽभिलाष उचितो वैराग्यसद्बन्धुर , आत्मा० ॥४९॥

अज्यन्ते सुधियाऽत्र ये परिकरा अर्थाभ्यो यत्नत-
स्तेऽमुत्र मरणान्तमाप्य त्रियुजिं गतार आप्या न ते ।
कर्मक्षेशवियोगतो निजगुणा आप्ता शिवे स्थायिन , आ० ॥५०॥

नष्टो नैव समुन्मिलत्यपि परो वाह्योऽर्थ आत्मार्जितो,
नष्टोप्येति पुनस्त्वपार्थमवतोऽनश्यं दृगादिर्गुणः ।
काष्ठां चैष हि याति शुद्धिपरमां तत्तत्र कार्या स्थितिः, आ० ॥५१॥

ज्ञानादित्रितयं मतं नियमतो यद्भावलिङ्गं मुने-
र्द्रव्येणापि रजोहरं मुखपटीपात्रं सचोलांशुकम् ।
लिङ्गं स्वान्यदुरापधर्मजननं धार्यं सदाऽत्रोदितं, आत्मा० ॥५२॥

चारित्रस्य भवन्ति जन्मनि परोलक्षाः समाकृष्टयो,
वेषेणास्य चरित्रचारुमतिता तावत्प्रमाणा भवेत् ।
वेषेणैव वन्द्यतामनुगतश्चक्रीह शक्रादिभिः, आत्मा० ॥५३॥

उत्सर्गेण हि कोऽपि न प्रतिकृति कुर्याद्गृहानां मुनि-
श्चेन्नो तिष्ठति धर्मशुक्लमननं कुर्याद् द्वितीये पदे ।
शोधिर्दोषततेः पुनर्न गृहिता ध्यानं शुभं चोद्भवेत्, आत्मा० ॥५४॥

अश्वे हस्तिनि गोव्रजे जनगणो भूषार्थमाभूषणा-
न्यारोहेन्न च तत्र ममता काचित् पशूनां भवेत् ।
तद्वत्संयमसाधनाय यतिनां मुक्तोपधौ मुक्तता, आत्मा० ॥५५॥

यावल्लाभमधारयन्नृपवरः स्तेनं महालोप्त्रिणं,
सन्मानेन ददन्तमर्थमतुलं छेदेऽस्य शूलीकृतः ।
तद्वज्ज्ञानगुणादिलाभमनुयन् धर्ता परस्योत्तमः, आत्मा० ॥५६॥

चारित्रं न परत्र गच्छति समं जीवेन बोधादिव-
द्वज्रादेरिव वालकाल उदियात्संस्कार एतद्भवः ।
अत्रैतद्व्रतचेतसां न च पुनः प्राक् तद्व्रजेत्पाल्यतां, आत्मा० ॥५७॥

देवा दीर्घगवा भजन्ति चरणाद्देशव्रताना भवान्,
तत्प्राचुर्यमयस्व तस्य निपुण मदी च ससारिता ।
जन्तोर्मोक्ष्यनुगा प्रयत्ननिकर साम्य तु प्राण्यर्चित, ॥५८॥

समारे कृणसाधिते मुनिवर कल्याणकोटौ श्रयेद्
या ता नैव सुरेन्द्रसार्थनिचयो गच्छेन्निपण्णोऽन्यथे ।
ज्योतिर्नैव तथा रवेरिव परे ज्योतिर्धराणा घने, आत्मा० ॥५९॥

राधावेधसम मुनेभव इह स्यादतिमाराधन,
प्राचुर्य यतिना तु वेदवसव शुश्रूषया साधय ।
ो स्यात्तत् त्रयमन्तरा मतिमता योग्य सदागमाद्, आ० ॥६०॥

आयुष्कस्य विभाव्य नाशमखिल दुर्याति समाराधन,
मूरीन्द्रान् प्रणिपत्य सर्वनियमानादत्त उद्धारकान् ।
साभीक्ष्ण्य जिनादीक्षान् पुनरपि प्रोल्लाह्येत् सद्व्रते, आ० ॥६१॥

गच्छस्थान् सयतान् श्रमेत मनिशम् आवृत्यसाधून्क्रिया,
जात दज्ञनुपाऽऽगमवचोऽनाकल्य चीर्ण सकृ ।
आचार्योचितयाचकान् समवृषान् शिष्यादिपान् सन्मना, ॥६२॥

जैनेऽवारिवसङ्घ छुलगाऽऽयालम्बान् मुनी-
ा जमायधि यत्नत तनुवधश्चित्तैरनिष्ट यूपे ।
श्याम्येवम भवान्तरे यूयगो न स्यात् पुनर्दुर्लभ, आत्मा० ॥६३॥

जीवा ये मदनालगल्वमदा मद्धालामोक्षिगा-
स्तान् क्षाम्येन सुहृद्येन यन्न दुरित यन्नीपुराभिल मान् ।
आज्ञा न भवे भवन् परिणता गैरम्य मुद्धिगा (त), आ० ॥६४॥

जीवानां भवतीह पूर्वभवगो द्वेषोऽपि रागोऽपि च,
प्रत्यक्षं तु विना स्मृति गतभवद्वेषादिहेतूद्भवाम् ।
तद्वद्वैरपरम्परां विबुध्य मतिमान् सर्वेषु कुर्यात् क्षमां, आ० ॥६५॥

नीतो देवेन युग्मी सुरभवनसमात् क्षेत्रता वैरहेतोः,
स्वभ्राप्तेर्योग्यमायुस्तनुमुखलघुतां प्राप्य धामेति मत्वा ।
स्थाप्यं केनापि नेदं मनुत इह भवी क्षामणं तद्विधत्ते, आ० ॥६६॥

लब्धेऽपि प्रभुताधरे जिनपतेर्जन्मन्यशेषाङ्गिनां,
मुक्त्यर्थं न तु वैरमाप चलन दैत्यस्य गोपस्य च ।
पार्श्वस्यान्त्यजिनेश्वरस्य मतिमान् ज्ञात्वेति वैरं त्यजे–दात्मा० ॥६७॥

पापानां परिहारमेव कुरुतां सर्व जगन्मा च भू–
दुःखानां भवनं पदं तु लभतां नित्यं महानन्ददम् ।
युज्येतेदृशचिन्तया न विदुषां वैरं ततस्तत्त्यजे– दात्मा० ॥६८॥

सर्वाङ्गिष्वविशेषतः सुखमतिश्चेद्धारणीयाऽन्वहं,
पीयूषोपमिता तदा कथमसौ वैरस्य पात्रं विदाम् ।
सञ्चित्येति विषोपमामरिमतिं जह्यात् समेष्वङ्गिषु, आत्मा० ॥६९॥

यत्रेक्षेत गुणांशमात्महितदं नम्रो भवेत्तत्र ना–
तच्चेन्मोदपदं सुधी हितकरं द्वेषेण किं दह्यते ।
मत्वेतीह सदा भवेद्गुणपदे वैरस्य नाशे यतः, आत्मा० ॥७०॥

जीवाः सर्वमिदान्विता निजनिजाऽदृष्टेरिताः संसृतौ,
चित्रां योगसमुद्भवां विरचयन्त्यात्माश्रितां चेष्टिताम् ।
केषाञ्चिद्भुवितव्यता न सुभगा किं तत्र वैरेण भोः, आत्मा० ॥७१॥

प्रत्याद्या विविधा त्वाभिहननादीना पदाना वश,
नीता येऽत्र जनौ पुरा भवगतेनाज्ञाननिश्राभृता ।
त्रैध त्रैधमुपैत्य पापसदनस्याऽस्तु व्ययो दुष्कृते, आत्मा० ॥७०॥

लोभाद्वास्ययुताद्भयाच्च यदवग् मिथ्या क्रुधा सयुत-
स्तन्मे सम्भवोदधिं परिगतो भूयाद्वृथा दुष्कृतम् ।
द्रव्येणेदमलोकलोकविषय कालाध्वभावेषु च, आत्मा० ॥७२॥

ग्राह्य धार्यमदत्तमात्तमर्ति श्रित्वा मया यद्भवेत्,
तत्सर्वं विदधामि दुष्कृतपद मिथ्या शुभेनात्मना ।
प्राणा यद् रहिरर्थजातमसुषु प्राणप्रदोऽर्थप्रद , आत्मा० ॥७४॥

तैरश्च सुरज च मर्त्यजनुषो यत्सम्भवेन्मैथुन,
यत्तत्साधितमल्पितात्ममतिना कामान्धताधारिणा ।
तत्सर्वं परिहाययापदमद आत्माथत प्रापये- आत्मा० ॥७५॥

दुखाना खनिरेष यो बहुविध सङ्गो धनादिग्रहे,
नातोऽन्यज्जगतीह जन्तुविषय ह्यस्येत सद्दम्भयम् ।
तत्सर्वं परित्यज्यतापदमयेत् सङ्गो वृषाङ्कश्रिता, आत्मा० ॥७६॥

ससारस्य मतो महान् परिकर क्रोधो यतस्तद्वशा-
ज्जन्तुर्नैव हिताहित विमनुते दग्ध क्रुदग्नि श्रित ।
जीवे तापकर त्यजामि तमह श्रित्वा सदाराधनां, आत्मा० ॥७७॥

वर्गस्य त्रितयस्य यः प्रतिपदं घातं विधत्ते मद,
आचार्यादिगतं भनक्ति विनयं बालान् समुत्साहयन् ।
तं सर्वं विनयामि सत्पथगतः शृङ्गाष्टकैः सङ्गत, आत्मा० ॥७८॥

माया नागीव नित्यं परदररमणा जीवितान्तं करोति,
चारित्रं पालयन्तो मुनिवरवृषभा भ्रंशमायान्त्यमुष्याः ।
मल्ल्याद्यास्तत्त्यजेत् तां मुनिवृषभ इतो मार्गमार्येशदृढ्वं, ॥७९॥

लोभः सर्वगुणोज्झितः स्थितपदं यो याति सूक्ष्माञ्चितं,
यावत्सद्गुणधारणं मतिमतां दुश्छेदभूमिं गतः ।
तं सर्वं परिहृत्य संयमवतां मार्गेऽधुना संस्थित., आत्मा० ॥८०॥

रागः प्राणभृतां स्वरूपरमणप्राणापहारे पटु-
र्यद्दृष्टो गणयेद् विपर्ययमतिर्वाह्यं पदार्थं निजम् ।
मायां लोभयुतां विशेच्च तनुमाँस्त्यागस्य धामैष तद्., आ० ॥८१॥

इष्टं हन्तुमुपस्थितं स्वहृदये दृष्ट्वा समुद्भावयेत्,
प्राणी द्वेषमनादृतः स्वरमणे वैरानुबन्धप्रदम् ।
रूप क्रोधमदात्मकं प्रकटयन्त्यन्तस्ततस्त्यज्यतां, आत्मा० ॥८२॥

रागद्वेषवशाकुलाः प्रतिकलं मज्जन्ति बोधादिकं,
हित्वा साध्यमनर्थकारिकलहे सर्वस्वनाशे रताः ।
तन्नैकक्षणमस्य दातुमुचितः स्वस्मिन् प्रवेशो बुधैः, आत्मा० ॥८३॥

रागाद्यासक्तमनाः सदा प्रयतते श्रेष्ठे मते सद्गुणैः,
सत्यान्यैः परिपातितु गुणपदाद् दोषैर्जनानां पुरः ।
अभ्याख्यानमुदीरयेत् कटुफलं तत्सर्वदाऽदस्त्यजेत्, आत्मा० ॥८४॥

य शक्तो न हि शुद्धमार्गगमनेऽन्यान् पातयालुस्तत ,
प्रीतिं सन्नरगोचरा विलयति प्रोन्यानृत यद्वचम् ।
सत्यैशून्यमिद सतामघपद त्याज्य सदात्मैषिणा, आत्मा० ॥८५॥

ह्य गोकयुत समैति कुमतिरेयपु जीवेतरे-
ष्वज्ञानान्धतया स्वरूपरमण विस्मृत्य भोगानुग ।
कर्मानुक्षणमेप आत्मनियत पश्येत्तदेतौ त्यजे- दात्मा० ॥८६॥

धर्माय न यतेत यो निजगुणभ्रशात् परास्यैकदक्,
सोऽन्येषा वदतीह दूषणपदं सत्य तथा धाऽन्यथा ।
तद्वज्यं परिवान्न घरगत मद्धि सदा निन्दित, आत्मा० ॥८७॥

प्रायेणोन्यत आन्रेग वितथ मुग्धान् परान् वञ्चितु
तत्सत्याभमुदीरयन्ति मनुजा माया प्रयुञ्जायत ।
विश्लाङ्गिविनाशने पटुतर मायामृपा तत्त्यजे- दात्मा० ॥८८॥

श्रद्धत्ते ननु पापधामनितिं हेयान्च सञ्चेतसा,
य स्यादूर्जितमानसो जिनवच पीयूषपाने रत ।
मिथ्याग्ल्यविनाकृत्तस्त इद व्युत्सजनीय युधै , आत्मा० ॥८९॥

पापस्थानविरक्तचित्तलतिको भूयाच्छिवाशान्वितो,
हत्वा दुर्गतिकारणानि मतिमान् सद्भयानसिद्धिं श्रयेत् ।
रक्तोऽनादिभवेषु तन्न न हि तत्त्याग विना श्रयसी, आत्मा० ॥९०॥

यन्नाऽऽत्मा नितरामुपति मनन न ह्यस्ति मे किञ्चन,
नैवान्यस्य जनस्य सयुतिकरोऽह किन्तु मिन्न स्वयम् ।
आ मान निजमेकमेव मनुते शश्वच्चिदानन्दिन, आत्मा० ॥९१॥

संसारे भ्रमता कृता बहुविधाः संयोगसार्थाः परं,
प्राप्ता दुःखपरम्परा प्रतिभवं जीवेन कर्मार्जनात् ।
ज्ञानाढ्यं निजमेदय जीवमधुना सर्वं त्यजामि त्रिधा, आ० ॥९२॥

संयुक्तं भववारिधावसुमतां जातं न कैर्वस्तुमि-
स्तत्सर्व स्थितमेवमेव न पदं जीवानुगं प्रेत्य हा ! ।
तन्मे शाश्वतरूपमेक्ष्य रुचितं ज्ञानादिरूपं शुभ- मात्मा० ॥९३॥

ये केचिन्निजकर्मपाशपतिता भ्राम्यन्ति लोकेऽसव-
स्ते सर्वे क्षमयन्तु मेऽमतिकृतं नि.शेषमागःपथि ।
स्थित्वाऽहं क्षमयामि वैरमधुना त्रिध्यं त्रिधा यत्नगः, आ० ॥९४॥

प्राग्जन्मार्जितपुण्यभारसहितं भुञ्जन् जिनाह्वं त्वयं,
गर्भे जन्मनि दीक्षणेऽन्त्यविदि च प्राप्तौ शिवस्याखिले ।
विश्वे सातमुदीरयन् शिवपथोदेश्यत्र मेऽस्तु प्रभुः, आत्मा० ॥९५॥

यैरष्टादशदोषसन्ततिरलं प्रोद्वेष्टिताऽऽत्माश्रयात्,
प्राप्तं केवलमुज्ज्वलं सुरपतिव्रातेन पूज्याः सदा ।
मोक्षान्ता कथितार्थशुद्धविभूतिः सङ्घाय तैर्नाथिता, आ० ॥९६॥

कृत्वाऽनादित आत्मनि श्रितमिह कर्मेन्धनं भस्मसा-
दासाद्याव्ययबोधसौख्यबलदां शक्तिं स्वरूपात्मिकाम् ।
सिद्धास्ते जगदुत्तमाः शरणदा माङ्गल्यकाराः सदा, आत्मा० ॥९७॥

सोपाध्यायमुनीश्वरा गणिवरा मोक्षार्थमाप्तुं यताः,
साहाय्यं भविवित्त (चीर्ण) धर्मविधिषु प्रत्यक्षमाविभ्रते ।
श्रेष्ठत्वं शरणं च मङ्गलविधिं चार्हन्ति तेभ्यो नमः, आत्मा० ॥९८॥

धर्मा यो जिनदेशितोऽन्ययपर नेतु जनान् य क्षमो,
यश्चामीकरवत् कपेण सहितश्छित्तापयुक्त पुन ।
जन्तूना हितदेशको भवतु सोत्तसोऽनो मङ्गल- मात्मा० ॥९९॥

धन्योऽह भवनार्धियानतुलित ल ध मया शासन,
जैन स्यात्पदसयुता गिरमुशत् सर्वासुमत्तारकम् ।
निष्पक्ष समनीतिवादकलित यन्नास्थया स्याच्छिव- मात्मा० ॥१००॥

धन्यास्ते मुनय समेत्य जिनपस्येद वर शासन,
प्राणान्तोपनिपातनेऽपि न जहु श्रेणेरुपद्राविणाम् ।
मुक्ता क्षमविनाशनात् प्रकटिताऽतुल्येन वीयण ये, आ० ॥१०१॥

शीपे सादिरवद्विग्रहमसहत् श्रीनेमिशिष्यो गतो,
घालोऽबालपराक्रम श्वशुरत प्रेतालये सस्थित ।
निर्वाण जिनराजसाधितमगात् क्रोधाग्निनाम्बुद, आ० ॥१०२॥

धन्यास्ते मुनयो नमामि चरणाम्भोजेषु तेषा सदै-
फोना पञ्चशती मुयन्त्रपीडिता ये सिद्धिमापु स्थिरा ।
सत्य ये विविदुर्भिदामतिशयादात्माऽद्वयोराऽऽशिव-मात्मा ॥१०३॥

धन्यो येन समाहितात्मविधिना हृत्वा क्षय घातिना,
ल ध्वा केवलसविदादिविभूतिं हत्वा समुद्घातत ।
श्रेणेश्चेतरदुष्कृतावलिमिता सिद्धि शिवा शाश्वती, आ० ॥१०४॥

अन्त्ये योगनिरोधमाप्य विजहुर्ये बन्धन कर्मण ,
श्रेण्या प्राग्रचित स्वकर्म निचय देहु सितध्यानत ।
मुक्त्यौदारिकमुख्यकायत्रितयीं सद्घातहीना गता , आ० ॥१०५॥

गच्छन्तः शिवमार्गमेत उचिताकाशप्रदेशान् विना,
नान्याकाशगदेशसंश्रयमगुर्यद्वाऽस्पृशन्तीं गतिम् ।
आश्रित्याऽगुरवाधशाश्वतसुखं सिद्धान सदा तान्नम,
(सिद्धेभ्य एभ्यो नमः,) आत्मा० ॥१०६॥

येषामूर्ध्वमलोकघातिततमाऽस्याद् पूर्वयोगाद्गतिः,
कर्मासङ्गनभेदतोऽघजनिता वन्धच्छिदो वाऽऽत्मनः ।
स्वाभाव्याच्छरमुख्यवस्तुनिवहे चद्वत् सदैभ्यो नमः, आ० ॥१०७॥

गर्भो जन्मजराऽऽधिरोगनिचया नैषां भवेयुः पुरो,
निर्वाधं क्षतकालमानमपरावृत्तं शिवं शाश्वतम् ।
धामाप्येत जिनोदितात् स्वरमणाच्चारित्रतो मार्गगै-
रात्मारामपदं स्मरामि नितरां चारित्रमत्युज्ज्वलम् ॥१०८॥

सालां चारित्रगुम्फां भविजनततये धारणायात्मशीर्षे,
ग्रन्थित्वैनां ददामि प्रतिपदसुभगां लब्धुमग्र्यामवस्थाम् ।
तेनावाप्नोमि शश्वत्सुखमयपरमानन्दधामेति याञ्चा,
देवानां सद्गुरूणां सुविहितयतिनां सत्फलाऽस्तु प्रसादात् ॥१०९॥

पूज्याराध्यपदानां नवकं जीवादीनां नवतत्त्व्याऽनु ।
पञ्चकमत्र महाव्रतनद्धं चैत्यादीनि च सन्ति तु सप्त ॥११०॥

देवः साधुर्धर्मो रत्नान्याप्तुं ज्ञानं दृक्चारित्रे ।
इत्येषा गीता जैनीया षड्त्रिंशद्ध्यायसमेता ॥१११॥

॥ श्री आगम-महिमा ॥

आर्हन्त्य शुभसाधनैकमिमत धर्मोऽपि धन्य हित,
यच्च त्व त्रितय भवस्य भवनैकगुण्य विघ्न् गिष्टवान् ।
तन्नून महता पराधपरता मया पर सकल-
ऽसाधाप्यामलकेवल यदि भणेच्छेणिं सदाप्तागमीम् ॥१॥

प्राप्याऽशेषचगद्विलोक्यनपर ज्ञान निहत्याऽशुभा-
ऽन्तश्रेणिमपारमारबलयुक्श्रण्या क्षपण्या प्रभु ।
देवेन्द्रावलिसङ्कतामतितरा पूजामधिष्ठाय च,
पूर्वागमसन्ततिं सफलतामाग् नान्यथा हि प्रभु ॥२॥

पूतार्थोटो जिनेशो न नमति निखिलार्भीष्टसिद्धया कृतार्थो,
दयालिप्राभृत मत् सुकृतवरफल सेवयन् कश्चिदन्यम् ।
धन्य नूद्दामधर्मा नमति मुनिगण द्योतयन् स्व श्रुतद्द,
यन्मेऽद्य मज्जिनत्व मुनिगणपधृतागमादव जातम् ॥३॥

सुरविमुक्तसकृत मुनिमधुपमालित सफलगुणदायिन,
नमत नम्रमौलयोऽधिष्ठितसत्क्लोमव सदागमादिदर्शिनम् ।
फल जिनेन्द्रपादपे वरे गताधिसतापे सदागमोपदेशन,
सदेव तीर्थमुद्दिशन् भवालिमोक्षमादिशन मन सुष्ठासारको
जिनेश एव नापर ॥४॥

भव शास्त्राणि भव शास्त्राऽऽि शास्त्राणि भव शुद्धये ।,
जिनपतिगदिता गणपतिविहता मुनिजनगाधरा विमला ।

नरभवनिकरोऽसमफलविसरो भावितभावो गतदौःस्थ्यो,
नम्रशिरस्को विगतरजस्को भवति नरस्तद्भजनमनाः ॥५॥

चलति जिनेशः सुरपतिविततादासनात् सिंहयुक्तात्,
भविजननिचयं हतवृजिनचयं देशयँस्तीर्थमार्गम् ।
गणधररचिते विविधनययुते शास्त्रवृन्दे विधातुं,
तीर्थानुज्ञां पूजाऽऽनुण्यां दर्शयन्नागमोक्ताम् ।
(प्रोत्थायाऽर्हन् विनयमनुदधदासनात् सन्दधानः) ॥६॥

सुरेशा नरेशा जिनेशा न सर्व, सुसर्वज्ञतालाभमिहार्चयन्ति ।
अनुज्ञां परं कर्तुमिहागमानां, सदैवाद्रियन्ते गणेशितृपूजाम् ॥७॥

देवो गुरुर्धर्म इति त्रयं जने, भवाम्बुधेर्निस्तरणाय योग्यम् ।
तदेव चेदागमवाङ्निरस्तं प्रतिक्षणं संसृतिवृद्धिकारि ॥८॥

पूजा जिनानां शमिनां सपर्या, धर्मस्य वृत्तिर्भविना शिवाय ।
सा चेद् भवेदागमवाण्यपेक्षा, नो चेद् भवानां परिवृद्धिकर्त्री ॥९॥

एतदेव दुष्षमास्खलायितं, कर्म वा पचेलिमं भवद्विषाम् ।
दक्षिणार्धसम्भवो यदेष ते, क्रियते सुकृतमागमादरः ॥१०॥

पूजा जिनेश ! भवतो भविना कृता सा,
सम्यग् (सेवा) भवोदधितरिर्भवतीह जन्तोः ।
सामायिकादिसुकृताचरणं (महाफलं) शिवाय,
चैदागमोक्तिपरमान्तरमाप्यतेऽत्र ॥११॥

साम्राज्यं जिनशासनस्य न भवेदभ्यर्चनादर्हतां
सूरीणां सततं महादरकृतेर्नो नैव चार्हन्मते ।

प्रोद्भावप्रभवैस्तकार्यकरणात् किन्तूत्पादार्हतात्,
वक्तु श्रोतृगणस्य चागमगतात् सद्बुद्धिरुन्मोयुगात् ॥१२॥

भोघ त्वद्भुजन जिनेश ! यमिना ससेवन सादर,
तीर्थोत्सर्पणहेतुधर्मललन जाग्रज्जगद्भासनम् ।
स्निग्धवेतत् सकल भवेत्फलयुत चेदागमाना तव,
पृगालेसन-सत्क्रिय यदि भवेत् पुसा जनुर्दुर्लभम् ॥१३॥

कथ ज्ञेय वृत्त तव सुचरित दोषविकल,
कथ स्थाप्या मूर्त्तिस्तव जिन ! गताङ्का शमरसा ।
कथ ते मोक्षाध्वप्रगुणगणोद्दाममुन्ति,
न चेत्पा शुद्धा भवति भुवने ह्यागमतति ॥१४॥

ह्यास्याधायि जने घने मम विभो ! मौग्ध्य पर दृश्यता-
मात्तो यच्चिरकल्पकालचनितो निष्पत्तये शमणाम् ।
त्यक्त्वाऽध्यक्षसुरार्पकान् सुनियतान् ज्ञातेयतीर्य्यान् श्रितान्,
चेत्ते नागमसन्तति प्रभवति प्रोद्दाममोक्षाध्वने ॥१५॥

अध्यक्षमेतद्विदुपा प्रघोष्यते, यद् ग्राह्यतामेति समक्षमूहितम् ।
मृत चिरातीततर समाश्रयँस्त्वा किं ब्रवीमि जिनपागममान-
वञ्चित (वञ्चित) ॥१६॥

न्याय सार्वजनीन ग्प विदितो यद्वीक्षिते बालके,
नश्यत्यौद्धरिके रुचिर्मतिमता जाड्यस्य जातादरा ।
तत्किं सार्व ! मया जगत् सुविन्ति सौख्याकर सूक्ष्मित,
ह्या ! ते ह्यागमसन्ततिर्न च मता पापात्मनाऽधीमता ॥१७॥

नरा जगत्यां किल साम्प्रतेक्षिणो, धरन्ति सञ्ज्ञां खलु दीर्घकालिकीम् ।
साफल्यमस्या विदधाति विद्वॉस्त्वदागमोद्बुद्धभविष्यदर्थः ॥१८॥

कथं लक्ष्यो देवः प्रशमरसतोऽबाध्यशिवगः ,
कथं सूरिः श्रेयःसरलतरमोक्षाध्वधृतये ।
कथं यस्या यामा भवजनिमृतेर्दुःखहतये,
न चेत्ते साक्षात् स्यान्निरुपमकृतिर्ह्यागमगता ॥१९॥

तीर्थं तीर्थं जिनानां न तु जिनपतयः कि न दुष्टोक्तिरेषा.
मान्या सा सर्वमान्यैः स्वयमुदितचरी श्रद्धयाऽप्यागमानाम् ।
सत्यं सौरः प्रकाशः प्रभवति जनता ज्योतिषेनैव सूर्यो,
नैषा सूर्यस्य हानिः स्वप्रभवरुषमया तद्वदाप्ते स्वतीर्थात् ॥२०॥

सुविदितं खलु सज्जनसन्तते–र्यदधमं परदोषविकत्थनम् ।
तदपि दृष्टिचरं नहि चेद् भवेत्, भवति सत्पदवाऽऽगमसन्ततिः ॥२१॥

न्यायो यदेष जिन ! मानभरः स्ववोधे,
यत्तेन बाधितमरं स्वहिताय जह्यात् ।
नाथाऽऽगमावलिरसाञ्चितचित्तभारो,
लङ्घेय मोक्षपदलीनमनास्त्वहं तम् ॥२२॥

मत्तो जनो न जगतीह समीक्ष्यकारी,
यत्सोऽधिगच्छति पदार्थमपेतमानम् ।
सार्वागमोक्तिरसपानविमुखचेता,
वेत्ता जगत्त्रयमिति प्रवलं न मानम् ? ॥२३॥

जगति जीवनजातमहो ! मतं, प्रतिक्षणं विशरारु रुगर्दितम् ।
तव जिनागमसञ्चितसंयमैः , प्रतिकलं पदमाप्यते उत्तमम् ॥२४॥

जिन ! त्वदागमा मया विलोकिता न सौख्यदा,
यतो भवा अतीतभाविदुःसभावसभृता ॥२४॥
प्रदर्शितास्तके पुनर्मुदास्पदं तके यतो,
विचूर्ण्य तान् पद लभन्त आर्य्यय ससाधना ॥२५॥
मत्तो जनोऽय जिनराट् ! सदागम-पानैरपीनो न वहिन चान्त ।
जानन् हि सत्त्व मनुते यदास-त्रिकालतत्त्वो नहि साम्प्रतेश्वी ॥२६॥
जिनागमानां महिमोद्भवाय, त्वया श्रिता या त्वमरस्त्वदर्थम् ।
सत्प्रातिहार्य रचिता सुपूजा, गतागमानो जिनराट तथापि ॥२७॥
मता गणेशा जिनराट तवामी, सार्वज्ञभावान्वितसन्मुनीन् यत् ।
विलङ्घ्य तिष्ठन्ति पुरस्तवेदं, रक्षाकर त्वागमजं पर बलम् ॥२८॥
वितन्वते मञ्जुलमङ्गलावलिं, सदा जिनाद्या जगतीह दीप्रा ।
पर नमस्कारकृतेस्तवाग्रे, नमो भणन्तीह सदागमज्ञा ॥२९॥

नार्हन्त्य महिमास्पद तव जिन ! श्रित्वाऽऽमरीमर्हणा,
नैवाऽन्यसमा श्रिव श्रयसि सत्राकिद्रमाद्युद्भवाम् ।
नैवानङ्गगणेन्द्रराजिरचनालब्धप्रतिष्ठोद्भव,
किन्त्वेषाऽऽगमसन्ततिर्गतमला मान्नाद् द्युधाना कृता ॥३०॥
महत् खलु प्राप्तमिद यशोऽभिध, त्वया जिनेन्द्रोदितसयमेन ।
पदन्यासानमिहापयँस्त्व, सर्वागमाना प्रभवो विगीत ॥३१॥
य प्रान्त्यमायत्तमुपेयिवासो, जीवा भवे तानवतोमभावा ।
अज्ञानभावेऽपि सदागमा ये, स्तान् स्तुयानैव सतत्त्ववेत्ता ॥३२॥
कृतज्ञतामम्मतरा अमी खलु, जीवा यदाश्रित्य ममोक्तितत्त्वम् ।
मामेव हास्यन्ति भव त्यजन्त-स्तदा विदन्नागम इष्टदार्यी ॥३३॥

कृतघ्नता-बुद्धिधरान् समस्तान्, जीवान् भवात्तारयितुमुद्यमम् ।
अभावयन्नुत्तमसत्त्वधारी, सदागमोऽयं सततं प्रवृत्तः ॥३४॥

सदागमाश्चैव सदागमा भुवि, कृतघ्नतां ये भवभावभाविनीम् ।
विदन्त आश्रूपगतां नराणां, सदा सदानन्दपदाय मग्नाः ॥३५॥

अतितरां ननु नैव विराधितो, जिनपतिस्तनुते विविधां व्यथाम् ।
करणयोगभुवा क्रियया पुन-र्यदि च (भवति) लेशत
आगमजो विधिः ॥३६॥

विराधना या जिनराजराज्या, विशोध्यते सा गुरुनोदनाद्यैः ।
परं विराद्धा विशदाऽऽगमाऽऽज्ञा, भवं दुरन्तं तनुते समेषु ॥३७॥

जिनोऽपि सार्वो निखिलं विदन्नपि, प्रसङ्गप्राप्तं निरवद्यभावम् ।
साधुव्रजोद्धारपदं न चानु-जानाति चेदागमवाग्-विरुद्धम् ॥३८॥

यदपि केवलमुत्तमतां गतं, निखिलबोधकता न परे यतः ।
तदपि नन्दिपदं जिनपागमाः, क्षणपदं तत एत इहार्हते ॥३९॥

शुद्धेः पदं जिनमते भविनां यदाऽऽदा-
वावर्त्तमन्त्यमधिगच्छति कालसौम्यात् ।
न्यायात् सदन्धकरणा दुचिरागमानां,
जागर्त्त्यहो ! जनिभृतां (भुवि तदा) करुणाऽसमा वः ॥४०॥

नीतिः सत्तमगोचरा ननु जने पूज्यत्वदानं परे,
चक्री यत्कुरुते महोत्सवपदं चक्रं स्वकं मोदतः ।
सत्यं तद् भवतारकाङ्कितपदं भो आगमाः शाश्वता',
यूयं दत्थ जिनेन्द्रराजय इह प्रोद्दामपूजान्वितम् ॥४१॥

नयति नौसटमम्बुधिपारग, प्रवरपण्यभर फलमश्नुते ।
ननु च नाविक उत्तमता, तथा, ननु लभन्त इहागमतो जिना ॥४२॥

रेखा रेखा विदन्तो ननु जिनपमहान् पूजयन्तीह शास्त्र,
पूजा धत्ते च शास्त्रा प्रमुख इह भुवो देशनाया प्रकाशम् ।
सङ्घस्याप्तागमान् यद्धरति सुनिपुण सर्वकाल यतोऽसौ,
नीतिं लोकान् ददर्शाऽतनुमहिमभुव पूज्यपूजाङ्किता ताम् ॥४३॥

जगत्पतित्वमहता मत जिनेन्द्रशासने,
न मन्यतेऽमुना यत परस्पर विरोधभाक् ।
त्रिकालग जगन्न तु प्रभुप्रभावभावन,
सदागमा सनातना जिनास्तदुपदेशका ॥४४॥

कथ मायाद्विषे जिनप ! तव यशो दिशु श्यासु
दधौ जन्मान्त्य यत् प्रवरनृपगृहे सत्कुलगत ।
गतोऽप्यन्ते मोक्ष न च तव विरोपो जगति नु,
त्वदुक्तो यन्नित्य तनुत आज्ञो महपदम् ॥४५॥

सदागमा सदा जनेषु धर्मभावबन्धुरा,
जिना सदैव सान्तरा निरन्तरा इमे पुन ।
पर न शुद्धदर्शनस्वरूपधारका अमी,
सदवरूपता परा दधत आपरूपत ॥४६॥

अतीतकाल आर्हतो सत्यागमावलीमिमा-
मवापुराहता पर सदात्मशुद्धिज परम् ।
श्रिता विशुद्धिमार्गतो विहाय मन्मति परा,
सुभाविनोऽपि तद्वदव धीतिराहता रघा ॥४७॥

नरो भवेद्यदा पुनर्विधूतपापकश्मलः,
सुधर्मसाधनोद्धुरो विहाय कालमार्भकम् ।
श्रितो भवस्य यौवनं तदा ध्रुवं सदागमान्,
विचिन्त्य कार्यमादधाति मोक्षगामी च पुनः ॥४८॥

शस्यते समस्तधर्मवेदिभिः ; स मानवो य आगमं समाश्रितः ।
दूषणं परस्य शंसने मतं, यतस्ततो भवति दृष्टिरावमी ॥४९॥

आस्तिक्यं कि मतं भो ! द्विविधमनुपमं लौकिकं चोत्तरं च,
प्रेत्यादेर्बुद्धिराद्यं गदितमनुभयं सार्वसूक्तागमेषु ।
नित्योऽनित्योऽपि जीवप्रमुख इह मतो मुद्रया स्यात्पदाङ्क्या,
मोक्षान्तस्त्वागमोक्तेरिति मननमिहानुत्तरं चोत्तरं तत् ॥५०॥

सम्यक्त्वचिह्नानि शमादिकानि सद्भिः प्रशस्यानि तदैव चेद् हृदि ।
जिनेन्द्रदेवागमवासना-सुधो-क्षितत्वमीक्ष्येत बलीय आप्तैः ॥५१॥

शमोऽप्यनन्तेषु भवेषु चीर्णो, निर्वेदसंवेगघृणास्तितादि ।
परं न जैनागमसंस्कृतं तद् , जाता ततो नैव ममाभिनिर्वृतिः ॥५२॥

सदागमा भो ! कथमर्हणापदं, गताः सतां वर्णपदादिसाम्ये ।
उक्ता जिनेन्द्रैरिति चेत् तके कथं, प्रमाणमित्यन्यपदं न कि मतम् ॥५३॥

सदागमानां भगवान् प्रणेता, प्रघोष इत्थं न सुखाकरः स्यात् ।
उच्यन्त आप्तैर्ननु शब्दमात्राद्, न चार्थरूपास्तु वचो व्रजन्ति ॥५४॥

वक्ताऽर्हन् सुवि देशनाश्रयगतोऽर्थस्याश्रितः सन्नरैः ,
कि सत्यं तकदुच्यते न पुरुषैर्वाच्योऽर्थ आप्तो मतः ।

सङ्क्षिप्ता यदि तन्निरूपणपरा शास्त्रा सर्वागमिधा ,
नक्तास्ते न तदा परस्परगतिर्नोक्तागमाना क्वचित् ॥५५॥

सत्यागमा । किं भवता महत्त्व, तुरंगशृङ्गाणि यतो न यूयम् ।
प्याथष्टवर्गेऽन्यवचांसि यद्वन् लियागमाना इति निश्चयीक्ष्य ॥५६॥

जिन गणि घृप श्रयन् भवी तपन् महातप ,
सुपुण्यराशिसाधनोद्यतश्च यष्टमाश्रयन ।
वचोत्तिग न मुच्यते सत्यागमानते ननु, (भवन्मा)
यथार्थभावमाननाद्भवन्त इष्टसिद्धय ॥५७॥

जनत्य ननु सिद्धमागममतान् सिद्धाञ्जिनान् साधुपान् ,
पाठकयुक्तमुनीन मनेत्रादि भवी त्रेयान् गुरूँआदरात् ।
धर्मं चाश्रयति प्रधानपदवीं प्राप्त सुदृष्टयादिक,
तत्सत्य त्रिनिरागमम्य जनतानि श्रेयसे साधनम् ॥५८॥

आगम आप्ततमो यदि सिध्ये, विश्वहिता प्रणीतार्थपर स्यात् ।
न च हित्वा कपभेदतपैस्तु, शुद्धि मोऽनुत आप्तपद तु ॥५९॥

परभवकरणिजनिमृतिहरणिर्निश्चलभरणिनगति परा,
जिनपतिकथिता गणगतिहसिता मुनिननिधिनताऽऽगमवितति ।
नमनरात्त चरमावर्त्तं नियतमनार्त्तं मान तस्या,
मन्या विबुधा आगमबुधा गतसम्यक्षा भवत सदा ॥६०॥

गण गरल मच भ्रा रण जिनपागमपहृमरण,
हरण हरणे यत यत श्रण नक्षिनदुर्गादुरिनतते ।

धरणं धरणं वृणु वृणु धरणं निजगुणसन्ततिसारमतेः ,
स्मरणं स्मरणं कुरु कुरु स्मरणं (सरणं) संवरनिर्जरमोक्षगुणे ॥६१॥

शुक्ल पक्षं निश्रितममलं, रक्षसि भवधारिणमसुमन्तम् ।
कृतहा परमसुको यदिह त्वा–मागम ! याति निरस्य निवृत्तिम् ॥६२॥

शस्तः सार्वमुखैः संसारी यः स्यादागम ! तेऽध्वनि पान्थः ।
प्राप्तौ वीर्यमनाहतमन्ते भूत्वाऽतन्त्रः शिवमत्येति ॥६३॥

स एव सम्यक्त्वधरोंऽशतो वा, पापान्निवृत्तो निखिलाच्च जीवः ।
सदागमा ! यो भवतामधीनः, परो भवामेध्यकृमित्वरूपः ॥६४॥

देवं गुरुं धर्ममल भवन्तं. सदागमाङ्गीशरणं समेतः ।
रहस्यमत्त्वेन समेति चेन्न, हहा ! मवाम्भोधितलं समेति ॥६५॥

शरणमेति जनो व्यथयाकुलो. यदि परं परिपश्यति पालकम् ।
भविजनोऽपि तथैव तवागमं, ननु भवन्तमपीड उपैक्षते ॥६६॥

अर्हन् सिद्धो गणपतिरुपाध्याय आत्तव्रतोऽसौ,
सम्यग्दृष्टिः शुचिर्मतिनिपुणः सद्व्रती सुतपस्वीं ।
चेत्ते शुद्धागमरसमुधयाऽऽढ्यो भवेद् भावभूति–
र्नोचेत् संसारकूपे वलयमनुगतः संसरेन्नीच (निन्द्य) रूपः, ॥६७॥

जगति वित्तमशेषविदां मते, परिणमेत् परिणामधरः पुनः ।
ननु तवागमपूर्णविदात्मता समूलनाश उपैति कथं हहा ! ॥६८॥

पापं न जात्वेति यतं क्रियायां, गतिस्थितिस्वासनसन्निभायाम् ।
ध्रुवं समेतीतरथाऽवधेऽपि, परं विशुद्धागमसंस्कृते हृदि ॥६९॥

सदागमा वीनमनूनम ययेे, यत सजीवेतरबोधतोऽन्ययम् ।
फलन्ति यूय निखिलाङ्गिवग, यानद्भवद्भिर्न समोऽत्र विश्वे ॥७०॥

ज्ञानेन क्रियया च सङ्गतमिद जैन मत सद्यश ,
सूते यत् परश्नानि न तथा साकल्यभाक्त्वाद्ते ।
तत्रापि क्षमते मत विरहित जैन क्रियामि पर,
नो जैनागम ! शून्यता तव पर नैवाऽन्यमौ मुन्यते ॥७१॥

सद्दृष्टौ विदि वत्तने शुचिमना उद्यच्छते स्वात्मना
चेच्छक्तस्त्रिकसश्रयाय न भवेज्जैनागमा शाश्वतम् ।
स्थान शुद्धमुपैत्यमौ वरमतिर्य सश्रयेच्छुद्धितो,
रूप यद् भवतामनूनमहित शेपद्वयेप्सु सक ॥७२॥

लाभो लोभफल खलु प्रभुमते जेगीयते ज्ञैर्नरै-
स्तन्मिथ्येक्षत आहतागमसुधालाभे परा यन्मति ।
प्रज्ञाप्यानखिलान् विबुध्य परतो लुभ्येन्न कोऽपि श्रुते,
वादो व्याप्नुत आहत खलु भुवि स्याद्वादमुद्राङ्कित ॥७३॥

मनुत मनुत भावानागमज्ञानदिष्टान् ,
नहि परगतभाव स्पाशनादिर्विबोध्य ।
इह परजनबोधे हेतुरन्यागमस्य,
न भवति खलु कार्यं कारणोद्भावशून्यम् ॥७४॥

चक्षुरदेव जिनपागमवेदन यत् , स्वान्यप्रकाशकतया निजरूपमीर्त्ते ।
चित्रो विधिस्तत ईहागमदान उक्त,
उद्देशनास्तिपरे न विदा चतुष्के ॥७५॥

जागर्षि जैनागम ! जन्तुजाते, बोधं समेतं क्रियया वितन्वन् ।
विवृद्धपर्यायमुनिः प्रदिष्टः, क्रमात्ततस्त्वत्प्रवीणैर्जगत्याम् ॥७६॥

बोधमुखानि पराणि मतानि, धिक्कृतसत्कृतमार्गगमानि ।
नाऽऽगम ! जगति नु क्रियया रहितः, फलति ततस्त्वं विद्वत्तात्मा॥७७॥

सत्यं चक्षुष्पदमनुकुरुते ह्यागमज्ञानमग्र्यं,
जैनं तच्चेद् विबुधपरिमतं नैव चारित्रहीनम् ।
स्वं दावाग्नेरवति नियतं यः क्रियावान् स चक्षु-
र्दह्येताशु प्रतनुमतिकोऽप्राप्तसद्बोधवृत्तः ॥७८॥

आगमा ! जगति यूयमात्थ यद्, वस्त्वपर्ययं भवेत खपुष्पवत् ।
ज्ञानमक्रियं नु तर्हि किं मुधा, खण्ड्यते क्रियात्र सद्व्रतात्मिका ॥७९॥

सदागमा ! भवद्भिरेष आश्रितो न यो भवे-
न्न यद् व्रजेद्विषादितां स सम्पदर्थको नरः ।
न चेदसङ्ख्यभागगं निगोदमेकमुद्धृतं,
सदा भवत् समीक्ष्य किं सदोद्यमोऽत्र वो विना ॥८०॥

न्यायस्त्रिलोकगतजन्तुगणे प्रसिद्धो,
लब्धा श्रियो भवति यो भवतीतखेदः ।
उल्लङ्घ्य तं ननु सदागम ! ते प्रवृत्ति-
र्यत् खिन्नभावसजुषि श्रियमादधासि ॥८१॥

मयोः पृष्ठे भारो य इह न मायात् स गलके,
निबन्ध्यो लोकेनाहतमिति लघुप्राप्तमतिना ।

त्वयाऽमाता मोक्षे ननगतितले ते विनिहिता,
ये मोहाङ्गोद्दलननिपुणा आगम। नरा ॥८२॥

भवन्त किं स्तुत्या यदिह भवता ये स्तुतिपरा,
भवान्त ते याता ननु च विमल निश्चिततरम् ।
न तन्नात्मान भो। कथमपि स तत्त्व नयथ तत्,
वृथापन्नो न्यायो यदुत न मुधा यद्गतक्रय । (नयगति) ॥८३॥

मया प्राप्तव्य द्वाग् जननलधेस्तीरमचल,
यत्न सिद्धयेच्छुद्धागममतितति पूणघटना ।
विसवादो नैवामलमतिजुषामत्र सुधियौ,
पर नाह वद्धिनहि च विषयोऽस्यागमतते ॥८४॥

महिमानममितमेति साऽऽगमालिराहती जने,
यतो हितोपदेशकृन्मुमुक्षुसाधुसद्गर्हापरस्परविरोधनाक् ।
जगति वीक्ष्यता पर नेतरा तथेति तर्कनाददक्षताधरा ,
श्रद्धया पर श्रयेयुरहदुक्तता यतो न चैत्रमात्रय परस्पर विघातकृत्
सताम् ॥८५॥

आगमवृन्दमिद महनीय पूर्वमिहार्हत्साधुवृषाद्,
मानमिहाम्य मत निपुणाना तद्गतवाक्यसुधासरणि ।
चेद् गतमानमिहैतत्पात्र तत्त्रितय न कथञ्चिच्छये,
मत्वा सवमिद गतमाना मनुत सदा तत्त्वत उत्कृष्टम् ॥८६॥

कैवल्यज्ञानभाज समजिनपतयो द्रव्यकालाध्वभावै-
र्जीवादीन् सवभावानमितपरिगतं पयय शुद्धरूपान् ।

वुद्ध्वा प्रज्ञापनायाः पद्मसममितान् वोधयन्तीद्धवोधान् ।
जीवॉस्तद् द्रव्यभावात्मकमितरदिहाप्तागमीयं श्रुतं स्यात् ॥८७॥

शमोऽसमं साम्यमुपैति चिन्तनात्, चेत्तच्छमोद्न्तफलोहकं स्यात् ।
तथोहनं नैव सरागशास्त्रात्ततः शमात्मात्मक आगमः शुभः ॥८८॥

आगम ! उद्धर मां भवभीतं दृष्ट्वाऽगम्यां तव गतिमीहा,
कञ्चिच्छ्रितमुत्तारयसि त्वं लगति न यत्र मुहूर्त्तमनूनम् ।
कञ्चिदुपार्धविवर्त्तभवान्तर्लीनं कृत्वा तत उद्धरसे
चित्रं कालं तावन्तं त्वं फलसि विलम्बं कृत्वाऽपि द्राक् ॥८९॥

आगम ! तव सेवापर आत्मा चेज्जन्माष्टकमपगतभेद,
तद्भव एव भवेत् स निवृत्तिं पूर्णामात्मनि धर्तु दक्षः ।
उत्कृष्टां यदि तां मुनिरीर्त्तें तद्भव एव मुहूर्त्तोंदर्वाग्,
भवसि तटार्थी भववार्धेस्त्वं कुरु मयि रङ्के लघु तां सिद्धिम् ॥९०॥

उत्साहस्ते विधातुं परमशिवपदं संश्रितानां नराणां,
तेऽप्याप्तुं तत्सदोत्काः भवभयविधुराः साधनं ते तथैव ।
कोऽन्यास्ति प्रध्वरां यो विफलयति समां सत्प्रवृत्ति भवान्तः,
हाहा शुद्धागम ! त्वं मतिततिमनघां प्रेक्ष्य कार्य विधत्से ॥९१॥

या यत्यतेऽङ्घ्रिनिचयो लघुसिद्धिमात्तुं,
शुद्धागम ! त्वमपि तत्पथपाटवोऽसि ।
सिद्धिः पुनर्भविजनान् वरितुं समुत्का,
सव्यत्वमेव विविधं विविधां (तु विधिं) विधत्ते ॥९२॥

चित्र भवगत मत श्रुतिधरैर्भवत्वमनाङ्गिना,
किञ्चिदेव फलेत् कदाचिदमर दत्वा पर कालगम् ।
वचित्र प्रणिधाय सिद्धिपदत्र सिञ्चिलिने द्रागमा ! ,
युष्मत्प्रोक्तमल चतु शरणमाप्त्वा फलेन्नान्यथा ॥९३॥

गुद्धागम । त्व त्रिविध विधाता, यत श्रयस्ता खलु जीव आदौ ।
अहन् गणेशोऽवरकेवली वा, भविष्यतीति नियतिं विधत्से ॥९४॥

एकस्वरूपोऽपि कथ त्रिचित्रा, (विधत्से),
सम्यक्त्वकाले हि तथाविधा जने ।
जिनेन्द्रमुख्यै खलु चित्ररूपै ,
फलै फलन्तीमृजुमागमनियाम् ॥९५॥

आदिष्टा विधय सदागम । भवोत्तराय ये ये त्वया,
यत्नाँस्तानिखिलान् श्रयन्ति भविन प्राप्तु शिव सोत्सुका ।
निर्गुण परम त्वया फलतयादिष्ट पुरैवाऽऽश्रितान्,
वचित्र किमनेहसो धृतमिहावल्गुप्रमादास्पदम् ॥९६॥

सदागम । त्वत्कथिताशया इमे, स्थापिरे त्वत्कथि (दृगादि)
तारयाङ्गिन ।
फल त्रिचित्र विविधाद्धि कालाद्द्रव्य महत्त्व ननु हा । कथ ते ॥९७॥

नर्थहीन न च तेऽस्ति रूप, सदागमेमे च विचित्रताभुव ।
न चान्यवद्धर्मैकनयाश्रितस्त्व, ग्राह्यश्च धार्यश्च कथ नु वाच्य ॥९८॥

सममयर्मोश्रितवस्तुगोचर प्रमाणतामिच्छति याच आप्ता ।
नन्यागम । त्व नियतार्थधर्म प्रमाणभावो ननु ते विना मृत ॥९९॥

श्रद्धायुतैर्ननु भवान् प्रमितिस्वरूपं,
नीतः सदागम ! सदापि यथार्थभावात् ।
वर्षागतं प्रवरवारि यथा गृहीतं.
वर्चेण वर्यमिति सद्वचुदीरयंस्त्वम् ॥१००॥

भवाब्धिचक्रचञ्चवोऽपि जन्तवस्तावेक्षणात्,
सदागमा सदागमा भवन्त्यनूनसद्गमाः ।
परं भवभ्रमॉल्लघूनवाधवोधसङ्गमा,
व्ययन्त आप्यते यदा त्वयोदिता क्षरावलिः (क्षितिश्रितिः) ॥१०१॥

वाच्या न या सद्विदुषां न गम्या, योगोद्यताना न च नेत्रगम्या ।
चक्षुष्मतां साप्युदिता त्वया वाग्, न तां स्तुते ह्यागम-
सद्गिरं कः ॥१०२॥

परापरागमेक्षिता न यावता निवर्त्तते,
परम्परागमेक्षिता न नाथ ! मे विवर्तते ।
परम्परागमोक्षितं पदं न तावताऽऽगमाः,
परम्परागमाश्रयद्भिरट्यते न संसृतौ ॥१०३॥

जयवन्तमनन्तगमं सुगमं, विदधन्निखिलार्थविकाशगमम्,
वरसंवरनिर्जरमार्गपरं, दुरितौघनिवारकसत्यधरम् ।
ननु सेतरजीवविवोधकरं, स्वकसिद्धियुतं परसिद्धिकरम्,
जिनराजमुखोदितवाच्यपरं, नमताऽऽगममुग्रतरं विवुधाः ! ॥१०४॥

आगममुखमावश्यकमन्यं, सामायिकमत्रादौ सर्ग्यं,
दृग्ज्ञानाऽऽचरणानां नियमं, शपनमवद्यात्मकशमविषमम् (?) ।

त्रिविध त्रिविध काय भवै-स्त्रैकालिकदुरितालयपगम्यै ,
जिननायकपथि निष्ठो मुख्य , च म्यात्सामायिकमतिमरय ॥१०५॥

नर धृतज्ञो गुणज्ञातमाश्रितोऽपक्व तु तम्योत्तमतापन्नाश्रितम् ।
ध्यायात्तन्नाऽन्तगुणार्पक चतु र्भि श्लव स्तौति परागम न क ?॥१०६॥

उत्पनमधौ प्रवर हि मौक्तिक दन्तु साधा विषयाश्रित नरम् ।
यशोपकारीह तथा मुनीशोऽपयज्जिनोक्त चरण प्रणम्य
(कृतागमभक्तीटनम्) ॥१०७॥

प्राप्त चरण महिता जिनपा, नतयो निहिता ह्यतिमिरपापा
(नेऽपापा) ।
निरतिचार तत सफल म्यात , प्रतिक्रमणागमतस्तत्सिद्धि
(तुर्याध्ययनागमतस्तत्सिद्धि) ॥१०८॥

न चाऽऽगसा दुष्कृतवाग्विशुद्धता, जने समेपा कतिचित पुन क्रियाम् ।
आगाम्यपेक्षन्त उदारसत्कृति, तथोत्सृज सच्चरणागमो मती ॥१०९॥

सन्तोषो नव शास्त्रे न च धननिचितौ सज्जनाना नराणा,
मोक्षे यान समेता न हि विनयतयस्तुष्टता यान्ति धर्म ।
तद्वत् प्राप्तो वरेण्य शिवपुरसुगते सच्चरित्र मुनीश ,
प्रत्याख्यानागमाय सततमुक्तिधौ समरायमुख्य ॥११०॥

जैनेन्द्रागम उत्तमो यत इहाहारादिचेष्टाऽखिला,
निश्रायाऽङ्गिदया समस्तसमितीगुप्तीश्च तिस्रो वरा ।
तद्दत्कालिकशास्त्रगाम्यविहित मत्वा समस्त बुधा-
मत पाठय शुभसाधवे ह्यतन्निात समाधयन्ति स्फुटम् ॥१११॥

चारित्रं विधियुक् तदा शिवपदाद्यालं भवेन्नान्यथा-
ऽसौ शय्याहृतिवाससां यदि परामन्वेषयेदेषणाम् ।
तां चैका वियुता द्विशेद् वरतरा या पिण्डनिर्युक्तिवाक्,
तत्तामागमसत्यतत्त्वविदुषो घोषन्ति मूलात्मिकीम् ॥११२॥

मान्याः सदैव विधयो विदुषां विदुक्ता-
श्चेतोहरा यदि परं शुचितर्कविद्धाः ।
ज्ञातादिभिर्यदि भवन्त्यनुरूपरङ्गाः-
स्युरुत्तराध्ययनमागमसाश्रये तत् ॥११३॥

हिंसानृतादीन्यशुभाद्यधामेत्युशन्ति सर्वेऽपि परे हि तीर्थिकाः ।
षट्कायबन्धादिविदस्तु विज्ञा आचारमङ्गं मनसा श्रयन्ति ॥११४॥

जातायां भूरि सम्पदीतरजनस्तैन्यादिजं साध्वसं,
तद्वत्तीर्थिकसम्भवं श्रुतिमतश्चारित्रिणस्तद् ध्रुवम् ।
अङ्गं सूत्रकृतं ततं गणधरैराचारसूत्रात् परं, (तत्तर्काङ्कितसंयमा-)
तर्काङ्कं व्रतवाढमागममिमं विज्ञाः श्रयन्तु श्रियै ॥११५॥

लब्ध्वा वित्तं गतचरटभयं श्रेष्ठिना गण्यतेऽट्टे,
सौवर्णं तत्र मुख्यं गणयति तदिवार्थान् दृशान्तान् सुदृग्वान् ।
सङ्ख्यां कर्तुं मनसिं विधृतवॉस्तत्तृतीयं सदङ्गं,
स्थानाख्यं ह्यागमज्ञैः प्रतिदिनमनघं श्रियते सर्वशुद्ध्या ॥११६॥

चिक्कणे चिक्खले (कर्दमे) काकिणीं वीक्ष्य विज्ञः,
सदोद्धर्तुमीहेत तदानुबन्धम् ।
जिहीते न चार्थस्तदीयं प्रतीत्य,

समाख्याति तुर्येऽङ्गज्ञातान् समेत्यान् ।
समस्तेऽथ श्रेष्ठागम त श्रयध्वम् ॥११७॥

आप्तो निर्भीक आप्तोऽनघकृतकृतिं यो दधात्यथजात,
सोद्युक्तः पूर्वनद्यागतमुक्तिमनुस्मृत्य वृत्त सुशील ।
सद्धान तद्धदत्रागममतिनिपुण पञ्चमेऽङ्गे जिनेशा-
ऽऽचार्यानाश्रित्य सम्यग् नमत भगवतीमागम सत्यवृत्ता ॥११८॥

समेत्य वक्ष्यान् प्रचुरान् सवादान्, घृत्तान्वितांस्तत्र जनेषु नित्तिम् ।
नेतु समाख्यायिकया यतेत, ज्ञाताकथाप्यत्र तथागमेषु ॥११९॥

आश्रित्य वक्ष्यान् स्थितिमीयुषा परा, घृत्तान् सुचित्तान् सुधीरातनोति ।
उपासकाना परमा समद्धा मपोपमोपासक आगमे बुधा
(विदाम्) ॥१२०॥

स्वनद्यैर्यत प्राप्त विबुधविसरै पूज्यपदक,
तदुत्कीर्ति कुर्वन् निजपरिकर यत्ननिपुणम् ।
तत्र कुर्यात् स प्रगुणफलद शुद्धपथग-
स्तथा न्याय्या पूजा जिनपविधिना तत्कृति ताम् ॥१२१॥

प्रवृत्ता मोक्षायाऽनघमतिधरा सद्व्रतजुषो,
गुरुत्वात् पापाना प्रभव इह नैयाय्यपदे ।
पर सत्यङ्कार विमलतरमाप्याचलपद,
वक्ष्या ये जाता स्मृतिरनुपमाऽनुत्तरकृता ॥१२२॥

ज्ञान समस्ति निखिलाङ्गभृतामनून,
भोगोऽत्र दुःखमुत्तयोग्नुभावरूपम् ।

प्राग्बद्धकर्मफलमेतदिति प्रमित्य,
सुज्ञो विपाकमनुसंस्मरतीह शास्त्रम् ॥१२३॥

पापं पुण्यं च यत् स्याद् भविजननिचये निश्चयादाश्रवात्त-
द्रोधः शक्योऽस्ति विश्वे श्रयति यदि पदं संवरात्मैकरूपम् ।
नाशोऽपीष्टप्रदाता ननु तत इति तद्वर्णकं प्रश्नपूर्व,
सद्व्याकृत्या मुनिपसमुदितं श्रीयतां कर्ममुक्त्यै ॥१२४॥

द्रव्यं श्रीदृष्टिवादं मुनिपसुकृतिभिर्विश्वगार्थप्रभासं,
पञ्चाङ्गं द्वादशाङ्गं परिकृतिसहितं सूत्रपूर्वानुयोगैः ।
युक्तं पूर्वैश्चतुर्भिर्दशगणकयुतैश्चूलिकैश्चित्ररूपैः,
साधो ! स्तौत्यप्रमुत्कः समश्रुतभणकं स्वागमं चित्प्रसत्त्यै ॥१२५॥

श्रद्धा तर्कानुसारी श्रयति विधिगतं यत् सधर्मान्यधर्मं,
ज्ञातं षट्कायहिंसादुरितविरतियुक् तत्प्रसिद्ध्यै ह्युपाङ्गम् ।
तीर्थ्याऽर्हन् मार्गयुक्तान् विविधगतिगतान् दर्शयच्चाग्रिमं तद्,
वन्दे श्री औपपातं जिननमनमहैः (सञ्चितं नूनमेषः) ॥१२६॥

कुतीर्थिकः पुरा भवञ्जिनान्तराध्वसंश्रितः,
स नाकिधाममोक्षसौख्यसंयुतो भवन् यदा ।
दृश्यते तदा मुनेः परा रतिः श्रीआर्हते,
राजपृच्छया युतं ह्युपाङ्गराजमग्र्यकं
(द्वितीयमाश्रये सदागमं श्रुतौ रतः सदा) ॥१२७॥

जीवाऽजीवप्रमुख्यान् यदि च दशविधान् सत्पदार्थांश्च शृणोति ।
साफल्यं तस्य यः स्यादनुमननपदुरित्युपाङ्गं तृतीयम् ।

जीवाऽजीवाऽऽस्रवमुखयाऽभिगमपदयुत यद् वृणोत्यर्थमस्या,
चैविध्य बुद्धिगम्य द्विविधमुरुगत स्तौमि तत्तागमं तम् ॥१२८॥

विकीर्णानां रक्षाविधिरतुलसाहसकृतिपरा,
सुरत्नाना यद्वद् भवति च पर ग्रोतविधिना ।
यथा मान ग्रोते सुगमविधिना रत्नणविधि,
तथाऽनन्ता ख्याता सुगमविधिनोपाङ्गनिचिता ।
(तथोपाङ्ग तुर्य श्रुतिधृतिपरै सन्मुदितम्) ॥१२९॥

यद्यपि पूज्या द्वीपान्तरगा पूज्यगणा सुधिया शुचिकार्यो-
ऽदपि च जाता ये स्वद्वीपे पूज्यतरास्ते निस्टतरत्वात् ।
तत्क्षेत्र महिमाश्रितिपान न्यायमनुस्मत्यैन विबुधा,
जम्बूद्वीपपदोपगताङ्का प्रज्ञप्ति महयामि सुगाहम् ॥१३०॥

भोगो रभा च विश्वे तनुगृहसिचयाकल्पतल्पादिकाना,
संस्काराच्छुद्धितश्च न तु समधिगते साध्यसिद्धिस्तथैव ।
ज्ञानादौ दुर्लभे तत्प्रतिनियतमिह प्रापिते साधुधुर्य,
सर्वं साध्य सुखेनेह भवति मनश्चिन्तितप्रकल्पो रमेत ॥१३१॥

मर्यादा रक्षणीया ननु सुपथगतै पूजनुसु प्रवृत्तै-
स्तृण्या नवाच्चि सिंहाभक उदितरुचि स्वीयमेवाच्चि,भक्ष्यम् ।

राद्धन्मोक्षाप्तनीहापितगुचिहृदयो वर्तते सूरिवृत्ते,
मार्गे दोषेऽप्रवृत्तो मुनिरुदितबृहत्कल्पसूत्रं श्रयन् हि ॥१३२॥

शुद्धि पात्रानुकारा न च समविधिना नैव सर्वश्च सर्वा,
यद्वचारित्रपात्रे न सकलमुनिभिर्नैव चक्रप्रकारा ।

भेदाः पञ्चान्न शुद्धा व्यवहृतिनिपुणाः प्रोचिरे शास्त्रविद्भि-
स्तच्छ्रद्धा पात्रविद्या व्यवहृतिनिपुणं शास्त्रमेतच्छ्रयध्वम् ॥१३३॥

आद्यान्तिमार्हद्वरशासनाश्रितो, द्विसन्ध्यमावश्यकनिर्मितिं गताम ।
द्विधौघसच्चक्रगतां समाहृतिं, श्रीओघनिर्युक्तिमतः श्रयन्तु ॥१३४॥

यथाकल्पं प्रोक्ता मुनिपमहिता कल्पकरणि-
स्ततः कल्पा ज्ञेया विविधविधिना भूरिभणितीः ।
बृहत्कल्पे प्रान्त्ये रसमिति मिता या प्रभणिता,
द्विचत्वारिंशद्धितस्थितिरुचिरुपास्याऽत्र कल्पे ॥१३५॥

सूर्याश्चन्द्रमसो जगत्यतितरां तिर्यग् जनानां हिताः ,
सङ्ख्यातीतमितास्तथापि सुतरां धर्मे कृतानादराः ।
ते प्राग् जन्मनि, तेन कल्पगमने नापुः परं दैवतं,
सूर्योच्चन्द्रपदाङ्कितं ननु ततः प्रज्ञप्तियुग्मं श्रये ॥१३६॥

निरयावलिकां श्रुतपंदगामिकां धर्मविराधनसङ्गतिकां,
अन्त्याङ्गानां पञ्चकगानां स्मृततदुपाङ्गदशाश्रयिणाम् ।
स्मरत सुमतयो गुणततगतयः पञ्चोपाङ्गं वृषरतयः,
श्रुतमिह सर्वं हतमदगर्वं स्तुतमिदमनघपदाप्तिपरम् ॥१३७॥

फलं द्वैधं धर्मे जिनपमतगे सन्मुनिमतं,
ससाध्यं प्राप्यं वै शिवसुखयुतं नाकिसुकृते ।
शिवोद्युक्ता भव्या इतर इतराश्रितियुता,
दशाश्रौते द्वन्द्वं हितकृदितराश्रितमरम् ॥१३८॥

अङ्गाद्या श्रमणत्वपर्यगणनामाश्रित्य देया मता-

ऽऽदाङ्का परिणामिता पुनरुरीकृत्यान्यथा नैव तु ।
सत्यप्युत्तमभावुके मतमिदं मान्य श्रुतेस्तुयम,
श्रीयुक्त महताङ्कित श्रयतु तन्ज्ञेयो निशीथात्मकम् ॥१३९॥

दशेष्वशेषेषु नृपावलीना, साध्या सदाचारपरम्परैव ।
पर विभिना खलु दण्डनीति श्रीजीतकल्प तदिनाश्रयोद्धितम्
(येन) ॥१४०॥

धृष्टा भूमिर्विविधविधिना धान्यसार्थं सदुप्तो,
वृष्टो मेघो निमलदकवानीतयोऽपि विलीना ।
तत्साफल्य स्वकृतिफलात्तद्वदन्यभागे,
धर्मी चेत् स्यात् शरणमुचक सश्रयी स्यात् सुभाव ॥१४१॥

मति क्षुतेनास्ति न कासिते न, यथैव जायेत नृणा सुयुग्मिनाम् ।
मुनिस्तनोरातुरभावमन्त्ये, ज्ञात्वाऽऽद्रियेतातुरसद्गृतिं तत् ॥१४२॥

दीर्घं मान्य यदि च धृतिधरो जीवितान्ते विदाङ्की,
दीर्घां कुर्यात् प्रतिपदविधिनाराधना ज्ञानमुख्याम् ।
न्यश्च ख्याता मुनिगणहितन्नामातुरेऽत्र विगल,
प्रत्याख्यान महदनुगत नम्यते नित्यमग्र्यै ॥१४३॥

आराधनामातुरत्याग्यमत्तरा, प्राप्तो मुनिर्भक्तमनन्यमेव ।
अन्योपग सवृणुयात्क्रयामि तत् प्रक्षीणक भक्तपरिज्ञयोक्तिम् ॥१४४॥

मोक्षाप्तये सन्मुनिराद्दतो यत्, मृतिं समेप्या विदुषोऽधिगच्छेत् ।
प्राग् द्वादशाब्या विधीत सद्ये-खना सुसम्भागतोऽयमिष्यते ॥१४५॥

सातोदयान्नैव भवन्ति चित्रा, रोगोपसर्गादिसमुद्भवा व्यथाः,
भवेद् ध्रुवा साऽनशनोत्थिता तकां, सहेत सत्तन्दुलमानवोधतः ॥१४६॥

कृता बुद्धिर्धर्मे भवति सुखतो मानवभवे,
परं चेदन्त्येऽङ्गे भवति सुभगा स्याद् गतिरिह ।
दुराराध्यो ह्यन्तो भवति सुगमश्चन्दकसिद-
स्ततो विज्ञा वित्तागममसुगमेयादरपदम् ॥१४७॥

नरः कृतज्ञो गुणकृन्नतौ परः, स्तवे परस्तत्स्तुतिकृन्नराणाम् ।
मार्गं प्रदर्श्यार्हदभिष्टवानां, देवेन्द्रस्तुत्या स्मरणात् कृतज्ञता ॥१४८॥

क्षयादि कालादिकृतं तु कर्मणां, प्रायाय बुद्धवाऽर्हसुगेद् गणी तकम् ।
विद्या गणीना स्तुतिमर्हतीतो, बुद्धा न यत्साधनविभ्रमोपाः ॥१४९॥

सर्वं कृतं स्यात् सफलं मुनीनां, समाधिमाराध्य मृति व्रजेयुः ।
प्रेतान् स्मरेत् तत्सुसमाधिना ये, स्तुत्यस्ततो यो मरणे समाधिः ॥१५०॥

यद्यपि केवलमुत्तममुक्तं, तदपि न तीर्थपदाय समर्थम् ।
नन्दीश्रुतमिह तत्क्षममाप्तै-रुक्तं नाट्ये यथा वरनन्दी ॥१५१॥

व्याख्यातृवर्ग उदितो जिनमार्गगामी,
लोकोत्तरेतरविधेः प्रभुमार्गमाख्यन् ।
द्वाराणि तद्विधिपराण्यनुयोगयुञ्जि,
भव्यानुयोगकरणे स्मरणं हि तेषाम् ॥१५२॥

जिनागमानां जितरागमाना स्तुत्योद्गमानां स्तुतिरासमाना ।
जीयाद्यथा सिद्धगिरौ च सूर्य-पुरे शिलाताम्रपटे जिनौकसी
(ऽर्हदागमाः) ॥१५३॥

आम्नायोऽसावन्त्यावर्त्ती नरो भ्रमी पक्षे शुक्ले,
। रूढ गूढ दहन्नु सरलेतर ग्रन्थैर्मार्गम् ।
सत्सम्यक्त्वो व्रते दृढसन्मति मोक्ष गन्ता,
॥ ॥ हन्ता जा (या) ते सत्यागमसंस्थर्यी ॥१५४॥

पापामयेषु वरमौषधमागमोऽय, कल्याणकल्पलतिकोद्गमवारिधार ।
सन्देहसानुविलयैकपविप्रभोऽय, मोक्षाध्वसङ्गमकरो वरसाथ
वाह ॥१५५॥

श्रद्धावानपि यो भवेज्जिनपते सद्धायमल्योज्झितो,
जैनेन्द्रागमसञ्चितेऽथनिचयेऽनाभोगतोऽसद्गरो (वाऽगुरा)।
श्रद्धाया विगतो भवेद् दृढतरश्चेत कल्पितेऽर्थे नर ,
। सत्सम्यक्त्वसुरेषमागचलित सन्मार्गगोक्तौ दृढम् ॥१५६॥

गणधरै पुरतो यदुरीकृत, निपतन जिनदेशनसद्मनि ।
निखिलभावविदा स गतोपमो, भविमतो महिमाऽऽगमसन्तते ॥१५७॥

श्रद्धेयोऽसौ जिनपतिगदिते ह्यागमे शुद्धदेशी,
मिथ्यादृष्टिभवति यदि वाऽभव्यजीव कुपात्रम् ।
तत्सम्यक्त्व, श्रुतगणगदित दीपकाख्य पर स,
चेन ज्ञातो गतमननयरो ह्यागमोक्तान् पथो वै ॥१५८॥

जीवाऽजीवाश्रवाणा शुचितरमुक्ति बन्धने सद्गतौ च,
पुण्ये पापेऽपचाये कृतदुरिततते शुद्धनि श्रेयसे च ।
ज्ञान मन्येत चिह्नैर्यदि भवति तदा त्यागमैकान्तदृष्टि ॥१५९॥

न दृष्टो न वित्तो न च जगति वृत्तान्तसरणि-
र्न वार्त्ता नो शब्दोऽणुरपि च यस्यास्ति विदितः ।
न देशो न वेषो न च परिकरस्यांशसरणं
कथं ज्ञेयो देवो यदि च न भवतीहागमगतिः ॥१६०॥

न यो द्रव्यं दत्ते द्रविणनिचयं नो न च गृहं,
न योषां नो पुत्रं न च शरणदो रोगनिचितौ ।
न यस्त्राताऽरण्ये न भवति चरणे विक्रमपरा-
भवे त्राता साधुर्भवति शरणं ह्यागमबलात् ॥१६१॥

यो द्रव्यं ललनां विचित्रविषयान् स्वातन्त्र्यमुत्सादये-
दाहारेऽपचितिं सदैव गमयेन्निष्काशयेत् कल्पनाम् ।
दाने शीलधृतौ तपस्यनुपमे सद्भावनाभावने,
भव्यं धर्मवरो नुदन् शरणदो मान्यो भवेदागमात् ॥१६२॥

मुक्तिर्नैव भवेद् भवभ्रमिभृतां कालादनादेर्ध्रुवात्,
सत्यं स्यात्तदिदं यदा नहि भवेन्नाशो ध्रुवाज्ञानगः ।
सर्वेषां भवधारिणां विषयजं सौख्यं सनानादिजं,
युग्मं नश्यदुपेक्ष्यते यदि पुनश्चैजैनमार्गागमात् ॥१६३॥

सत्स्वप्यसङ्ख्येषु सदा सुरेषु, तथैव तिर्यक्षु च नारकेषु ।
सद्दक्षु तीर्थं न मतं जिनेशैस्तत्रास्ति यन्नो जिनपागमोदितिः ॥१६४॥

मोक्षे चतुर्गतिभृतां प्रचुरा समीहा,
वीर्यं च भूरि तनुवाग्हृदयोद्भवं च ।
सम्यग्दृशः सुमतयश्च तथापि तं न,
लब्धा न कोऽपि महिमाऽद्भुत आगमानाम् ॥१६५॥

शून्या सदैव गतयो न चतस्र आप्या ,
सम्यक्त्वबोधयुगलेन, न जातु मुक्ति ।
एकस्य तत्र किमु कारणमुज्ज्वल न,
चारित्रमेव, यदिद जिनपागमाऽऽप्यम् ॥१६६॥

सयम सदैव सगरोद्धुरो, निजरापि नयनगोचरास्ति तत्र वै ।
नैव मोऽस्ति सयमात्परात्, पर भवेदसौ जिनागमोद्धुरान् श्रित ॥१६७॥

रूपेण भेदेन तपेन शुद्धता, यत्रागमाना तत्तिरद्धुरा धरेत् ।
तत्रैव सामान्यतमास्ति चिह्नै—न चागमैरज्जितमस्ति दर्शनम् ॥१६८॥

द्रव्यै समेतान् समपर्ययान् ये, जानन्ति ते मोक्षगमाय योग्या ।
सदागमास्तैर्जिनसूरिधर्मा, भव्यै सदा सेव्यतमा भवन्ति ॥१६९॥

अष्टौ चरे जैनमतेऽत्र शासने, प्रभावकास्तत्र सदागमास्त्र श्रित ।
आद्यो भवेत् प्रावचनी परे पुनर्विशेषका नैव तदुज्झिता खलु ॥१७०॥

भाषाया समितिमता मतिमता वाचश्च गुप्ति परा,
य सदै दिवस भणेदपि नर शास्त्रोक्तवाचा विधौ ।
चिह्नीभूय परो नरो यदि पुनर्नैगोऽतीह क्षण,
नास्यामू उदिते, सदागममतिर्भूयान्नर सवदा ॥१७१॥

आदर्शो नैव दत्त करणविधिगतो नैत्र नैपेधिकोऽपि,
शिष्याणा सयमादौ जिनपतिभिरिहैकान्ततो मोक्षमार्गे ।
उत्सर्ग सापवाद जिनपतिकथित मो समागम्यमाणा,
मन्यानो स्युस्तदुद्धयनिगल्परो ह्यागम सुज्ञमान्य ॥१७२॥

निरागमा निरम्बरा जने पशूपमोद्वहा,
निरम्बरत्वमेव मार्गमार्हतं ब्रुवन्त आः ! ।
श्रयन्ति केवलं स्त्रियां न चान्यतीर्थिकादिषु,
न चैषणां सदागमांस्तनः श्रयन्ति वित्तमाः ॥१७३॥

यदाऽऽगमानां परमा विभूति–र्गीतार्थवक्तृत्वसुधीश्रुती श्रिता ।
तदैव धर्मे विजयोऽस्ति जैने न चागमैः शून्यमिहास्ति शासनम् ॥१७४॥

दिगम्बराणां परमेश्वरा इह लिङ्गाण्डयुग्मं जनवद्धरन्ति ।
भवन्ति ते हास्यपदं हि लोके, नेयं व्यथा छन्नपदे समागमे ॥१७५॥

नग्नाटा रचयन्ति नादमहितं यज्जैनवाग् नाक्षरी,
तिर्यग्वत स्फुटतोज्झिता ननु सकेत्याहुर्निरास्तागमाः ।
ये तु स्वागमसंश्रिता बुधवरास्ते योजनोन्मानगां,
मन्वाना जिनवाचमार्हतमतं सर्वाङ्गिबोधं स्तुयुः ॥१७६॥

सामान्येन जनैर्महाङ्कितनिशीथोक्ता मता पञ्चमी,
ज्ञानस्योत्तमपर्वतामनुगताऽऽराध्या ध्रुवं सत्तमैः ।
चेत् सूक्ष्मैक्षिकया परं यदि समालोच्येत विज्ञैर्गणे,
शब्दास्तेऽशनिवेदिनस्त्विति नयात् सा पञ्चमी स्वागमात् ॥१७७॥

जिनागमानां श्रितसद्गमानां, हतावमानां धृतसत्तमानाम् ।
सत्सङ्गमानां विमताधमानां, तनोत्वमानां स्तुतिमात्तमानाम् ॥१७८॥

हत्वा विस्तृतमिथ्यात्वाऽऽन्ध्यं कृत्वा कर्मफलं शुभसन्ध्यं,
हतकोटाकोट्यधिकं ध्यान्ध्यं भित्त्वा ग्रन्थिगतं दुरितान्ध्यम् ।

रब्ध्वा सम्यक्त्व गतवान्भ्य धृत्वा मार्गगजनशुभमध्य,
श्रित्वागममतमुपगुणमध्य गत्वा नन्दत शिवमपवध्यम् ॥१७९॥

सहस्र वक्तृणा भवति च यत्रि प्रावचनिना,
पन्थाद्योतोल्क जिनपतिमते साम्प्रतगतम् ।
तथापीष्ट तीर्थे प्रभुवचनसाङ्गत्यनिपुणे,
यदि स्यात् पुस्तस्थागमततिगतमेकगदितम् ॥१८०॥

साङ्गत्य भविना मदेष्टमनघ यत्सङ्घवीय महत्,
तच्चेदागमसङ्गम यदि भवेत् तीर्थोच्छिदे नैव तत् ।
पूय यत्कमलप्रभेन गणिना चैत्याश्रिताना पुर,
सिद्धा ताध्वनिरूपणेन विहित तीर्थङ्करत्व महत् ॥१८१॥

जिनेन्द्र महत्यन्वह सत् त्रिकाल, विभूत्या महत्या गताऽऽश समग्रम् ।
विरुद्ध यदि स्याज्जिनेन्द्रागमैस्त द्भवस्यैव पृद्धयै भवेत्तत्समग्रम् ॥१८२॥

साधुयद्येक एवानघजिनमतगतो विद्यते ह्यागमाना,
श्रद्धावा सत्यमर्थं परमपदमतिस्तीर्णता तत्र साक्षात् ।
न स्वन्ये प्रभूता जिनपतिगदितागमातीतवान्त-
स्तीव यत्सत्यनिष्ठ जिनकथितमिद तच्च शुद्धागमीयम् ॥१८३॥

जनेन्द्र शासन तूदितमिह निखिल सापवाद न चान्यत्,
यावान् स्याद् बन्धहेतुर्भवगतिधरणे मोक्षसाध्येऽपि तावान् ।
कमाद्धान्त्येकहेतुर्भवति परमिहोत्तीर्णमात्रागमान्न,
प्रोक्त यस्मादनेन जिनपतिगदितोत्थापका निह्नवे ॥१८४॥

स्यादागमैकरसिको नर इद्धबोध-स्तत्त्वं शुभं जिनगतं हृदयेऽनुविभ्रत् ।
ज्ञाता तदीयगुणसञ्चयशुद्धतायाः, स्यात्तत्र तत्र परमादरभाक् च नित्यम्

गुर्वाराधनतत्परा नर इमे साक्षात् सहस्रात्परे,
दृश्यन्ते शुभयोगविघ्नविगमे बद्धादराः स्वल्पकाः ।
तेषां या परिसेवना सुविधिना साऽल्पकानां यतो,
यः स्यादागमतत्त्वबोधरसिकः स स्यात्तथाचारवान् ॥१९७॥

यो ह्यागमपरतत्त्वमीक्षत इहावर्त्तान्त्यभागागतो,
नाऽसौ पश्यति धर्मतत्त्वनिपुणः शास्त्रेऽपवादात्मताम् ।
यावच्चक्षुषि वर्त्तते तिमिरकं तावद्यथार्था न दृक्,
तत् सुज्ञः परमादरे धृतमनाः शुद्धागमं संश्रयेत् ॥१९८॥

सुपात्रं यद्दानं भवशतसहस्रेषु सुलभं,
न, जीवानां जातु प्रचुरतरपापाक्तमनसाम् ।
यदा जीवे भावः प्रचुरतरपक्षैकसुभगो,
महादानं लब्ध्वाऽऽगमततिरसश्चेद्धृदि भवेत् ॥१९९॥

अनन्त्यावर्त्तेषु प्रचुरतरसत्पुण्यसुभगं,
भवेद्दानं यस्मात् सुरनरगतं सौख्यमतुलम् ।
अलं मोक्षायैकं भवभयभृतामागममतं,
महादानं प्रान्त्ये सततविधिसत्पात्रसहितम् ॥२००॥

दायं दायं मुनिभ्यो विधियुतममलं दानमाप्नोति सौख्यं,
ध्यायं ध्यायं जिनानां निरघविधिपदं यत् करोत्यागमानाम् ।

धाय धाय गुरूणामनुमतिममला भृत्यवर्गस्य वाधा
हार हार तदेतच्छिवपदसुभग सेवनीय महाङ्गम् ॥२०८॥

जिना दीक्षाया प्राग् न्नति मान तु परद ,
मदा प्रोक्त शास्त्र जिनमहादानममितम् ।
यदि श्रित्वा शुद्धागमतति दानमयते,
सदतच्छ्रेयस्यै ननु महादानममलम् ॥२०२॥

नास्ति विशेषो भक्ते प्रीतेर्जिनपवृषान्दरे,
ह्यागमवाक्यात् सद्बुद्धीना दानादि (सुकृत) समान्दरे ।
सदनुष्ठानेऽस्येपोऽयत्रागमे परमान्दाद्,
धामानाथ सत्साधूना भवेदत एव हि ॥२०३॥

त्यक्त्वा गेह तात जननी तनूजमिद्धानना
यन्तु द्वानि पुत्री पुत्र मित्राणि च सौम्यान् ।
जात माधुन्मत्साफल्य फालादिविधानतो,
विनत सूरी चेत् मन्यतेऽनघागमसन्ततिम् ॥२०४॥

पूजा मत्यसेष्ठिना यदि भयान् शुर्यात त्रिसन्ध्य मना,
पुष्पाद्यैरमोघनै शुचितरैर्मन्त्रान्तिका सयत (त) ।
सा चेत्तागमसङ्गता यदि तदाऽन्यायाधसम्पत्तये,
नो चेत् सा परमाथसिद्धिविधिन दत्ते सुराने सुखम् ॥२०५॥

ध्याने यो निरत गुणो गुणिगण माल्म्बने गुद्धिदे,
ध्यायाऽर्हा जिनमम्पद सुरकृता छत्रादिकापूर्जिताम् ।
दृष्टे नैव जिनो न चाऽमरकृता शोभा प्रतीहारिणी,
सत्याऽर्हा जिनागमेभ्य उदितध्यानोऽपरालम्बना ॥२०६॥

मोक्षायोद्यत आर्हतः खलु भवेन्न प्रीतः पदार्थव्रजं,
पर्यायात्मकतां श्रितं प्रणिदधन् मोक्षो भवो नान्यथा ।
दुःख्येवाऽसुधरो जनो भवतताै शश्वत्सुखं स्वे स्वदन्,
श्रद्धावाऽऽगमसन्ततेः परमिदं युक्तं बुधो मन्यते ॥२०७॥

साध्यं सिद्धिपदं सदा भवभृतां नान्यत्र दुःखान्तको,
दुःखाभिन्नमपातसंयुतमलं प्रेप्साश्रितिर्यत्र नो ।
तादृक् सौख्ययुतं पदं यदि परं नान्यत् क्वचिद्विद्यते,
निश्चेयं पुनरेतदाप्तकथिताच्छुद्धागमात् पण्डितैः ॥२०८॥

नाशास्त्रं मतमस्ति सम्मतिपदं विद्यामुखानां जने,
तत्राप्येक उशन्ति वक्तृरहितं तत्कल्पितादीश्वरात् ।
एके रागद्विषादिसङ्गतिपरादन्यादितः केचन,
सर्वज्ञोदितमागमं यदि परं मुक्त्युन्मुखा आर्हताः ॥२१०॥

सत्यं शास्त्रमवाक्कृतैर्नररवैस्तुल्यं परं गम्यते,
व्याख्यात्रा निजबुद्धिवैभववलाल्लोके यथाचार्यते ।
आरम्भे च परिग्रहे यदि परं ग्रस्ताऽनृतं ख्यापये-
द्धन्योऽसौ जिनपागमो निगदितो योऽकिञ्चनैः साधुभिः ॥२१०॥

परे जिनोक्तान्मततो विदूरगा वदन्ति भाव विगुणं गतक्रियम् ।
परम्परानिर्गतमुद्भवंते खपुष्पतुल्यं न तथा जिनागमाः ॥२११॥

अनेके गुणाः कारणात्तु स्वकीयात्, प्रजाताः क्षणे नाद्यमाप्यं गुणैस्तत् ।
तथोद्भावने तत्परो नैव जैनः, कथञ्चिद् भवेदागमः शुद्धदेष्टा ॥२१२॥

द्रव्ये क्रियायां च गुणेषु नित्यं, सत्त्वं परार्थप्रतीतिनिवेद्यम् ।
सतो ह्यसत्त्वं परतीर्थिकानां, स्वभावसत्तोद्भवनो जिनागमः ॥२१३॥

समवाय समवायो विदुषा परिपठति कल्पितमयाये ।
निखिला गुणास्तयोऽर्थं, श्रितास्ततो नागमस्त्वेवम् ॥२१३॥

साधर्म्यं वैधर्म्यं, पदार्थधर्मौ तथा मतिर्मातु ।
समवेतमेकमन्यन्न तथेति जिनागमो नैवम् ॥२१४॥

तादात्म्यतो ह्यभावा , श्रिता पर वस्तु भिन्नताश्रयिण ।
इदमन्योऽन्यविरुद्ध, न वक्ति जिनपागमो जातु ॥२१५॥

यो ग्रन्थस्य गतान्तरायचरमप्राप्त्यै विधत्ते बुध ,
शास्त्रे मङ्गलमादित स मनुयात् प्राग् जन्मतो नास्तिकान् ।
माङ्गल्यैकविधौ नु तात नुह धमाद्धुग नास्तिकान्, (?)
नो जैनागममाश्रित घृतगुण ह्याप्त स्मरन् मङ्गले ॥२१६॥

यो जैनागमबाह्यग स मनुते स्रष्टारमुत्कमण,
जीवानामशुभ शुभ च नियत कर्मोपभोक्तेश्वर ।
सृष्टेर्यत् प्रविधानमर्हति ननु शून्योऽस्य पुण्य न तत्,
मन्येताऽकृतसङ्गम कृतहृतिं ह्याऽन्यागमाना स्थितिम् ॥२१७॥

विदित विदुषा निचयस्य सत्ता, नहि कार्यं स्यान् क्रियया रहितम् ।
मनुते परमेश्वरमक्रियक, समकर्तृपद न जिनागमग ॥२१८॥

मनुतेऽक्षजमयसम ह्यान, जगता परमीश्वर ऊरीकृते ।
रहित मतमुत्तमज्ञानमर न जिनागम एवमयुक्तिपर (द) ॥२१९॥

नाकारण कार्यमिहास्ति किञ्चि–दिति प्रवादो विदुषा गणैर्मत ।
तथापि जैनागमबोधशून्या अपितृक पुत्रमुदाहरन्ति ॥२२०॥

न मातृशून्यस्तनयस्य सम्भव, आबालगोपालमिदीह सिद्धम् ।
म्लेच्छा हि तातं परमेश्वरस्य, ब्रुवन्त आख्यान्ति प्रभुं न
चाऽऽगमाः ॥२२१॥

इमे वाह्यास्तीर्थ्याः कथमपि नहि प्रोतनि विभो-
र्वचस्तेषां कण्ठे लुठति फणिवत्मानरहितम् ।
समं विश्वे हृश्यं भवति विभुतः कायरहिता-
दितीक्षित्वाऽयं ना भवति नितरामागमरतः ॥२२२॥

परैः पदार्था उदिता विहीनाः, शक्त्याऽत्र नार्थोऽस्ति विहीनशक्तिः ।
नासौ क्रिया नैव गुणश्च नार्थो, जिनागमज्ञैर्व्यथितं जगत्परम् ॥२२३॥

पदार्थानां चित्रां ननु च जगता शक्तिममितां,
पृथिव्यम्भोवायुप्रभृत्तिभावेषु नियताम् ।
विबुध्याऽध्यक्षं द्राग् यतत इह तन्मतिमती,
तकां श्रित्वा सम्यग् जिनपकथिताऽऽगमगतिः ॥२२४॥

जाता नैव सचेतना न च पुनश्चैतन्यशून्या अपि,
तेनानर्हविभागमाहुरनलाः पृथ्व्यादिद्रव्याश्रितम् ।
भूतग्रामविधानतो विधिरिह प्राणेष्वपि प्रासुके,
ह्यौदारादिविभागमाहुरमला जैनागमाः सत्पथाः ॥२२५॥

द्रव्याण्यनन्तानि भिदोऽप्यनन्ता, वोध्यानि सर्वज्ञपदोक्तिमानात् ।
तद्द्रव्य-तद्भेदविधाववोधो विरागसर्वज्ञनरागमे न ॥२२६॥

जीवोत्क्रमोद्भावितमूरिभेदाः, क्षित्यादयो नाणुभिदोद्भवास्तत् ।
अन्यान्यनामेन भिदाविरोध औदारिकाद्या बहुभिर्जिनागमे ॥२२७॥

अनन्ता अर्थाना जगति विभिन्नो व्यक्त्यनुसृता,
द्विरूपाच्छाया भवति विज्ञातमिति चित्रा ।
ततो ध्वान्तच्छायाप्रभृतिभिदुद्रव्यपटुता,
जिनोक्ताना सिद्धा प्रमितिपत्थमागमतति ॥२२८॥

गुणान् पर्यायाश्चागमतितिरिहान वगणिता-
नुताच प्रत्यर्थं विबुधगण इत्थ मतिमयेत् ।
शिशुक्रीडाप्राय परमततती मानमुदित,
न चाध्यक्षो बाधो भवगत इहान्यै सुमतिभि ॥२२९॥

द्रव्ये गुणे परिमितिं न कणाद आह,
युक्त क्रियाभिरनुगामिभिरत्पथाग्र्यै ।
मोक्ता विचक्षणपत्राय परमिलापै-
नयोऽस्ति विप्लव इहागमसम्प्रदाये ॥२३०॥

यदोपिरेण चिन्ति कथित स्वसूत्र,
व्यावर्त्यधर्मसन्शातमकर्मनातम् ।
त्रियाप्रिपु प्रमुखधर्ममुवाच दिव्य,
आप्तागमोक्तिविमुखा विदम्बित किम् ? ॥२३१॥

साधर्म्याश्रित शिव कर्तुरोऽन्यवादित्वसाधनात्,
साङ्ख्या , परमुरारिप्रमुखतयो भक्तश्च बलान्वित ।
विश्वम्भरप्रमाणतामनिगुणान्छाक्यया सिरामन्वत ,
उच्चैर्मुखेण यथा मनिभिय (गर्ता) जनागमाम्बुधयम् ॥२३२॥

ज्ञानानन्दविवर्जितं खलु शिवं वैशेषिकाः कल्पितं-
दुःखैर्मुक्तिमिहाक्षपादमतिकैर्वेदान्तिभिर्ब्रह्मणि ।
सेलं वैष्णवशैवशास्त्रमतिभिर्देवात्मनोः सङ्गयं;
नित्यानन्दसुखाश्रयं गतभवं जैनागमास्तच्छ्रुताः ॥२३३॥

पदार्थे सत्त्वं यन्न च खलु पदार्थात्मनि गतं,
स्थितं तत्तस्मिन् यद् बहिरनुगतो बन्धनयतः ।
इदं मन्वानोऽयं विदमभिगतेऽर्थेऽखिलगतां,
कणादोऽध्यक्षं सा न भवति हतिः स्वागमततौ ॥२३४॥

मोक्षायाऽऽलिखिता शुभा मुनिवरैर्लोकोत्तरा पद्धति-
र्वीक्ष्या चेत्तनुरर्च्यते रिपुजनै. सत्कार्यते सौहृदैः ।
श्रीखण्डेन, तथापि शुद्धमनसः साम्यं द्वयेऽस्मिन् भवेद्,
वैराग्याप्तसमज्ञता जिनमते योग्यागमानां ततिः ॥२३५॥

समस्ता विद्वांसो विदितविविधार्थोच्चयगणा,
न देवाद्यैर्वार्यं मरणमनिशं यन्निखिलगम् ।
न चानायुष्कोऽत्राणति विदितसर्वोपधिगण-
स्तथाऽप्यङ्गी नित्यं तदुभयमना आगम ऋणः ॥२३६॥

लोकोत्तराध्वगमिता व्रतिनां विशुद्धा,
यन्मोक्षमेव विविधक्रियया ऽऽप्तुमिच्छा ।
देवासुरादिसुखसाध्यपरा इमेऽन्ये,
कोऽन्यो वदेज्जिनवरागमतोऽपरोऽदः ॥२३७॥

दु ख सर्वसुरासुरोरगगतान् मृत्योरसूना दृढ,
सौख्य पौद्गलजालसम्भवमल स्यात् प्रार्थनाया पदम् ।
एव कर्मनिबन्धनैकनिधुर प्राणी भवेऽटत्यते,
धन्योऽय जिनपागमो यदुदितो मोक्षैकमार्गप्रथा ॥२३८॥

हा हा ! भीषणकाल एष न यत सत्यार्थदर्शी रता ,
सूर्याद्या प्रचुराश्च पुस्तकपरावर्त्तार्थिता वादिन ।
भूमीशा विबुधाश्च पक्षपतिता दाक्षिण्यलोभोद्यता,
अल्पा मार्गरतास्तथापि जयवानाप्तागम शुद्धवाक् ॥२३९॥

स्वप्नोपम वै सकल द्रुवनय, वाक्य स्वकीय व्यथित निवेदयेत् ।
तथैव सन क्षणिक विबोधयन चैष वाक्षिगमागमे भवेत् ॥२४०॥

अतीन्द्रियार्थं नहि वेत्ति कश्चि-च्छिन भवो वा न च वेदनीय ।
तथापि तद्वाच इय कुतीर्थिता, स्वोक्तेर्न बाधाऽऽगम आप्तसम्मते॥२४१॥

सौख्य दु ख ज्ञान भ्रान्ति, पश्यन् प्राणिषु चित्रविचित्रम् ।
आत्मैको विश्वव्यापी वा-वक्ति विरुद्ध न तथाऽऽगमगी ॥२४२॥

चार्वाक पूत्कुरुते नास्ति, परभवगामी चेतनयुक्त ।
जातिस्मृतिदु खाभ्या सिद्ध, आगममेवाऽऽश्रयते शरणम् ॥२४३॥

मान हेक मतमध्यक्ष, श्रोतृव् शासन् न धरति लज्जाम् ।
शास्त्राद्वान्यविनोद कुत-स्त्राध्यक्षेतरवाद्यागमवाक् ॥२४४॥

। मुनिवसन-सिद्धिः ।

वितथवादशिरोमणितां दधत्, विगतवस्त्र इदं जिनशास्त्रगम् ।
अनृतमाह सुशुद्धसितांवरान्, विविधमोहमुदीरयितुं रयात् ॥१॥

गणभृता गदितं सितवाससां, प्रथमशास्त्रगतं जिनकल्पिनाम् ।
पदमधारयतां सिचयावलीं, प्रथममिद्धगुणा ननु नग्नता ॥२॥

वितथवादमिमं गतवाससां. गतहृदस्तव मन्यत आस्तिकैः ।
कृतमनन्यत नाप्तमतं यकै-र्वचनमागमगं श्रवणे सुधीः ॥३॥

श्रुतमतं जिनवीरविभोर्न किं, वसनधारणमब्दसुपाश्रितम् ।
अधिकमासयुतं सुरनायक-प्रणतपादयुगस्य दिगंबर ! ॥४॥

श्रुतसमुच्चय आद्य उदीरितं, विमलसंयमशालिजिनांसगम् ।
सिचयमाप्तवरैः प्रथमेऽङ्गके, कथय दिग्वसनोऽनृतवाग् न किम् ॥५॥

सुरवितीर्णमुपाश्रितवान् जिनो-ऽम्बरमिति प्रतिपादितवान् गणी ।
श्रुतसमुच्चय उत्तर आदिमे-ऽङ्ग इह साधुसमूहविराजितः ॥६॥

जगदुरर्हदुपासनतत्परा, गणिवराः श्रुतसागरपारगाः ।
वसनमानमुदस्तपरिग्रहा, मनसि बोटिक !- तन् ननु चिन्तय ॥७॥

गणधराः समवायकृतान्तगं, वच इहोदितवन्त उदित्वरम् ।
चरमतीर्थपतेर्वसनाहता-बधिकवर्षमिति प्रविचिन्तय ॥८॥

इषुमितेऽङ्ग उवाच गणाधिपो, विपुलपर्वत आहतपादपे ।
ऋषिवरे खलु खन्धक आर्हती, समुचितापकृतिं ननु पश्य तत् ॥९॥

न च वचो रचनीयमपाकृत-नयचय जिनकल्पँयुचो यँत्रम् ।
न हि भवन्ति तवे सिचयोज्झिता , समइहोपधिमेन्यिचिन्तता ॥९॥

न च ग्यसन युक्तिप्र धृते, मुनिवरै शुभसयमहेतवे ।
उपहृतौ क्षम उज्झितसङ्गमै रजहरप्रभृतौ शिवसाधने ॥१०॥

जनिरभूत्व निश्चितमूढ्यता, विदन्वासस उत्तमसाधनात् ।
इतरथा कथमम्बरवर्जन, तव मतस्य रवे स्फुटमीर्यते ॥११॥

यदि पर सितवासस उद्भवस्तव मताद् वसनोज्झननर्तनात् ।
ससिचया इति तस्य मतामिधा, प्रभृमरी भवतीह न चान्यथा ॥१३॥

तव मते वृपसाधन उज्झिते, यतितया चरण न हि साध्यते ।
शिवपद न च केवलयुक् पुन , तदहदाद्यजदेतुरिलाहति ॥१४॥

न च गताम्बरिका न हि योपित , परमते यन्मिा वसनोज्झिता ।
स्फुटतर तु निभाल्य योगिनीर्न रुचिर रुचित तव तन्मत ॥१५॥

शिशु-मदाविल-भूतगणार्दितो, भवति नग्न इहापि न शम्यसौ ।
जिनप-शासनसम्मतमार्गयायमनयचनमाश्रयरहते ॥१६॥

स्वपर-लिङ्गि-गृहाश्रितलिङ्गिना, निगदिता पदवी शिवभाविनी ।
धृततनौ घटत शुभभाविना-मनुमत तदिहाम्बरवर्जित ॥१७॥

मगतया रहितो मुनिराहतो, यदि परो भवतीह शिव गमी ।
मतमिद सकलार्घविनिर्गत, भयति शुद्धमना श्रुतभाजुष ॥१८॥
